पतिना हि महिषीपालः स्वां पुत्रीं परिणायितः पण्डितोपदिष्टं सर्वथा मौनमेवालम्बमानो राजकन्यकया तद्वैदग्ध्यजिज्ञासया नवलिखितपुस्तकस्य शोधनायोपरुद्धः। करतले पुस्तकं विन्यस्य तदक्षराणि बिन्दुमात्रारहितानि नखच्छेदिन्या[1] केवलान्येव कुर्वन् राजपुत्र्या महिषीपाल एव निर्णीतः। ततः प्रभृति जामातृशुद्धिरिति सर्वतः प्रसिद्धिरभूत्। कदाचिच्चित्रभित्तौ महिषीनिवहे दर्शिते सति प्रमोदात्स्वप्रतिष्ठां विस्मृत्य तदाव्हानोचितानि विकृतिवचनान्युच्चरन्महिषीपाल इति निश्चिक्ये। स तां तदवज्ञामाकलय्य कालिकां देवीं विद्वत्ताकृते आरराध। पुत्रीवैधव्यभीतेन राज्ञा निशि च्छद्मना दासीं प्रहित्य तवाहं तुष्टास्मीत्यभिधाय यावत्स उत्थाप्यते तावद्विप्लवभीतकालिकैव देवी प्रत्यक्षीभूय तमनुजग्राह। तद्वृत्तान्तावबोधात्प्रमुदितया राजकन्यया तत्रागत्यास्ति कश्चिद्वाग्विशेष इत्यभिहिते स तदैव कालिदासनाम्ना प्रसिद्धः कुमारसंभवप्रभृतिमहाकाव्यत्रयषट्प्रबन्धान्[2] रचयामास। अ-

१ B राहित्याने केवलानि A अदरच्छेदिन्या D लेखिन्या
२ A महाकाव्यत्रयं षट् प्रबन्धान् C महाकाव्यप्रबन्धान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यदा[1] तन्नगरवास्तव्यो दान्ताभिधानश्रेष्ठी सभासंस्थितं विक्रमार्कमुपायनपाणिरुपागत्य प्रणामपूर्वकं विज्ञपयामास। स्वामिन्मया शुभे मुहूर्त्ते प्रधानवर्द्धकिभिर्द्धवलगृहं कारितं तत्र महतोत्सवेन प्रवेशः कृतः यावदहं तत्र निशीथे पल्यङ्कस्थितः सुप्तजाग्रदवस्थया तिष्ठामि तावत्यतामीत्याकस्मिकीं गिरं निशम्य भयभ्रान्तो मा पतेत्युदीरयंस्तदैव पलायनमकार्षं। तस्य धवलगृहस्य सम्बन्धिनैमित्तिकैः स्थपतिभिश्च यथावसरमहीनादिभिः सत्कारैर्वृथा दण्डित[2] इत्यर्थे देवः प्रमाणं। तमुदन्तं सम्यगवधार्य तदुक्तं तद्धवलगृहमूल्यं लक्षत्रयं तस्मै प्रदाय संध्यासर्वावसरानन्तरं तस्मिन्नात्मीयीकृते सौधे श्रीविक्रमः सुखं प्रसुप्तः। तामेव पतामीति गिरमाकर्ण्यासमसाहसिकतया सत्वरं पतेत्युदीरयन्समीपे पतितं सुवर्णपुरुषं प्राप। इत्थं पुरुषसिद्धिः॥ अथास्मिन्नवसरे कश्चिद्दुर्विधपुरुषः करकृतलोहमयकृशतरदरिद्रपुत्रको द्वाःस्थनिवेदितो नृपं प्राह। स्वामिन्भवता नाथेन प्रथितायामवन्त्यां सर्वाण्य-

---

१ C अथान्यदा २ A यथावसरं महादानादिभिः सत्कारैश्च वृथाहं दण्डितः

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पि वस्तूनि सत्वरमत्र विक्रयं यान्ति लभ्यन्ते चेति प्रसिद्धिं बुध्वा चतुरशीतिसंख्येषु चतुःपथेष्वहोरात्रं विक्रयाय दरिद्रपुत्रको भ्रामितोपि केनापि न गृहीतः। प्रत्युताहं निर्भर्त्सित इति नगर्या यथावस्थितं कलङ्कं महाराज्ञे विज्ञप्य यथागतं व्रजामीत्याप्टच्छन्नस्मि। तदैव तं महान्तं कलङ्कपङ्कं पुर्याः पर्यालोच्य दीनारलक्षं तस्मै प्रदाय नृपस्तं लोहपुत्रकं कोशे निवेशयामास। तस्यामेव निशि प्रथमयामे सुखसुप्तस्य राज्ञः समीपे राज्याधिष्ठातृदैवतं द्वितीययामे हयाधिष्ठातृदैवतं तृतीययामे लक्ष्मीश्चाविर्भूय महाराज्ञा दारिद्र्यपुत्रके क्रीते नास्माकमिहावस्थातुमुचितमित्याप्टच्छ्य राज्ञः साहसभङ्गो माभूदित्यनुज्ञातानि तानि जग्मुः। चतुर्थयामेत्र कश्चिदुदारपुरुषो दिव्यतेजोमयमूर्त्तिः प्रादुर्भूयाहं सत्त्वनामा भवन्तमाभवं श्रितो गन्तुमाप्टच्छे इत्युदिते करतलेन नृपः कृपाणिकामाद्राय यावदात्मघाताय व्यक्स्पति तावत्तेनैव करे गृहीत्वा तुष्टोस्मीत्यभिधाय स्खलितः। गजाद्यधिष्ठातॄणि त्रीणि दैवतानि प्रत्यावृत्य नृपं प्रोचुः। गमनसंकेतव्याघातिना सत्त्वेन विप्रलब्धानां नृपं विहाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नास्माकं गमनमुचितमिति तान्यप्ययत्नं तस्थुः। अथान्यस्मिन्नवसरे सभास्थितं श्रीविक्रमं सामुद्रिकशास्त्रवेदी कश्चिद्दैवज्ञको द्वाःस्थनिवेदितः प्रविश्य नृपलक्षणानि निरीक्ष्यमाणः शिरोधूननपरो नृपेण स विषादकारणं पृष्ट ऊचे। यत्त्वां सर्वोपलक्षणनिधिमपि षण्णवतिदेशसाम्राज्यलक्ष्मीं भुञ्जानमवेक्ष्य सामुद्रिकशास्त्रे निर्वेदपरोऽभवं। तत्किमपि कर्बुरान्तं न पश्यामि यत्प्रभावेण त्वमपि राज्यं करोषि। तद्वाक्यानन्तरं कृपाणिकामादाय यावदुदरे निधत्ते तावत्तेन किमेतदिति पृष्टः श्रीविक्रमः प्राह। उदरं विदार्य तव तद्विधमन्तं दर्शयिष्यामीति वदन्द्वात्रिंशतोधिकमिदं सत्त्वलक्षणं तव नोवगतमिति पारितोषिकदानपूर्वकं नृपस्तं विससर्ज॥ अथ कस्मिंश्चिदवसरे परपुरप्रवेशाविद्यया निराकृताः सर्वा अपि विफलाः कला इति निशम्य तदधिगमाय श्रीपर्वते भैरवानन्दयोगिनः समीपे श्रीविक्रमस्तं चिरमाराधं। तत्पूर्वसेवकेन केनापि द्विजातिना राज्ञोग्रे इति कथितं। यत्त्वया मां विहाय परपुरप्रवेशविद्या गुरोर्नादेया। इत्यु-

१ A B पुरप्रवेशविधया २ C E चिरमाराध्य तत्

परुद्धो नृपो विद्यादानोद्यतं गुरुं विज्ञपयामास। यत्प्रथममस्मै द्विजाय विद्यां देहि पश्चान्मह्यं हे राजन्नयं विद्यायाः सर्वथाऽनर्ह इति गुरुणोदिते भूयोभूयस्तव पश्चान्नृपो भविष्यतीत्युपादिश्य नृपोपरोधात्तेन विप्राय विद्या प्रदत्ता। ततः प्रत्यावृतौ द्वावप्युज्जयिनीं प्राप्य पट्टहस्तिविपत्तिविषण्णं राजलोकमालोक्य परपुरप्रवेशविद्यानुभवनिमित्तं च राजा निजगजशरीरे आत्मानं न्यवेशयत्॥

तद्यथा॥

भूपः प्राहरिके द्विजे निजगजस्याङ्गेऽविशद्विद्यया
विप्रो भूपवपुर्विवेश नृपतिः क्रीडाशुकोऽभूत्ततः।
पल्लीगात्रनिवेशितात्मनि नृपे व्यामृश्य देव्या मृतिं
विप्रः कीरमजीवयन्निजतनुं श्रीक्रमो लब्धवान्॥१॥

॥ इत्थं विक्रमार्कस्य परपुरप्रवेशविद्या सिद्धा॥

अथास्मिन्नवसरे श्रीविक्रमो राजपाटिकायां व्रजंस्तन्नगरनिवासिना श्रीसङ्घेनानुगम्यमानं बन्दिपुत्रैः श्रीसर्वज्ञपुत्र इति स्तूयमानं श्रीसिद्धसेनाचार्यमागच्छन्तमवलोक्य सर्वज्ञपुत्र इति वचसा कुपितः। तत्सर्वज्ञतापरीक्षार्थं तस्मै मानसं नमस्कारमकरोत्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आस्ते दर्शनमागते दशशतीं संभाषिते चायुतं
यद्वाचा च हसेदमाशु भवता लक्षोऽस्य विश्राण्यताम्।
निष्काणां परितोषके मम सदा कोटीर्ममदाज्ञा परा
कोशाधीश सदेति विक्रमनृपश्चक्रे वदान्यस्थितिम् १

सिद्धसेनेनापि पूर्वेषतबलेन नृपभावमवगम्य दक्षिणपाणिमुदस्य धर्मलाभाशिषं ददौ। नृपतिनाशीर्वादहेतुं पृष्टः सन्महर्षिस्तव मानसनमस्कारस्याशिर्वादः प्रदीयमानोस्तीत्यभिहिते तज्ज्ञानचमत्कृतेन राज्ञा तत्यारितोषिके सुवर्णकोटिर्व्यतीर्यत ॥ अथान्यस्मिन्नवसरे राज्ञा कोशाध्यक्षस्तस्मै दापितसुवर्णवृत्तान्तं पृष्टः प्राह। यद्धर्मवाहिकायां श्लोकबन्धेन मया सुवर्णदानं निहितं ॥

तथाहि ॥

धर्मलाभ इति प्रोक्ते दूरादुच्छ्रितपाणये ॥
सूरये सिद्धसेनाय ददौ कोटिं नराधिपः ॥ १ ॥

ततः श्रीसिद्धसेनसूरीन्सभायामाकार्य तत्सुवर्णं गृह्यतामिति प्रोक्ते वृथा तृप्तस्य भोजनमित्युच्चारपुरःसरमनेन सुवर्णेन ऋणग्रस्तामवनीमनृणीं कुरु। इत्युपदिष्टे तत्सन्तोषपरितुष्टेन राज्ञा तदङ्गीकृतं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिदृक्षुर्भिक्षुरायातस्तिष्ठति द्वारि वारितः ।
हस्तन्यस्तचतुःश्लोको यद्वागच्छतु गच्छतु ॥ १ ॥
दीयतां दशलक्षाणि शासनानि चतुर्दश ।
हस्तन्यस्तचतुःश्लोको यद्वागच्छतु गच्छतु ॥ २ ॥
सर्वदा सर्वदोसीति मिथ्या संस्तूयसे बुधैः ।
नारयो लेभिरे पृष्ठिं न वक्षः परयोषितः ॥ ३ ॥
सरस्वती स्थिता वक्त्रे लक्ष्मीः करसरोरुहे ।
कीर्तिः किं कुपिता राजन् येन देशान्तरं गता ॥४॥
अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः ।
मार्गणौघः समभ्येति गुणो याति दिगन्तरम् ॥५॥
आहते तव निःस्वाने स्फुटितं रिपुहृद्घटैः ।
गलिते तत्प्रयानेत्रे राजंश्चित्रमिदं महत् ॥ ६ ॥
वक्त्राम्भोजे सरस्वत्यधिवसति सदा शोण एवाधरस्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः।
वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्त्य-
भीक्ष्णं
स्वच्छेन्तर्मानसेऽस्मिन्कथमवनिपते तेम्बुपानाभि-
लाषः ॥ १ ॥

अष्टौ०[1] ॥ २ ॥

---

१ अयमग्रे संपूर्णोस्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उरुयन्तरवाहलयीथणपव्वयरोमरायवणगहणे[1] ।
सुरनरगणगन्धव्वा नग्गवीआ मयणचोरेण ॥३॥*

तस्यामेव निशि नृपो वीरचर्यायां पुरि भ्रमन्
भूयो भूयस्तैलिक मुखेन पठयमानमिदमश्रौषीत्।

१ उर्वोःसक्थ्योरन्तरे वाहली लघुश्रोतः स्त्रीपक्षे पर्वतपक्षे तु महान्तो जघनश्च प्रवाहाः स्तनपर्वतरोमराजिवनगहने सुरनरगण-गन्धर्वा नग्नीकृता मदनचौरेण

* महावीरमोक्षात् १७० वर्षेषु गतेषु भद्रबाहुः स्वर्गं गतश्चिरञ्जीवस्य स्थूलभद्रस्य सर्वायुः ९९ वीरात् २१५ वर्षेषु मृतस्तत्पट्टे आर्यमहागिरिः सर्वायुर्वर्षाणि ८५ एवं श्रीवीरात् ३०५ वर्षे सम्प्रती राजा स्थूलिभद्रस्यार्यमहागिरेः १ आर्यसुहस्ती २ शिष्यौ सुहस्तिसमीपे कश्चिद्रङ्कः पिण्डार्थं मुण्डितोनिभृक्षणेन मृतः स चो-ज्जयिन्यां श्रेणिकराज्यपट्टे-कोणिकः यस्यापरं नामाशोकचन्द्र स्तत्पट्टे उदायी स षष्ठवार्षिकः पौषधस्थस्तं बलेन हत्वा नन्दो राजा ततो नापितगणिकापुत्रं नवमनन्दं चाणाक्यो हत्वा मौर्यवंशं चन्द्रगुप्तं राज्येऽस्थापयत् । ततो बिन्दुसारस्तत्प ट्टेऽशोकश्रीस्तत्पुत्रः कुणालस्तत्पुत्रो राजा सम्प्रतिनामा स रङ्कजीवो ज्ञातः वीरात् ३०५ वर्षे प्राप्तराज्यः । सुहस्तिना प्रतिबोधितः। स आर्यसुहस्ती शतवर्षं सर्वायुः प्रतिपाल्य वीरात् २९१ वर्षे स्वर्गतः। अवन्तीसुकुमालोपि सुहस्तिनैव प्रबोधितः पूर्वं तत्सु-तेनैव कुडगेश्वरः शिवः पितुर्मरणस्थाने स्थापितस्तस्यैव महाकाल इति नामान्तरं । सुहस्तिसूरेर्वाशिष्ठगोत्रस्य द्वादशशिष्यान्तर्गत शिष्यौ सुस्थितसुप्रतिबुद्धनामानौ व्याघ्रापत्यगौत्रौ कोटिककाक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अम्माणिओ सन्देसडओ तारय कन्ह काहिज[1]।

प्रभातशेषां रजनीमवधीकृत्य तदुत्तरार्द्धमशृण्वन्निर्विण्णो नृपः सौधं प्राप्य निद्रामकरोत्। प्रत्यूषकालेऽवसरकृत्यानन्तरं नृपेण तत्राहूतस्तौलिकस्तदुत्तरार्द्धं पृष्टः।

जग दालिद्दिहि डुव्विउं[2] बलिबन्ध ण ह मुइज्ज ॥*

श्रीसिद्धसेनोपदेशं पुनरुक्तं निर्णीय पृथिवीमनृणां कर्त्तुमारेभे ॥

न्दिकाविरुदौ तत्र सुस्थिताचार्यशिष्यौ कुलकौ सन्तावदृश्यविद्यया चन्द्रगुप्तनृपतिना समं बुबुजतुः पाटलीपुत्रनगरे। तदुत्पत्तिस्तु यथा ॥

प्रतिदिशं विलोक्यन्ते विहारास्त्वारुसौगताः।
यत्रारुह्यैव निर्वाणं प्रापुस्तेऽपि महर्षयः ॥ १ ॥

उपत्यकायामस्याद्रेर्भाति (वैभारगिरेः) राजगृहं पुरम्।
क्षितिप्रतिष्ठचम्पकपुरषंजपुराभिधम् ॥ २ ॥

कुशाग्रपुरसंज्ञं च क्रमाद्राजगृहाह्वयम्।
सहस्राः किल पंचविंशत्यावासन्वणिजां गृहाः ॥ ३ ॥

तत्र चार्द्धाः सौगतानां मध्ये चार्हतपंक्तिसाम्।

---

१ अस्माकं सन्देशकं तारकं कृष्णं कथय कथयेः!

२ A G दालिद्दिहि दुत्थिउ D दालिद्दिहिं दुच्चिउं * जगद्दारिद्र्येण ब्रूडितं बलिबन्धो न च मोचितः ॥ तारयति दारिद्र्यदुःखसमुद्रादिति तारकः कृष्णः। कर्षति दुःखमिति कृष्णः कथं त्वं कथयसे इति भावः।!

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ मत्सदृशः कोपि जैनो नृपतिर्भावीति पृष्टे श्रीसिद्धसेनसूरिभिरभिदधे ॥

पुन्ने[1] वाससहस्से सयम्मि वरिसाण नवनवइअहिए।
होही कुमरनरिन्दो तुह विक्कमराय सारित्थो* ॥१॥

अथान्यस्मिन्नवसरे जगत्पनृणीक्रियमाणे निजौदार्यगुणेनाहंकृतिं दधानः प्रातः कीर्त्तिस्तम्भं कारयिष्यामीति चिन्तयंस्तस्मिन्नेव निशीथे वीरचर्यया चतुःपथान्तः परिभ्रमन् युद्ध्यमानवृषाभ्यां

यत्र श्रीमान्जरासन्धः श्रेणिकः कोणिकोभयः ॥ ४ ॥
मेघहल्लविहल्लश्रीनन्दिषेणादयोजवन् ॥

श्रेणिकसुतोऽशोकचन्द्रः कूणिकापराख्यः पितुः शोकाद्राजगृहं विहाय कौशाम्ब्याः परिसरे नवीनां चम्पां राजधानीमकरोत्। अत्रैव शय्यम्भवसूरिमनकशिष्यार्थं दशवैकालिकं महावीरात् ९८ वर्षे कृतवान्। नवीनचम्पायां श्रेणिकपुत्रे कोणिके मृते तत्पुत्र उदायी राजा जातः सोपि पितुः शोकेन नूतनस्थानगवेषणार्थं सेवकान्प्रेषयामास ते गङ्गातटं ययुः। तत्रानमितच्छायं पाटलीतरुं प्रेक्ष्य तत्कारणं पृष्टः कोपि महामुनिरवदत्। अम्बिकापुत्रो जयसिंहाचार्यपार्श्वे दीक्षां गृहीत्वाऽम्बिकापुत्राचार्यनाम्ना विहरन्गङ्गातटस्थं पुष्पभद्रपुरं प्राप। तत्र पुष्पकेतुर्नृपः पुष्पवती राज्ञी तयोः पुत्रः पुष्पचूलः पुत्री पुष्पचूला तयोर्गाढानुरागात्परस्परं विरहो मानू-

---

१ B पुण्णे * पूर्णे वर्षसहस्रे शते वर्षाणां नवनवत्यधिके भाविष्यति कुमारपालनरेन्द्रस्तव हे विक्रमराजन् सदृशः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रासितः कस्यापि दारिद्र्योपद्रुताद्विजन्मनो जीर्णवृषभकुटीस्तम्भमध्यारूढो यावत्तिष्ठति तावत्तावेव वृषौ शृङ्गाग्रेण तं स्तम्भं भूयो भूयस्ताडयतः। अत्रान्तरे स विप्रोकस्मान्निद्राभङ्गमासाद्याकाशे शुक्रगुरुभ्यां निरुद्धं चन्द्रमण्डलमवलोक्य गृहिणीमुत्थाप्य चन्द्रमण्डलसूचितं तन्नृपतेः प्राणसङ्कटमवगम्य होतव्यद्रव्याणि तदुपशान्तये होमार्थमुपढौकेयेति सावधानं नृपे शृण्वति स गृहिण्योचे। अयं नृपः पृथिवीमनृणां कुर्वन्मम कन्यासप्तकस्य विवाहाय

दिति राज्ञा भ्रातृभगिन्योः परस्परं विवाहः कृतस्ततो वैराग्येण राज्यान्निकापुत्राचार्यपार्श्वे दीक्षा गृहीता कालेन केवलिनी जाता। तन्मरणानन्तरं तस्याः करोटिका गङ्गायां वहमाना दैवाद्बहिर्निर्गता क्वचित्स्थाने। तत्र कालेन पाटलीतरुर्जातस्ततः सेवकैर्योग्यं स्थानं बालराज्ञे निवेदितं। तेन राज्ञा पाटलीपुत्रनामकं तत्र नगरं निवेशितं। ततो नन्दराजा तदा शकटालमन्त्रिपुत्रः स्थूलिभद्रः। राज्ञः पण्डितो वररुचिः। आर्यमहागिरिः आर्यसुहस्ती द्वौ भ्रातरौ स्थूलिभद्रस्य शिष्यौ तत्राद्यो जिनकल्पिकोऽन्यः सूरिपदे। तदुक्तं।

* वन्दे अज्जसुहत्थिं मुणिपवरं जेण सम्पई राया।
रिद्धिं सव्वपसिद्धिं चारित्तं पाविउं पवरं ॥ १ ॥
[* वन्दे आर्यसुहस्तिसूरिं मुनिप्रवरं येन सम्प्रती राजा
ऋद्धिं सर्वप्रसिद्धिं चारित्रं प्रापितः प्रवरम् ॥ १ ॥]

सुहस्तिशिष्येष्वेकः साधुर्वृद्धत्वेऽकाले उच्चैस्वरं पठति यदा तदा राज्ञोक्तं 'किं मुशले पुष्फाणि उप्पज्जइ'। ततस्तदपमानात्तेन वाग्दे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यमयच्छत्रशान्तिकर्मणा कथं व्यसनान्मोचयितुमुचित इति तद्वचसा सर्वथा परिहृतगर्वस्तत्सङ्कटाच्छुष्टितः कीर्त्तिस्तम्भं विस्मन् राज्यं चिरं चकार॥

कटुं काउं मुक्कं च साहसं मइलिअं च अप्पाणं।
अजरामरं न पत्तं हा विक्कम हारिओ जम्मो[1] ॥१॥

कदाचिदायुःप्रान्ते केनाप्यायुर्वेदविदा श्रीविक्रमस्य वपुरपाटवे वायसपिशिताहारेण रोगशान्तिर्भवतीत्युपदिष्टे नृपेण तस्मिन्याके कार्यमाणे प्रकृतिव्यत्ययं विमृश्य नृप इति ज्ञापितः। साम्प्र-

---

वीमाराध्य सकला विद्याः संप्राप्य चतुःपथे मुशलं मण्डयित्वा फुल्लवितं च चमकृताः सर्वे। नृपः काव्यमिदं पपाठ।

मद्रोः शृङ्गं शक्रयष्टिप्रमाणं
शीतो वन्हिर्मारुतो निःप्रकम्पः।
योयं ब्रूते सर्वथा तन्न किञ्चि-
द्वृद्धोवादी किं क्रियाहात्र वादी ॥ १ ॥

ततः प्रसिद्धेन वृद्धवादिसूरिणा जितः सिद्धसेनदिवाकरो विप्रः। तत्संबन्धश्चायम्।

श्वेताम्बराचार्येण चारणमुनिना वज्रसेनेन शक्रावतारतीर्थे नाभेयः स्थापितस्तत्र पूर्वज्ञाटदेशमण्डनजृम्भकच्छपुराजङ्कारे शकुनि-

---

१ काउं। उपमानजूतमिति देशी० कष्टं मुक्तं साहसं च निस्तेजस्विनमात्मानं कृत्वा। अजरामरत्वं न प्राप्तं। हे विक्रम हा जन्म हारितम्!

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं धर्मौषधमेव बलवत्। प्रकृतेर्विकृतिरुत्पातः। जीवितलोलुपतया लोकोत्तरां सत्वप्रकृतिमपहाय काकमांसमभिलषन्सर्वथा न जीवसीति वैद्येनाभिहितस्तं पारितोषिकदानपूर्वं परमार्थबान्धवमिति श्लाघमानो गजतुरगकोशादिसर्वस्वमर्थिभ्यो वितीर्य राजलोकं नगरलोकमापृच्छय विजने क्वापि धवलगृहप्रदेशे तत्कालोचितम्लानदानदेवार्चनपूर्वं दर्भस्तरस्तराधिरूढो ब्रह्मद्वारेण प्राणोत्क्रान्तिं करिष्यामीति विमृशन्नकस्मादाविर्भूतमप्सरोगणं स ददर्श।

काविहारे स्थिताः श्रीवृद्धवादिसूरयः। तत्र येन जीयते तस्याहं शिष्यो भविष्यामीति कृतप्रतिज्ञं महाविद्याहंकारिणं दक्षिणपथायातं कर्णाटभट्टं दिवाकरनामानं युक्त्या वादे निर्जित्य शिष्यं चक्रुः। तेनैकदा सकले जैनसिद्धान्ते संस्कृते करोमीति पृष्टो गुरुराह। त्वया तीर्थकरवचनाशातना कृता। ततस्तत्पापप्रायश्चित्तग्रहणाग्रहे द्वादशवर्षकृतयात्रान्ते कस्मिन्महानृपो बोधितव्य इति गुरुवाक्यमङ्गीकृत्य द्वादशवर्षान्ते विक्रमराजप्रतिबोधार्थमुज्जयिन्यां कालाग्निरुद्रकुडगेश्वरदेवालये शिवसन्मुख पादौ धृत्वा तेन सुप्तं। सेवकैस्ताडितस्तत्ताडनमन्तःपुरे राज्ञीषु जातं। ततो महति कोलाहले तच्छ्रुतवृत्तान्तेन चमत्कृतेन विक्रमेण सविनयं पृष्टो मुनिराह। यदि मया नमस्कारः क्रियते तदैतल्लिङ्गं द्विधा भविष्यति। ततो राजाज्ञया नमस्कारस्तुतिः समारब्धा द्वात्रिंशद्वात्रिंशकाद्यकाव्ये पठिते तल्लिङ्गं द्विधाभूत्। प्रथमं धूमस्ततस्तेजस्ततो नाजिसूनुर्निरगात्। विक्रमः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अञ्जलिं बध्वा प्रणामपूर्वं का यूयमिति पृष्टे । न वाग्विस्तरार्होऽयमवसरः। आपृच्छनायैव वयमुपागता इत्यभिधायाप्सरसोऽपसरन्त्यो नृपेण भूयोभिदधिरे । नवीनब्रह्मणा निर्मितानां भवतीनामद्वैतरूपवतीनामेव रूपं नासया हीनमिति जिज्ञासुरस्मि । अथ ताः सहस्ततालं विहस्य निजमपराधमस्मासु संभावयसीति ता मौनमाश्रिता नृपेणोचिरे । स्वर्गलोकस्थितासु भवतीषु ममापराधः कथं संभाव्यत इति नृपवचःप्रान्ते तासु मुख्यया सुमुख्ययाचचक्षे । राजन्प्राग्पुण्योदयेन साम्प्रतं नवा-

---

सपरिवारः शिष्योऽभूत् ॥ तदुक्तम् ॥

श्वेतोढरागाञ्चितसिद्धसेन-
दिवाकराचार्यकृतप्रतिष्ठः ।
श्रीमान्कुडङ्गेश्वरनाभिसूनु-
र्देवः शिवायास्तु जिनेश्वरो वः ॥ १ ॥

ग्रामाणां लेखं । शासनपट्टिकां । श्रीमदुज्जयिन्यां संवत् १ चैत्रसुदि १ गुरौ माढदेशीयमहाकुपाखिकपरमार्हतश्वेताम्बरोपासकब्राह्मणौत्तमसुतकात्यायनेन राजालेखयत् । शत्रुञ्जयोद्धारमनूनां पृथ्वीं सूरिवचसा कृत्वा निजं संवत्सरं प्रावर्त्तयत् । पूर्वं पार्श्वनाथसंवत्सरानन्तरं वर्द्धमानसंवत्सरोऽभूत्तद्देशे । श्वेताम्बरमते महावीरात् ४७० वर्षे विक्रमो राजा । दिगम्बरमते तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पि निधयस्तव सौधेऽवतेरुस्तदधिष्ठाऽयो वयं। भवता देवतारूपेणाजन्मावधि महादानानि ददतैकस्यैव निधेरेतावदेव व्यवकलितं यावत्त्वं नासाग्रं न पश्यासि। इत्थं तदुक्तिमाकर्ण्य ललाटं करतलेन स्पृशन् यद्यहं नवनिधीन्वेद्मि तदा नवभ्यः पुरुषेभ्यस्तान्समर्पयामीति दैवेनाज्ञानभावाद्वञ्चित इत्युच्चरंस्ताभिः कलौ भवानेवोदार इति प्रतिबोधितः परलोकमाप। ततः प्रभृति तस्य विक्रमादित्यस्य जगत्ययमधुनापि संवत्सरः प्रवर्त्तते। श्रीविक्रमार्कस्य दाने विविधाः प्रबन्धाः॥

---

§ वरिसाणि सयच्छकतिगसी गदा य जिणन्दवीरस्स।
णिव्वाणं सम्पत्ते उत्तवण्णो विक्कमो राऽ॥ १॥

[§ निर्वाणं प्राप्तस्य जिनेन्द्रवीरस्य त्र्यशीत्यधिकषट्शतानि वर्षाणि गतानि तदा विक्रम उत्पन्नो राजा॥ १॥

तथाच कदाचित्कारणवशाल्लब्ध्या सैन्यविकुर्वणेन राज्ञा दत्तं सिद्धसेनाविरुदं प्राप्य सिद्धसेनदिवाकर इति नाम्ना प्रसिद्धोऽभूत्।

* पञ्चेव य वरिससये सिद्धसेनो य जयपयडो॥

[* महावीरात्पञ्चशते एव वर्षशते जयप्रकटः सिद्धसेनोऽभूत्। बप्पभट्टसूरिगुरुः सिद्धसेनोन्यः स तु विक्रमस्य सप्तमशते संवत्सरेऽभूत्। नेमिचन्द्रसूरिकृतप्रवचनसारोद्धारस्य टीकाकर्त्ता सिद्धसेनोप्यन्यः स तु विक्रमस्य द्वादशशते संवत्सरेऽभूत्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथ शालिवाहनप्रबन्धः ॥

अथ दाने विद्वत्तायां च श्रीसातवाहनकथा* यथाश्रुता ज्ञेया। तत्पूर्वभवकथा चैवं। श्रीप्रतिष्ठानपुरे शातवाहनभूपो राजपाटिकायां गच्छन्नगरप्रत्यासन्ननद्या वीचिभिर्नीरतीरक्षिप्तं मत्स्यमेकं हसन्तमालोक्य प्रकृतेर्विकृतिरुत्पात इति भयभ्रान्तो नृपः सर्वानेव विदग्धपुरुषान्सन्देहमसुं पृच्छञ्ज्ञानसागरनामानं जैनमुनिं पप्रच्छ। ज्ञानातिशयेन तेन तत्पूर्वभवं विज्ञायेत्युपदिष्टं। यत्पुरातनभवे त्वमस्मिन्नेव पत्तने उच्छिन्नवंशः काष्टभारवाहनैकवृत्तिस्तस्यामेव नद्यां भोजनावसरे संनिहितशिलातले सक्तून्पयसालोडय नित्यमश्नासि। कस्मिन्नप्यहनि जैनमुनिं मासोपवासपारणाहेतोः पुरो व्रजन्तमाहूय तं सक्तुपिण्डं तस्मै प्रादात्। तस्य पात्रदानस्यातिशयात्त्वं शालवाहननृपतिरासीः। स मुनिर्देवो जातस्तद्देवताधिष्ठानवशात्तं का-

---

* शालिवाहन, शालवाहन, सालवाहण, साजवाहन, साळाहण सातवाहन, हालेत्येकस्य नामानि ॥ तत्कथालेशो यथा ॥

दक्षिणखण्डे महाराष्ट्रे प्रतिष्ठानं नाम पुरं। तत्रैं कदा द्वौ प्रदेशिनावेकातिरूपवती भगिनी ते कुत्रापि गन्तुकामाः कुम्भकारशा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्टभारवाहिनो जोवं त्वां नृपतितयोपलक्ष्य प्रमोदाद्धसितवान् ॥

तत्कथासंग्रहश्चैवं ॥

मीनाननं प्रहसिते भयभीतमाह
श्रीशातवाहनमृषिर्भवतात्र नद्याम् ।
यत्सक्तुभिर्मुनिरकार्यत पारणं प्राक्
दैवाद्भवन्तमुपलक्ष्य झषो जहास ॥ १ ॥

स श्रीशातवाहनः पूर्वभववृत्तान्तं जातिस्मृत्या साक्षात्कृत्य ततः प्रभृति दानधर्ममाराधयन् सर्वे-

---

लायां निवासं चक्रुः । सुरूपा जलाहरणार्थं गोदावर्यां नागह्रदे गता । तद्रूपमोहितो नागपुरुषो बलात्तां बुभुजे । सातिदुःखे स्मरणीयोहं तव दुःखं निर्मूलयुन्मूलयिष्यामीति कृतप्रतिज्ञो नागपुरुषो गतः । तस्या गर्भस्वरूपं ज्ञात्वा तौ भ्रातरौ तां निर्भर्त्स्य कुम्भाकारशालायां तां त्यक्त्वा देशान्तरे निर्गतौ । सापि कुम्भकारगृहे सेवां कुर्वती काले पुत्रं सुषुवे । देवानुभावात्स बालो महातेजस्वी प्रतापी जातः । मृन्मयानि हस्त्यश्वरथपुरुषादिक्रीडनकानि बहूनि चकार । सबालः सातवाहननामासीत् । इतश्च ॥

रयणसीहरायाउ भोयणनामिआ धुआ तीसा नागज्जुणो नाम जाओ । सो सिद्धपुरिमुत्ति विकखाउं पुहवि विअरन्तो सालाहणरन्नो कलागुरू जाउं । सो पायलित्तायरिए हि सेवइ । कयावि गुरुमुखाउ सुणउ । जहा हि सिरिपासनाहबिम्बं रससाहणत्थे । तउं कन्तिपुराउं नाऊण नागज्जुणो सिद्धरसा सेढीनईतडे ठाविसु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षां महाकवीनां विदुषां च संग्रहपरः। चतसृभिः स्वर्णकोटीभिर्गाथाचतुष्टयं क्रीत्वा सप्तशतीगाथाप्रमाणं शालिवाहनाभिधानं संग्रहगाथाकोशं शास्त्रं निर्माप्य नानावदातनिधिः सुचिरं राज्यं चकार। तद्गाथाचष्टयमेतद्यथा ॥

हारो वेणीदण्डो खट्टुग्गलियाइ तह य तालुत्ति।
एयाइ नवरि सालाहणेण दहकोडिगहियाइ ॥१॥*

तत्थ सिरिसालिवाहणरन्नो चन्दलेहाभिहाणसई दोण्हं निअपुत्ताणं ताए निवेइयं। ते रसजुद्धा निअं रज्जं मुत्तुं नागज्जुणपासमाया। तउ रससिद्धिं नाऊण तेणेव सत्थेण नागज्जुणो निहउ। तत्थ थम्भणं नाम नयरं।

[रत्नसिंहराज्ञो भोपलनाम्नी सुता तस्या नागार्जुनो नाम पुत्रः। स सिद्धपुरुष इति विख्यातः पृथिवीं विचरन् सालिवाहनराजः कलागुरुर्जातः। स पादलिप्ताचार्यं निषेवते। कदापि गुरुमुखात् श्रुतं। यथा हि पार्श्वनाथबिम्बं रससाधनार्थं। ततो नागार्जुनो तदभिप्रायं ज्ञात्वा कान्तिपुरात्कपटेनसेडीनदीतटे समानीय तद्बिम्बं स्थापयित्वा रससिद्धो जातः। तत्र श्रीशालिवाहनराज्ञश्चन्द्रलेखाभिधाना सती द्वयं निजपुत्रस्य तस्मै नागार्जुनाय द्वाभ्यां शिक्षार्थं निवेदितं। तौ रसजुब्धौ निजं राज्यं मुक्त्वा नागार्जुनपार्श्वे आयातौ। ततो रससिद्धिं ज्ञात्वा तेनैव शस्त्रेण ताभ्यां नागार्जुनो निहतः।

---

* यत्र गाथायां हारवर्णनं वेणीदण्डवर्णनं। उक्तोद्दीपनतुल्यत्ववर्णनं तथा च तालाहलौपम्यमन्योक्त्या। नवरं शालिवाहनेनैताश्चतस्रो गाथा दशकोटिभिर्गृहीताः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मग्गं चिय अलहन्तो हारो पीणुन्नयाण थणयाण ।
उव्विम्बो भमइ उरे जउणानइफेणपुञ्ज व ॥२॥
कसिणुज्जलो य रेहइ वेणीदण्डो नियम्बबिम्बम्मि ।
तह सुन्दरि सुरयमहानिहाणरक्खाभुयङ्ग व ॥३॥

तस्मिन्स्थाने स्तम्भनं नाम नगरं जातम् ॥

कालियकालकान्वयपालित्तगणहरो वएसार्ड ।
नागज्जुणजोगिन्दो आणेहि अप्पणे ठाणे ॥ १ ॥

[कालिककालकाचार्यवंशजातपादलिप्तगणधरोपदेशा-
न्नागार्जुनयोगींद्र आनिनाय आत्मनः स्थाने । कान्तिपुरात्कपटवृत्त्या
रत्नमयपार्श्वनाथबिम्बम्]

॥ पादलिप्तोपि पाटलीपुत्रस्थमुरुण्डराजमस्तकपीडां मन्त्रशक्त्या
निवार्य प्रतिष्ठानपुरं प्राप्तस्तद्यथा ॥

जह जह पएसिणिं जाणुउम्मि पालित्तउं भमाडेइ ।
तह तह से सिरवियणा पणस्सइ मुरुण्डरायस्स ॥ १ ॥

कोपि साभिलाषः कस्याश्चित्स्तीनोन्नतपरोधरायाः हारं वर्णयति ॥ मग्गं चियेति । मार्गमेवालभमानो हारः पीनोन्नतयोः स्तनयोरुद्विग्नो भ्रमत्युरसि यमुनानदीफेनपुञ्ज इव । अत्र यमुनाफेनसादृश्येन स्तनमुखश्यामता व्यज्यते । तथा च सत्याधाने ऽनुपभोग्यतेत्यादिस्वयमूहनीयम् ॥ २ ॥ !

कृष्णोज्ज्वलश्च राजते वेणीदण्डो नितम्बबिम्बे तदा हे सुन्दरि सुरतमहानिधानरक्षाभुजङ्ग इव ॥ ३ ॥ !

B C मग्गुं । पीणुण्णआण थणआण । जाव्विग्गो । पुञ्जो व A उव्विम्भो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिओससुन्दराइं सुरए जायन्ति जाइ सुक्खाइं ।
विरहाओ ताइ पियसहि खट्टुग्गलियाइ कीरन्ति ४

[यथा यथा प्रदेशिनी जानौ पादलिप्तो भ्रामयति ।
तथा तथा तस्य शिरोवेदना प्रणश्यति मुरुण्डराजस्य ॥ १ ॥]
शालिवाहनपुरःसरा नृपा-
श्चित्रकारिचरिता इहाभवन्[1] ।
दैवनैर्बहुविधैराधिष्ठिते
चान्नलत्रसदनान्यनेकशः ॥ १ ॥
कपिलात्रेयबृहस्पतिपञ्चालोहं[2] महीभृदुपरोधात्[3] ।
न्यस्तस्वचतुर्लक्षग्रन्थार्थं श्लोकमेकमग्रथमम् ॥ २ ॥
स चायम् ।
जीर्णे भोजनमात्रेयः कपिलः प्राणिनां दया ।
बृहस्पतिरविश्वासः पञ्चालः स्त्रीषु मार्दवम् ॥ ३ ॥
[१ प्रतिष्ठानपुरे २ कामशास्त्रकर्त्ता बाभ्रव्यः ३ शालिवाहनराज्ञ आग्रहात्] ते चत्वारोपि स्वस्वग्रन्थं राज्ञेऽदर्शयंस्तच्छ्रोतुमसमर्थं राजानं श्लोकैकपादेन स्वस्वसकलग्रन्थाभिप्रायं निवेदयामासुः

परितोषसुन्दराणि सुरते जायन्ते यानि सौख्यानि विरहात्तानि हे प्रियसखि खट्टशब्दो जुक्तार्थवाची देशी० जुक्तोद्गीर्णानि सन्ति क्रीयन्ते क्रूयन्ते ॥ ४ ॥ !

B परितोससुन्दराइ G D सुरएसु लहन्ति जाइ सोक्खाइं लाहश्चिय उण विरहे B खण्डुग्गिआइ D खट्टुग्गिणिहाइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मा जाण कीर जह चञ्चुलालियं पडइ पक्कमाइन्दं।
जरढत्तणदुल्ललियं उज्जुयतालाहलं एयं ॥ ५ ॥
ताण पुरोयमरीढं कयलीथम्भाण सरिसपुरिसाण।
जे अत्तणो विणासं फलाइं दिन्ता न चिन्तन्ति ६
जह सरसे तह सुक्के वि पायवे धरइ अणुदिणं विञ्झो।
उच्छंगवट्टियं निग्गुणंपि गरूया न छड्डन्ति ॥ ७ ॥

। इतश्चोज्जयिन्यां विक्रमादित्येन कश्चिद्दैवज्ञः पृष्टः मद्राज्यहन्तां कश्चित्पमर्थौ जूयौ तिष्ठति पुरुषः। तेनोक्तं। प्रतिष्ठानपुरे कुम्भकारगृहे तादृशो बालोस्ति। तच्छ्रुत्वा तं हन्तुं ससैन्यो विक्रमः प्रतिष्ठानपुरं प्राप्तः। सैवकैर्बलात्तन्मारणायोद्योगे कृते तया सुरूपया मात्रा नागपुरुषः स्मृतः। तेन प्राङ्नूयामृतकुम्भो दत्तः महती शक्तिः कुमाराय दत्ता तेन कुमारेणामृतसिञ्चनेन मृन्मयं सर्वं सैन्यं

मा जानातु हे कीर यथा चञ्चुलालितं पतति पक्कमाकन्दं। पक्वाम्रफलं॥ कठिणत्वापिनद्धं उद्भूतं पाठान्तरे सरलं सुजातमित्यर्थः तालाहलं देशी० शालिक्षेत्रमेतत्। पिकस्य भोगयोग्यं सुरतक्षममितिभावः॥ ५॥!

तेषां कदलीस्तम्भैः सदृशपुरुषाणां पुरोयं। अरीढमनवगणनं यतः कारणात्ते आत्मनो विनाशफलानि ददन्तः सन्तो न चिन्तयन्ति। आत्मानं विनाश्यापि परोपकारफलप्रदाः सत्पुरुषाः सन्मानयोग्या एवेति भावः॥ ६॥!

यथा सरसे तथा शुष्कोपि पादपे धरत्यनुदिनमनुरागं विन्ध्याचलः। उत्सङ्गवर्त्तिनं निर्गुणमपि गुरवो न त्यजन्ति॥ ७॥

B पडेइ पक्क. A उज्जुयतालाहलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पढमो नेहाहारो तेहिं तिसिएहिं तह कहवि गहिऊ।
पिच्छन्ति जं न अन्नं तच्चिय आजम्म मुज्झारो ८
सयलजणाणन्दयरो सुक्कस्स वि एस परिमलो जस्स।
तस्स नवसरसभावम्मि हुज्ज किं चन्दणदुमस्स ९

जीवितं तेन विक्रमसैन्यं नाशितं विक्रमोपि पलाय्य गतः। तदनुधावितस्ततो द्वयोः सन्धिर्जातः। तावतीरपर्यन्तसुत्तरापथं साधयित्वा प्रतिष्ठानपुरे राज्यं चकार। स्वकीयं संवत्सरं प्रावीवृतत्।

तत्रैकस्य द्विजस्य सूनुः खर्परः शूरकाख्यः बहुशिल्पावर्हनं तेन कृतं। तद्दृष्ट्वा राजा तं पुराध्यक्षमकरोत्। ततो गीतमोहितां देवीं मायासुरः कश्चिदहरत्। तदन्वेषणाय शूद्रकं प्राहिणोत्। सोपि सकौलेयकः कोल्लापुरस्थां महालक्ष्मीमाराध्य तमसुरमरमारयत्। देव्या दत्तं खड्गमादाय मायासुरभ्रात्रा दर्शितां महिषीमादायागतः।

प्रथमः स्नेहाधारस्तैः पुरुषैस्तथा तामिः स्त्रीभिः कथमपि केनापि कारणेन गृहीतः। यद्यस्मात्कारणादन्यं श्रेष्ठमप्यवलम्बनत्वेन न पश्यति स तामेव सा च तमेव सर्वगुणाधारत्वेन पश्यतो यत आजन्म परस्परानुरागोत्पत्तिं समारभ्य मुज्झारशब्दो देशी० गृहमध्यस्थोर्ध्वतिर्यग्बद्धदारुवाची तद्वत्तावपि स्तः ॥ ८ ॥ !

सकलजनानन्दकरः यस्य शुक्रस्यापि वीर्यस्य वा शुष्कस्य पुरुषस्य वा काणस्येत्यादिव्यञ्जना। एष परिमलः सुगन्धः संजोगश्च तस्य नवसरसभावे नवेकिं चन्दनद्रुमस्य नवेनैव ॥ ९ ॥ !

A B C मुज्जारो B D गहीउ C तहावि कहवि

कयलितरू विञ्झागिरी नेहाहारो य चन्दणदुमो य।
एयाओ नवरि सालाहणेण नवकोडिगहियाओ १०

॥ अथ शीलव्रते प्रबन्धः ॥

तद्यथा ॥

षट्त्रिंशद्ग्रामलक्षप्रमिते कन्यकुब्जे नगरे कल्याणकटके पानीयाधिकृतप्रियाभिलाषव्यतिकराद्राजा भूदेवो मालवके श्रीकद्रमहाकालमाराध्य मालवकं तस्मै देवाय दत्वा स्वयं तापसोभूदिति संक्षेपः ॥

॥ गुर्जरभुवि वढीयाराभिधानदेशे पञ्चाशरग्रामे चापोत्कटवंश्यं झोलिकासंस्थं बालकं वणनाग्नि वृक्षे निधाय तन्मातेन्धनमवचिनोति । प्रस्तावागतैर्जैनाचार्यैः श्रीशीलगुणसूरिनामभिरपरात्रेऽपि तस्य वृक्षस्य छायामप्रसरन्तीमालोक्य झोलिकास्थितस्य तस्यैव बालकस्य पुण्यप्रभावोयमिति विमृश्य जिनशासनप्रभावकोयं भा-

---

तस्मै शूद्रकाय तुष्टेन राज्ञा राज्यार्द्धं दत्तं एवं नानाविधानि राजक्षितिपालस्य चरित्राणि । व्याघ्रिणीनेन गोदावरीतीरे महालक्ष्मीप्रासादः । नरपतिर्नागह्रदे निधनं प्राप्तः ॥

कदलीतरुः । विन्ध्यगिरिः । स्नेहाधारश्च चन्दनद्रुमश्च एताश्चत्स्रो गाथा नवरं सातवाहनेन राज्ञा नवकोटिगृहीताः ॥१०॥ !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीत्याशया वृत्तिदानपूर्वं तन्मातुः पार्श्वात्स बालो जगृहे । वीरमतीगणिन्या स बालः परिपाल्यमानो गुरुभिर्दत्तवनराजाभिधानोऽष्टवार्षिको देवपूजाविनाशकारिणां मूषकाणां रक्षाधिकारे नियुक्तः । स ताँल्लाष्टैर्निघ्नन् गुरुभिर्निषिद्धोपि चतुर्थोपायसाध्यांस्तानेवं जगौ । तस्य जातके राजयोगमवधार्यार्यं महानृपतिर्भावीति निर्णीय स मातुः पुनः समर्पितो मात्रा समं कस्यामपि पल्लिभूमौ[2] स्वमातुलस्य चौरवृत्त्या वर्त्तमानस्य सर्वत्र धाटीप्रपातमकरोत् । काकरग्रामे खात्रपातनपूर्वं कस्यापि व्यवहारिणो गृहे धनं मुष्णन्दधिभाण्डे करे पतिते सत्यत्र भुक्तोहमिति विचिन्त्य तत्सर्वस्वं तत्रैव मुक्त्वा विनिर्ययौ । परस्मिन्नहनि तद्भगिन्या श्रीदेव्या निशि गुप्तवृत्त्या सहोदरवात्सल्यादाहूतः । तया भोजनवसुदानपूर्वकमुपकृतो मम पट्टाभिषेके भवत्यैव भगिन्या तिलकं विधेयमिति प्रतिपेदे ॥ अथान्यस्मिन्नवसरे चरटवृत्त्या वर्त्तमानस्य चौरैः क्वाप्यरण्यप्रदेशे रुद्धो जम्बाभिधानो वणिग्तं चौरत्रयं दृष्ट्वा बाणपञ्चकमध्याद्बाणद्वयं भञ्जंस्तैः पृष्ट[3] इति प्राह-

---

१ B G लाच्छाणेन २ A C पल्लीभूमौ B नैन पृष्टः

भवद्भितयाधिकं बाणद्वयं[1] विफलमित्युक्ते तदुक्तं बलवेध्यं[2] बाणेनाहत्य तैः परितुष्टैरात्मना सह नीतस्तद्योधविद्याचमत्कृतेन श्रीवनराजेन मम पट्टाभिषेके त्वं महामात्यो भावीत्यादिश्य विसृष्टः । अथ कन्यकुब्जादायातपञ्चकुलेन तादृशराज्ञः सुतायाः श्रीमहणिकाभिधानायाः[3] कञ्चुकसम्बन्धे पितृप्रदत्तगूर्जरदेशास्योद्ग्राहणकैहेतवे समागतेन सेल्लभृद्वनराजाभिधानश्चक्रे । षण्मासीं यावद्देशमुद्ग्राह्य चतुर्विंशतिसंख्यान् । रूप्यकद्रम्मलक्षांस्तेजोजात्यांश्चतुःसहस्रसंख्यांस्तुरङ्गमान्गृहीत्वा पुनः स्वदेशं प्रति प्रस्थितं पञ्चकुलं सौराष्ट्राभिधानघाटे वनराजो निहत्य कस्मिन्नपि वननिकुञ्जे तद्राजभयाद्वर्षं यावद्गुप्तवृत्या तस्थौ ॥ अथ निजराज्याभिषेकाय नगरनिवेशचिकीः शूरां भूमिमवलोकमानः पीपलुलातडागपाल्यां सुखनिषण्णेन भीरुयाडसाखडसुतेनाणहिल्लनाम्ना पृष्टः । किमु विलोक्यते नगरनिवेशयोग्या शूरा भूमिरवलोक्यते इति तैः प्रधानैरभिहिते यदि तस्य नगरनिवेशस्य नाम मम

---

१ B जवेत् २ A चन्नवेध्यं ३ A B महणका. A ४ उद्ग्राहणिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ददत ततस्तां भुवमावेदयामीत्यभिधाय जालिवृक्षसमीपे गत्वा यावती भूः शशकेनोच्छासिंता[1] तावतीं भुवं दर्शयामास । तत्राणहिल्लपुरनाम्ना नगरं निवेश्य संवत् ८०२ वर्षे वैशाखसुदि २ सोमे श्रीविक्रमार्कतस्तस्य जालितरोर्मूले धवलगृहं कारयित्वा राज्याभिषेकलग्ने काकरग्रामवास्तव्यां तां प्रतिपन्नभगिनीं श्रियादेवीमाहूय तया कृततिलकः श्रीवनराजो राज्याभिषेकं पञ्चाशद्वर्षदेश्यः कारयामास । सजम्बाभिधानो वणिक् महामात्यश्चक्रे । पञ्चासरग्रामतः श्रीशीलगुणसूरीन् सभक्तिकमानीय धवलगृहे निजसिंहासने निवेश्य कृतज्ञचूडामणितया सप्ताङ्गमपि राज्यं तेभ्यः समर्प्ययंस्तैर्निःस्पृहैर्भूयो निषिद्धः । प्रत्युपकारबुद्ध्या तदादेशाच्छ्रीपार्श्वनाथप्रतिमालंकृतं पञ्चासराभिधानं चैत्यं निजाराधकमूर्त्तिसमेतं च कारया-

---

१ A G नाम शशकेन श्वात्रासिता : C शशकेनोच्छाशिनाः २ अष्टसयेसु दुरुत्तरेसु विक्कमवासेसु अणहिल्लगोवालपरिरक्खियए एसो लक्खारट्ठाणे पट्टणं चउक्कडवंसमुत्ताहलेण वणरायराइणा निवेसिअं [अष्टशतेषु विक्रमवर्षेषु द्विरुत्तरेषु अणहिल्लगोपालपरिरक्षित एतत् लक्षारस्थाने पट्टनं चापोत्कटवंशमुक्ताफलेन वनराजराज्ञा निवेशितम्

मास। तथा तेन धवलगृहकण्ठे कण्ठेश्वरीप्रासादश्च कारितः।

गूर्जराणामिदं राज्यं वनराजात्प्रभृत्यपि -
जैनैस्तु स्थापितं मन्त्रैस्तद्वेषी नैव नन्दति ॥ १ ॥

पूर्वं निरुद्धं वर्ष ५९ मास २ दिन २१ श्रीवनराजेन राज्यं कृतं। श्रीवनराजस्य सर्वायुर्वर्ष १०९ मास। २ दिन २१। संवत् ८६२ वर्षे आषाढसुदि ३ गुरौ अश्विन्यां सिंहलग्ने वहमाने वनराजसुतस्य श्रीयोगराजस्य राज्याभिषेकस्तस्य त्रयः कुमाराः। अन्यस्मिन्नवसरे क्षेमराजनाम्ना कुमारेण राजेति विज्ञपयांचक्रे। देशान्तरीयस्य राज्ञः प्रवहणानि वात्यावर्त्तेन विपर्यस्तानि। अन्यवेलाकूलेभ्यः श्रीसोमेश्वरपत्तने समागतानि। ततस्तेषु तेजस्वितुरंगमसहस्रं १००० तथा गजानां सार्द्धशती संख्यया पर[1]वस्तूनि कोटिसंख्यया। एतावत्सर्वं निजदेशोपरि स्वदेशमध्ये भूत्वा संचरिष्यति। यदि स्वाम्यादिशति तदा तदानीयते इति विज्ञप्तेन राज्ञा तन्निषेधः कृतः। तदनन्तरं तैस्त्रिभिः कुमारै राज्ञो वयोवृद्धभावाद्वैकल्यमाकल्य तस्यामपि स्वदेश-

१ B सार्द्धशतसंख्यया A सिरुघटीरु० १८ अपर.

प्रान्तभूमौ सैन्यं सज्जीकृत्याज्ञातचौरवृत्या तत्सर्वमाच्छिद्य स्वपितुरुपनिन्ये । अन्तः कुपितेन मौनावलम्बिना राज्ञा न किमपि तेषां प्रतिपत्त्यादि कृतं । तत्सर्वं नृपतिसात्कृत्वा क्षेमराजकुमारेणैतत्कार्यं सुन्दरं कृतमसुन्दरं वेति विज्ञप्तो नृपतिर्बभाषे । यदि सुन्दरमुच्यते तदा परस्वलुण्टनपातकं यद्यसुन्दरमभिधीयते तदा भवदीयचेतसो विराक्तिः। अतो मौनमेव श्रेय इति सिद्धं । श्रूयतां भवदीयप्रथमप्रश्ने परवित्तापहृतौ निषेधहेतुः । यदा परमण्डलेषु नृपतयः सर्वेषामपि राज्ञां राज्यप्रशंसां कुर्वन्ति तदा गुर्जरदेशे चरटराज्यमित्युपहसन्ति । अस्मत्पुरुषैरित्यादिस्वरूपं विज्ञप्तिकया ज्ञाप्यमानाः किञ्चिन्निजपूर्वजवैमनस्यमावहन्तो दूयामहे । यद्ययं पूर्वजकलङ्कः सर्वलोकहृदये विस्मृतिमावहति तदा समस्तराजपङ्क्तिषु वयमपि राजशब्दं लभामहे । धनलवलोलुभैर्भवद्भिः स पूर्वजकलङ्क उत्सृज्य पुर्ननवीकृतः । तदनन्तरं राज्ञा शस्त्रागारान्निजं धनुरुपानीय यो भवत्सु बलवान् स इदमारोपयत्विति समादिष्टे सर्वाभिसारेण तन्नैकेनाप्यधिरोप्यत इति राज्ञा हेलयैवाधिज्यीकृत्याभिदधे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आज्ञाभङ्गो नरेन्द्राणां वृत्तिच्छेदोनुजीविनाम् ।
पृथक्शय्या च नारीणामशस्त्रो वध उच्यते ॥ १ ॥

इति नीतिशास्त्रोपदेशादस्मास्वशस्त्रवधकारिषु पुत्रेषु को दण्ड उचितः । अतो राज्ञा प्रायोपवेशन-पूर्वकं विंशत्यधिकवर्षशते पूर्णे चिताप्रवेशः कृतः। अनेन राज्ञा भट्टारिकाश्रीयोगिश्वरीप्रासादः कृतः । [!संव० ८७८ श्रावणसुदि ४ निरूद्धं वर्ष १७ मास १ दिन १ श्रीयोगराजेन राज्यं कृतं ॥ सं० ८७८! श्रावणसुदि ५ उत्तराषाढनक्षत्रे धनुर्लग्ने रत्नादित्यस्य राज्याभिषेको बभूव । सं० ८८१ कार्त्तिकसुदि ९ निरूद्धं वर्ष ३ मास ३ दिनान्यनेन राज्ञा राज्यं चक्रे ॥ सं० ८९८! वर्षे ज्येष्टसुदि १३ शनौ हस्तनक्षत्रे सिंहलग्ने श्रीक्षेमराजदेवस्य राज्याभिषेकः समजनि। सं० ९२२! भाद्रपदसुदि १५ रवौ वर्ष ३८! मास ३ दिन १० अस्य राज्ञो राज्यनिबन्धः । ५ । सं० ९३५! वर्षे आश्विनसुदि १ सोमे रोहिणीनक्षत्रे कुम्भलग्ने श्रीचामुण्डराजदेवस्य पट्टाभिषेकः सजनि ॥ ६ ॥ सं० ९३८ माघवदि! ३ सोमे निरूद्धं वर्ष १३ ! मास ४ दिन १६ अनेन राज्ञा राज्यं विदधे ॥सं० ९३८! माघवदि १४ भौमे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वातिनक्षत्रे सिंहलग्ने श्रीआकडदेवो राज्ये उपविष्टः। अनेन कर्कराया पूर्यामाकडेश्वरकण्टेश्वरीप्रासादौ कारितौ। सं० ९६५! पौषशुदि ९ बुधे निरुद्धं वर्ष २६! मास १ दिन २० राज्यं कृतं॥ सं० ९९०! पौषसुदि १० गुरौ आर्द्रानक्षत्रे कुम्भलग्ने भूयगडदेवः पट्टे समुपविष्टः। अनेन राज्ञा भूयगडेश्वरप्रासादःकृतःश्रीपत्तने प्राकारश्च सं० ९९१! वर्षे आषाढसुदि १५ निरुद्धं वर्ष २७! मास ६ दिन ५० राज्यं कृतं एवं चापोत्कटवंशे पुरुषाः ७ तद्वंशे १९० वर्ष मास २ दिनसप्त राज्यं जातं॥]!

असेव्या मातङ्गा परिगलितपक्षाः शिखरिणो
जडप्रीतिः कूर्मो फणिपतिरयं च द्विरसनः।
इति ध्यातुर्धातुर्धरणिधृतये सान्ध्यचुलका-
त्समुत्तस्थौ कश्चिद्विलसदसिपट्टः सुसुभटः॥ इति॥

अथ पूर्वोक्तश्रीभूयगडराजवंशे मुञ्जालदेवसुता राजबीजदण्डकनामानस्त्रयः सहोदरा यात्रायां श्रीसोमनाथं नमस्कृत्य ततः प्रत्यावृत्ताः। श्रीभूयडदेवनृपं वाहकेल्यामवलोकमानास्तुरगस्य नृपेण कशाघाते दत्ते सति कार्पटिकवेषधारी राजनामा क्षत्रियोऽनवसरे दत्तेन तेन कशाघातेन पीडितः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिरःकम्पपूर्वं हा हेति शब्दमवादीत् । राज्ञा तत्कारणं पृष्टः स तुरङ्गमेन कृतं गतिविशेषं न्युञ्छन्नयोग्यमनवधार्य कशाघाते दीयमाने ममैव मर्माघातः समजनि । तेन तद्वचसा चमत्कृतेन राज्ञा स तुरङ्गो वाहनाय समर्पितः । तस्यैवाश्वाश्ववारयोः सदृशयोगमालोक्य पदे पदे तयोर्न्युञ्छनानि कुर्वंस्तेनैव तदाचारेण तस्य महत्कुलमाकलय्य लीलादेवीनाम्नीं स्वभगिनीं ददौ। आधानानन्तरं कियत्यपि गते काले ऽकाण्डमरणे संजाते सचिवैरपत्यमरणं पर्यालोच्य तदुदरविदारणपूर्वमपत्यमुद्धृतं । मूलनक्षत्रजातत्वात्स श्रीमूलराजाभिधया समजनि । बालार्क इव तेजोमयत्वात्सर्ववल्लभतया पराक्रमेण मातुलमहीपालं प्रवर्द्धमानसाम्राज्यं कुर्वन् मदमत्तेन श्रीभूयडदेवेन साम्राज्येऽभिषिच्य तेन तु मत्तेनोत्थाप्यते च तदादि चापोत्कटानां दानमुपहासप्रसिद्धं।स इत्थमनुदिनं विडम्बमानो निजपरिकरं सञ्जिकृत्य विकलेन मातुलेन स्थापितो राज्ये तं निहत्य सत्य एव भूपतिर्बभूव ॥ सं० ९९३ वर्षे आषाढसुदि १५ गुरौ, अश्विनीनक्षत्रे सिंहलग्ने रात्रिप्रहरद्वयसमये जन्मत एकविंशतितमे वर्षे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीमूलराजस्य राज्याभिषेकः समजनि । कस्मिन्नप्यवसरे सपादलक्षीयक्षितिपतिः श्रीमूलराजमाभिषेणयितुं गूर्जरदेशसन्धौ समाजगाम । तद्यौगपद्येन नरपतेस्तिलङ्गदेशीयराज्ञो बारवनामा सेनापतिरुपाययौ । श्रीमूलराजेन तयोरेकस्मिन्विगृह्यमाणेऽपरः पार्ष्णिघातं कुरुते इति सचिवैः सह विमृशंस्तैरूचे । श्रीकन्थादुर्गे प्रविश्य कियन्त्यपि दिनान्यतिवाह्यन्ते । नवरात्रिकेषु समागतेषु सपादलक्षक्षितिपतिः स्वराजधान्यां शाकम्भर्यामेव स्वगोत्रजामाराधयिष्यति । तस्मिन्नवसरे श्रीबारवनामा सेनानीर्जीयते तदनुक्रमतः सपादलक्षक्षोणीपतिरपीत्थं तदीये मन्त्रे श्रुते सति नृपः प्राह । मम लोके पलायनापवादः किं न भविष्यतीत्यादिष्टे ॥ ते ऊचुः ॥

यदपसरति मेषः कारणं तत्प्रहर्तुं
मृगपतिरपि कोपात्सं कुचत्युत्पतिष्णुः ।
हृदयनिहितवैरा गूढमन्त्रप्रचाराः
किमपि विगणयन्तो बुद्धिमन्तः सहन्ते ॥ १ ॥

इति तद्वचसा श्रीमूलराजः श्रीकन्थादुर्गे प्रविवेश । श्रीसपादलक्षीयभूपतिः श्रीगूर्जरदेशे वर्षा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालमतिक्रामन्नवरात्रेषु समागतेषु तस्यामेव कटकभूमौ शाकम्भरीनगरं निवेश्य तत्र गोत्रजामानीय तत्रैव नवरात्राणि प्रारेभे । श्रीमूलराजस्तत्स्वरूपमवगम्य निरुपायान्मन्त्रिणो ज्ञात्वा तत्कालोत्पन्नमतिर्वैभवो राजा लिहणिकां[1] प्रारभ्य राजादेशेन समस्तान्समन्ततः सामन्तानाहूय कूटलेखकव्ययकरणप्रतिबद्धपञ्चकुलमुखेन सर्वानपि राजपुत्रान्पदातींश्चान्वयावदाताभ्यामुपलक्ष्य यथोचितदानादिभिरावर्ज्य च समयसंकेतज्ञापनापूर्वं तान्सर्वान्सपादलक्षीयनृपतिशिबिरसंनिहितान्विधाय निर्णीते वासरे प्रधानकरभीमारुह्य तत्प्रतिपालकेन समं भूयसीमपि भुवमाक्रम्य प्रत्यूषकालेऽतर्कित एव सपादलक्षीयनृपतेः कटकं प्रविश्य करभ्या[2] अवरुह्य कृपाणपाणिरेकाक्येव श्रीमूलराजस्तद्वौवारिकमभिहितवान् । साम्प्रतं नृपतेः कः समयः श्रीमूलराजो राजद्वारे प्रविशतीति स्वस्वामिने विज्ञपयेति वदंस्तं दोर्दण्डप्रहारेण द्वारदेशादपसार्यायं श्रीमूलराज एव द्वारे प्रविशतीति तस्मिन्नभिदधाने गुरूदरान्तः प्रविश्य तस्य राज्ञः पल्यङ्के स्वयं

१ A लिहिणिकां २ C D करभ्यामेव B करभ्यामवरुह्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निषसाद । भयभ्रान्तः स राजा क्षणमेकं मौनमवलम्ब्येषत्साध्वसं विधूय भवानेव श्रीमूलराज इत्यभिहिते श्रीमूलराजः स्पष्टं जगौ । ऊमिति गिरमाकर्ण्य यावत्समयोचितं किञ्चिद्वक्ति तावत्पूर्वसंकेतितैस्तैश्चतुःसहस्रप्रमितैः पत्तिभिः स गुरूदरः परिवेष्टयांचक्रे । अथ मूलराजेन स नृप इत्यभिदधे। अस्मिन्भूवलये नृपतिः समरवीरः समरे यो मम सन्मुखस्तिष्ठति स कोपि नास्त्यास्ति वेति मम विमृशतस्त्वमुपयाचितैरुपस्थितोसि परमज्ञानावसरे मक्षिकासन्निपात इव तिलङ्गदेशीयतैलपाभिधानराज्ञः सेनापतिं मज्जयाय समागतं यावच्छिक्षयामि तावत्त्वया पार्ष्णिघातादिव्यापाररहितेन स्थातव्यमिति त्वामुपरोद्धुमहमागतोस्मि मूलराजेनेत्यभिहिते भूपतिरेवमवादीत् । यत्त्वं नृपतिरपि सामान्यपत्तिरिव जीवितनिरपेक्षतयेत्थं वैरिगृहे एक एव प्रविशासि तेन त्वया सार्द्धमाजीवितान्तमेव मे संन्धिः। तेन राज्ञेत्युदिते मा मैवं वदेति तं निवारयंस्तेन भोजनाय निमन्त्रितोऽवज्ञया तं निषिध्य करे तरवारिमादायोत्थितः। तां करभीमारुह्य तेन स्कन्धावारेण परिवेष्टितो बारवसेनापतिकटके पतितः। तं निह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्थ दशसहस्रसंख्यांस्तद्वाजिनोऽष्टादशगजरूपाणि चादाय यावदावासान्दत्ते तावत्प्रणिधिभिरस्मिन्वृत्तान्ते ज्ञापिते सपादलक्षः पलायांचक्रे। तेन राज्ञा श्रीपत्तने श्रीमूलराजवसहिका कारिता । श्रीमुञ्जालदेवस्वामिनः प्रासादश्च। तथा नित्यं २ सोमवासरे श्रीपत्तने यात्रायां शिवभक्त्या व्रजंस्तद्भक्तिपरितुष्टः सोमनाथ उपदेशदानपूर्वं मण्डलीनगरमागतः। तेन राज्ञा तत्र मूलेश्वर इति प्रासादः कारितः तत्र नमश्चिकीर्षाहर्षेण प्रतिदिनमागच्छतस्तस्य तद्भक्तिपरितुष्टः श्रीसोमेश्वरः ससागर एव भवन्नगरे समेष्यामीत्यभिधाय श्रीमदणहिल्लपुरेऽवतारमकरोत् । समागतसागरसंकेतेन सर्वेष्वपि जलाशयेषु सर्वाण्यपि वारीणि क्षाराण्यभवन् । तेन राज्ञा तत्र त्रिपुरुषप्रासादः कारितः। अथ तस्य चिन्तायकमुचितं तपस्विनं कंचिदालोकमानः सरस्वतीसरित्तीरे एकान्तरोपवासपारणकेऽनिर्दिष्टपञ्चग्रासभिक्षाहारं कन्थडिनामानं स तपस्विनमश्रौषीत् । यावत्तन्नमस्याहेतवे नृपतिस्तत्र प्रयाति तावत्तेन तृतीयज्वरिणा स ज्वरः कन्थायां नियोजित इति नृपतिरालोक्य तेन राज्ञा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं कन्था कम्पते इति पृष्टो नृपेण सह वार्त्तां कर्तुमक्षमतयेह ज्वर आरोपित इत्यभिहिते पार्थिवः प्राह। यद्येतावती शक्तिर्भवतस्तदा ज्वरः किं न सर्वथा प्रहीयते इति राजादेशे ॥

उपतिष्टन्तु मे रोगा ये केचित्पूर्वसंचिताः।
आनृण्ये[1] गन्तुमिच्छामि तच्छम्भोः परमं पदम् ॥

इति शिवपुराणोक्तान्यधीयन्नभुक्तं कर्म न क्षीयते इति जानन्कथममुं विमुञ्जामीति तेनाभिहिते त्रिपुरुषधर्मस्थानस्य[2] चिन्तायकत्वाय नृपतिरभ्यर्थयामास।

अधिकाराविभिर्मासैर्माठापत्याब्दिभिर्दिनैः।
शीघ्रं नरकवाञ्छा चेद्दिनमेकं पुरोहितः ॥ १ ॥

इति स्मृतिवाक्यं जानंस्तपउडुपेन संसारसागरमुत्तीर्य गोष्यदे निमज्जामि किमिति वचसा निषिद्धो नृपस्ताम्रशासनं मण्डकवेष्टितं निमार्य तस्मै भिक्षागताय पत्रपुटे मोचयामास। स तदजानंस्ततः प्रत्यावृत्तः। पुरा दत्तमार्गोपि सरस्वत्याः पूरे तदा न दीयमानमार्ग आजन्म निजदूषणानि विमृशंस्तात्कालिकभिक्षादोषपरिज्ञानाय यावद्वि-

---

१ A B ओनण्ये. २ A त्रिपुरुषधर्मस्थापनस्य

लोकते तावत्ताम्रशासनं ददर्श। तदनु क्रुद्धं तपोधनं विज्ञाय तत्रागत्य नृपस्तत्सान्त्वनाय यावद्विनयवाक्यानि ब्रूते तावत्तेन मया दक्षिणपाणिनागृहीतं भवेत्ताम्रशासनं कथं वृथा भवतीति वयजल्लदेवनामा निजविनेयो नृपाय समर्पितः। तेन वयजल्लदेवेन प्रतिदिनमङ्कोद्वर्त्तनाय जात्यघुसृणस्याष्टौ पलानि मृगमदपलचतुष्टयं कर्पूरपलमेकं द्वात्रिंशद्द्वाराङ्कना ग्रामसहितं सितातपत्रं च यदा ददासि तदा चिन्तायकत्वमङ्गीकरोमीत्यभिहिते राज्ञा तत्सर्वं प्रतिपद्य त्रिपुरुषधर्मस्थाने तपस्विभूपपदे सोऽभिषिक्तः। कंकरौलै इति प्रसिद्धः। इत्थं भोगान्भुञ्जानोप्यजिह्मब्रह्मचर्यानिरतः। स कदाचिन्निशि मूलराजपत्न्या परीक्षितुमारब्धः। ताम्बूलप्रहारेण कुष्ठिनीं विधाय पुनरनुनीतो निजोद्वर्त्तनविलेपनस्नानोत्सृष्टपयःप्रक्षालनाच्च सञ्जीचकार। अथात्रैव लाखाकोत्पत्तिविप्रतिपत्तिप्रबन्धः॥

पुरा कस्मिन्नपि परमारवंशे कीर्त्तिराजदेशाधिपतेः सुता कामालतानाम्नी सा बाल्ये सममालिभिः कस्यापि प्रासादस्य पुरो रममाणा वरान्वृणीतेति ताभि-

१ A वाराङ्गनाग्रामसहितं २ A C D कुंकूरौल.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यापाद्यियमाणा सा कमलता घोरान्धकारनिरुद्धनयन-मार्गा प्रासादस्तम्भान्तरितं फुलडाभिधानं पशुपाल-मज्ञातवृत्या तमेव वृत्त्वा तदनन्तरं कतिपयैर्वर्षैः प्रधानवरेभ्य उपढौक्यमाना पतिव्रताव्रतनिर्वहणा-य पितरावनुज्ञाप्य निर्बन्धात्तमेवोपयेमे। तयोर्नन्द-नो लाषाकः स कच्छदेशाधिपतिः प्रसादितयशोरा-जवरप्रसादात्सर्वतोप्यजेयः। एकादशकृत्वस्त्रासित-श्रीमूलराजसैन्यः। कस्मिन्नप्यवसरे कपिलकोटिदुर्गे स्थित एव राज्ञा लाषाकः स्वयं निरुद्धः। तदनु स लक्षः क्वाप्यवस्कन्ददानाय प्रहितं निर्व्यूढसाहसं माहेचाभिधं भृत्यमागच्छन्तमियेष। तत्स्वरूपम-वधार्य श्रीमूलराजेन तदागमनमार्गेषु निरुद्धेषु स समाप्तकार्यस्तत्रागच्छन् शस्त्रं त्यजेति राजपुरु-षैरुक्तः स्वामिकार्यसमर्थनाय तथैव कृत्वा समर-सज्जं लाषाकमुपेत्य प्राणंसीत्। अथ संग्रामा-वसरे॥

ऊग्गा तावि उ जहिं न किउ लक्खउ भणइ निघट्टु॥
गणिया लब्भइ दीहडा के दहक अहवा अट्ठ॥१॥

१ येनोद्यता सता तापिनो न कृतः। ताहें लहो निकृष्टो भण्य-ते। गणिना लभ्यन्ते दिवसाः किं वा दश। अथवाऽष्ट॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादिबोधवाक्यानि विविधानि व्याहरन्माहिचभृत्येनोद्भटवृत्तिदर्शनेन प्रोत्साहितसाहसः श्रीमूलराजेन समं द्वन्द्वयुद्धं कुर्वाणस्तस्याजेयतां दिनत्रयेण विमृश्य तुर्यदिने श्रीसोमेश्वरमनुस्मृत्य ततोवतीर्णरुद्रकलया स लक्षो निजघ्ने ॥ अथ तस्याजिभूपातितस्य वातचलिते श्मश्रुणि पदा स्पृशन् राजा लक्षजनन्या लूतिरोगेण भवद्वंशो विपत्स्यत इति प्रशप्तः ॥

स्वप्रतापानले येन लक्षहोमं वितन्वता ।
सूत्रितस्तत्कलत्राणां बाष्पावग्रहनिग्रहः ॥ १ ॥
कच्छपलक्षं हत्वा सहसाधिकलम्बजालमायातं ।
संगरसागरमध्ये धीवरता दर्शिता येन ॥ २ ॥

इति लाषाकोत्पत्तिविपत्तिप्रबन्धः ॥

मेदिन्यां लब्धजन्मा जितबलिनि बलौ बद्धमूला दधीचौ
रामे रूढप्रवाला दिनकरतनये जातशाखोपशाखा ।
किंचिन्नागार्जुनेन प्रकटितकलिका पुष्पिता साहसाङ्के
आमूलामूलराज त्वयि फलितवती त्यागिनि त्यागवल्ली ॥ ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्नाता प्रावृषि वारिवाहसलिलैः संरूढदूर्वाङ्कुर-
व्याजेनात्तकुशाः प्राणालसलिलैर्दत्वा निवापाञ्ज-
लीन्॥
प्रासादास्तव विद्विषां परिपतत्कुड्यस्थपिण्डच्छला-
त्कुर्वन्ति प्रतिवासरं निजपतिप्रेतायपिण्डक्रियाम्॥४

इत्थं तेन राज्ञा पञ्चपञ्चाशद्वर्षाणि निःकण्टकं साम्राज्यं विधाय सन्ध्यानीराजनाविधेरनन्तरं राज्ञा प्रसादीकृतं ताम्बूलं वण्ठेन करतलाभ्यामादाय तत्र कृमिदर्शनात्तत्स्वरूपमवगम्य वैराग्यात्संन्यासाङ्गीकारपूर्वं च दक्षिणचरणाङ्गुष्ठे वन्हियोजनापूर्वं गजदानप्रभृतीनि महादानानि ददानोष्टभिर्दिनैः॥

उद्भूमकेशं पदलग्नमग्नि-
मेकं विषेहे विनयैकवश्यः॥
प्रतापिनोऽन्यस्य कथैव का य-
द्विभेद भानोरपि मण्डलं यः॥१॥

इत्यादिभिः स्तुतिभिः स्तूयमानो दिवमारुरोह॥

अथसं. १०५०!(५२) श्रावणसुदि ११ शुक्रे पुष्यनक्षत्रे वृषलग्ने श्रीचामुण्डराजो राज्ये उपाविशत्। अनेन श्रीपत्तने चन्दनाथदेव,चाचिणेश्वरदेवप्रसादौ कारितौ॥ सं० १० ५५ आश्विनशुदि ५ सोमे नि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुद्धं। वर्ष १३ मास १ दिन २४ राज्यं कृतं॥ सं० १०६५ आश्विनशुदि ६ भौमे ज्येष्ठानक्षत्रे मिथुनलग्ने श्रीवल्लभराजदेवो राज्ये उपविष्टः। अस्य राज्ञो मालवकदेशे धाराप्राकारं वेष्टयित्वा शीलीरोगेण विपत्तिः संजाता। अस्य राजदमनशंकर इति तथा जगद्भंपण इति बिरुदद्वयं संजातं॥ सं० १०६५ चैत्रशुदि ५ निरुद्धं मास, ५ दिन २९ अनेन राज्ञा राज्यं कृतं॥ सं० १०६५चैत्रशुदि ६ गुरौ, उत्तराषाढनक्षत्रे मकरलग्ने सङ्घाता दुर्लभराजनामा राज्येऽभिषिक्तः। अनेन [illegible] सप्तभूमिधवलगृहकरणं व्ययकरणहस्तिशालाश्वटिकागृहसहितं कारितं॥ स्वभ्रातृवल्लभराजश्रेयसे मदनशंकरप्रासादः कारितस्तथा दुर्लभसरः कारयांचक्रे॥ एवं १२ वर्ष राज्यं कृतं॥ तदनु सं० १०७७ ज्येष्ठसुदि १२ भौमे अश्विनीनक्षत्रे मकरलग्ने श्रीभीमाभिधानं मातुः सुतं राज्येभिषिच्य स्वयं तीर्थोपासनवासनया वाणारसीं प्रति प्रतिष्ठासुर्मालवकमण्डलं प्राप्य तन्महाराजश्रीमुञ्जेन छत्रचामरादिराजाचिन्हानि विमुच्य कार्पटिकैवे

१ ।) वियासुः *कर्पटं कषायवस्त्रखण्डेन चरतीति कार्पटिकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षेणैव पुरतो व्रजेति यद्वा युद्धं विधेहीत्यभिहितेऽन्तरा धर्मान्तरायमुदितमवगम्य तं वृत्तान्तं नितान्तं श्रीभीमराजाय समादिश्य कार्पटिकवेषेण तीर्थे गत्वा परलोकं साधयामास। ततः प्रभृति मालविकराजभिः[1] सह गुर्जरनृपतीनां मूलविरोधः संवृत्तः॥ अथ प्रस्तावायातं मालवकमण्डनभुञ्जराजचरितमेवम्[2]॥



१ C मालवकराज्ञां. २ B C मालवकमण्डलमण्डन.
३ D तदाप्रभृति मालवकं राजचरितमेवं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥वर्त्तमानकालीनविनिश्चितराजप्रसिद्धिर्यथा॥

॥ चापोत्कट (चावडा) वंशराजानः ॥

		इस्विसनः प्रारम्भः	समाप्तिः	वर्षाणि
१	वनराजः	इ० ७४६	८०६	६०
२	योगराजः	इ० ८०६	८४१	३५
३	क्षेमराजः	इ० ८४१	८६६	२५
४	भूवडः	इ० ८६६	८९५	२९
५	वीरसिंहः (विजयसिंहः)	इ० ८९५	९२०	२५
६	रत्नादित्यः (रावतसिंहः)	इ० ९२०	९३५	१५
७	सामन्तसिंहः	इ० ९३५	९४२	७

॥ चौलुक्य (सोलङ्की) वंशराजानः॥

८	मूलराजः	इ०	९४२–	९९७–५५
२	चामुण्डराजः	इ०	९९७–१०१०–	१३
३	वल्लभसेनः	इ०	१०१०–१०१०–	०
४	दुर्लभसेनः	इ०	१०१०–१०२२–	१२
५	भीमदेवः प्रथमः	इ०	१०२२–१०७२–	५०
६	कर्णः	इ०	१०७२–१०९३–	२२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

७ सिद्धराजः। (जयसिंहः) इ० १०९४—११६३—४९

८ कुमारपालः इ० ११४३—११७४—३१

९ अजयपालः इ० ११७४—११७७— ३

१० मूलराजः।द्वितीयः इ० ११७७—११७९— २

११ भीमदेवः।द्वितीयः इ० ११७९—१२४२—६३ (४३)

१२ त्रिभुवनपालः इ० १२४२—१२४४— २

॥व्याघ्रीय (वाघेला) वंशराजानः॥

१ विशलदेवः इ० १२४२ १२६२ १८

२ अर्जुनदेवः इ० १२६२ १२७५ १३

३ सारंगदेवः इ० १२७५ १२७९ ४

४ कर्णराजः (कर्णघेलो) इ० १२७९ १३०४ २५

(ख)॥सपादलक्षीयचाहमाननृपवंशोलिख्यते॥

१ वसुदेवराजः संवत ६०८ वर्षे (चव्हाण राजा)

२ सामन्तराजः

३ नरदेवः

४ अजयराजः। अजयमेरुदुर्गकारक.

५ विग्रहराजः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६ विजयराजः

७ चन्द्रराजः

८ गोविन्दराजः। सुरत्राणस्य वेगवरिसनाम्नो जेता

९ दुर्लभराजः

१० वत्सराजः

११ सिंहराजः। सुरत्राणस्य हाजिवदीननाम्नो जेठाणके जेता

१२ दुर्योजनः निसरदीनसुरत्राणजेता

१३ विजयराजः

१४ वप्पइराजः। शाकम्भर्यां देवताप्रसादाद्धेमादिखानिसंपन्नः

१५ दुर्लभराजः

१६ गण्डूराजः। महमदसुरत्राणजेता

१७ बालपदेवः

१८ विजयराजः

१९ चामुण्डराजः। सुरत्राणभङ्गः।

२० दूसलदेवः। येन गूर्जरधराधिपतिर्बद्धानीतोऽजयमेरुमध्ये तक्रविक्रयं कारितः

२१ वीसलदेवः। स च स्त्रीलम्पटो महासत्यां ब्राह्मण्यां विलग्नो बलात्तच्छापाद्दुष्टव्रणसंक्रमेण मृतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२२ वृहत्पृथ्वीराजः। बलुगीसाहसुरत्राणभुजमर्दी
२३ आल्हणदेवः। सहावदीनसुरत्राणजेता
२४ अनालदेवः
२५ जगद्देवः
२६ वीसलदेवः। तुरुष्कजित्
२७ अमरगाङ्गेयः
२८ पेथडदेवः
२९ सोमेश्वरदेवः
३० पृथ्वीराजः संवत् १२३६ वर्षे राज्यं चकार।
संवत् १२४८ मृतः।
३१ हरिराजदेवः
३२ राजदेवः
३३ बोलणदेवः यादवीआलबिरुदं तस्य
३४ वीरनारायणदेवः तुरुष्कसमसदीनयुद्धे मृतः
३५ वाहडदेवः मालवजेता
३६ जैत्रसिंहदेवः
३७ वीरधवलदेवः संवत् १२७२ वर्षे राज्ये स्थितः
संवत् १२७८ वर्षे मृतः
॥ इति सवादशतोत्तरचतुष्पदराः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुञ्जराजप्रबन्धः

पुरा तस्मिन्मण्डले श्रीपरमारवंश्यः सिंहदन्त-भटनामा[1] नृपती राजपाटिकायां परिभ्रमन् शरवणमध्ये जातमात्रं रूपपात्रमतिमात्रं कमपि बालमालोक्य पुत्रवात्सल्यानुभावाय देव्यै समर्पयामास। तस्य सान्वयं मुञ्ज इति नाम निर्ममे। तदनु सीन्धलेइति नाम्ना सुतः समजनि। निःशेषगुणपुञ्जमञ्जुलमुञ्जस्यैं[2] राज्याभिषेकचिकीर्नृपस्तस्य सौधमलंकुर्वन्नमन्दमन्दाक्षतया निजवधूं वेत्रासनान्तरितां विधाय प्रणामपूर्वं भूपतिमाराध। राजा तं प्रदेशं विजनमवलोक्य तज्जन्मवृत्तान्तमादित एव तस्मै निवेद्य तव भक्त्या परितोषितः सन्सुतं विहाय तुभ्यं राज्यं प्रयच्छामीति वदन् परमनेन सीन्धलनाम्ना बान्धवेन समं प्रीत्या वर्त्तितव्यमित्यनुशास्तिं दत्वा तस्याभिषेकं चकार। स्वजन्मवृत्तान्तप्रसरशङ्कितेन तेन स्वदयितापि निजघ्ने। तदनु पराक्रमाक्रान्तभूतलः समस्तसज्जनचक्रवर्त्ति-रुद्रादित्यनाम्ना महामात्येन चिन्तितराज्यश्रियं सु-

---

१ C श्री सिंहभट D श्रीवर्षनामा. २ B सिन्धुज, D सिंधुराज. ३ A पुञ्जपुञ्जस्य. D निः शेषराजगुणपुञ्ज. ४ D समस्तविद्वज्जन.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खमनुभवन्कस्यामपि योषित्यनुरक्ताश्चिरकिल्लाभिध-करभमधिरुह्य द्वादशयोजनीं निशि प्रयाति प्र-त्यायाति च तया समं विश्लेषे जाते इमं दोधक-मप्रैषीत् ॥

मुंञ्ज षडल्ला दोरडी पेक्खिसि न गम्मारि ।
असाढि घण गज्जीइं चिक्खिलि होसेऽवारि ॥ १ ॥

तं सीन्धलनामानं भ्रातरमुत्कटतयाज्ञाभङ्गकारिणं स्वदेशान्निर्वास्य सुचिरं राज्यं चकार । स सीन्धलो गूर्जरदेशे समागत्य काश-हृदनगरसन्निधौ निजां पल्लीं निवेश्य दीपोत्सवे रात्रौ मृगयां कर्तुं प्रयातः। चौरवधभूमेः सन्निधौ शूकरं चरन्तमालोक्य शूलि-कायाः पतितं चौरशवमजाजन् जानुनाधो विधाय यावत्प्रतिकिरिं शरं सज्जीकुरुते तावत्तेन शवेन संकेतितः । ततस्तं करशपर्शान्निवार्य शूकरं तं श-रेण विदार्य यावदाकर्षति तावत्स शवोऽट्टहासपूर्व-मुत्तिष्ठन् सीन्धलेन प्रोचे तव संकेतकाले शूकरे-

---

* हे मुञ्ज स्वजिता दवरकी [रज्जुः] प्रेक्षसे न तां हे जाल्म आषाढीयो घनो गर्जतीति पिच्छला भूर्भविष्यत्यधुना । इत्यन्योक्त्यो-पालम्भेनाक्रन्दत् । त्वद्विरहजन्याश्रुधाराभिः पङ्किलायां भुवि कथ-मागमिष्यसीति दिक्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरप्रहारः श्रेयान्। किं वाऽवबुध्य[1] महाप्रदत्तेः प्रहार इति तद्वाक्यान्ते सच्छिद्रान्वेषी प्रेतः तन्निःसीमसाहसेन परितुष्टो वरं वृणु। इत्यभिहितो मम बाणः क्षितौ मा पतत्विति याचिते भूयोपि वरं वृणु। इति श्रुत्वा मद्भुजयोः सर्वापि लक्ष्मीः स्वाधीनेति। तत्साहसचमत्कृतः स प्रेत इत्याह। त्वया मालवमण्डले गन्तव्यमिति। तत्र श्रीमुञ्जराजा संनिहितविनाशस्तथापि तत्र त्वया गन्तव्यमेव तत्र तवान्वये राज्यं भविष्यतीति तत्प्रेषितस्तत्र गत्वा श्रीमुञ्जराज्ञः संपदः पदं कमपि जनपदमवाप्य पुनरुत्कटतया श्रीमुञ्जेन निगृहीतनेत्रः काष्ठपञ्जरनियन्त्रितो भोजं सुतमजीजनत्। सोऽभ्यस्तसमस्तराजशास्त्रः षट्त्रिंशदायुधान्यधीत्य द्वासप्ततिकलाकूपारपारंगमः समस्तलक्षणलक्षितो ववृधे। तज्जन्मनि जातकविदा केनापि नैमित्तिकेन जातकं समर्पितं॥

पञ्चाशत्पञ्चवर्षाणि मासाः सप्त दिनत्रयम्।
भोक्तव्यं भोजराजेन सगौडं दक्षिणापथम्॥ १॥

इति श्लोकार्थमवगम्यास्मिन्सति मत्सूनो राज्यं

---

१ A O अवबुध्यमहाप्रदत्त. B अवबुध्यति मत्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न भविष्यतीत्याशङ्क्यान्त्यजेभ्यो वधाय तं समर्पयामास । अथ तैर्निशीथे माधुर्यधुर्यां तन्मूर्त्तिमवधार्य तैर्जातानुकम्पैः सकम्पैश्चेष्टदैवतं स्मरेत्यभिहिते ॥

मान्धाता स महीपतिः कृतयुगालंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते
नैके नापि समं गता वसुमती मन्ये त्वया यास्यति ?

इदं काव्यं पत्रके आलिख्य तत्करेण नृपतये समर्पयामास । नृपतिस्तद्दर्शनात्खेदमेदुरमना अश्रूणि मुञ्चन् भ्रूणहत्याकारिणं स्वं निनिन्द । अथ तैस्तं सबहुमानमानीय युवराजपदवीदानपूर्वं संमान्य तिलिङ्गदेशीयराज्ञा श्रीतैलिपदेवनाम्ना सैन्यप्रेषणैराक्रान्तो रोगग्रस्तेन रुद्रादित्यनाम्ना महामात्येन निषिध्यमानोपि तं प्रति प्रतिष्ठासुर्गोदावरीं सरितमवधीकृत्य तामुल्लङ्घ्य प्रयाणकं न कार्यमिति शपथदानपूर्वं व्याषिद्धोपि तं पुरा षोढानिर्जितमित्यवज्ञया पश्यन्नतिरेकवशात्तां सरितमुत्तीर्य स्कन्धावारं निवेशयामास । रुद्रादित्यो नृप-

१ C D अन्तकृत्. २ B प्रभृतयः सर्वेपि चास्तं गताः। ३ मुञ्च.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेवृत्तान्तमवगम्य कामपि भाविनीमविनीततया विपदं विभृश्य स्वयं चितानले प्रविवेश । अथ तैलिपेन तत्सैन्यं छलबलाभ्यां हतविप्रहतं कृत्वा मुञ्जरज्वा विबध्य श्रीमुञ्जराजो जग्राहे । कारागृहे निहितः काष्ठपञ्जरनियन्त्रितो मृणालवत्या तद्भागिन्या परिचार्यमाणस्तया सह जातकलत्रसंबन्धः । पाश्चात्यैर्निजप्रधानैः सुरङ्गादानपूर्वं तत्र ज्ञापितसंकेतः । कदाचिद्दर्पणे स्वं प्रतिबिम्बं पश्यन्नज्ञातवृत्त्या पृष्ठतःसमागतायां मृणालवत्या वदनप्रतिबिम्बं जराजर्जरं मुकुरे निरीक्ष्य यूनः श्रीमुञ्जस्य वदनसामीप्यात्तद्विशेषाविच्छायतया तां विषण्णामालोक्यैवमवादीत् ॥

*मुञ्ज भणइँ मुणालवइ जुव्वण गयुं न झूरि।
जइ सक्करसयखण्ड थिय तो इस मीठी चूरि ॥१

इति तां संभाष्य स्वस्थानं प्रति यियासुस्तद्विरहासहो भयात्तं वृत्तान्तं ज्ञापितुमशक्तो भूयो भूयः

* मुञ्जो भणति हे मृणालवती यौवनं गतं तदपि मा खिद्यस्व । तत्र दृष्टान्तः । यदि शर्करा शतखण्डा जाता, तदपीमिष्टा, ततोपीयं चूर्णिता मर्दिता मिष्टैव ! १ ॥

१ A B चिन्तानले. २ C D तैलपेन. ३ A C D मुञ्जं रज्ज्वा बद्ध्वा. ४ C D पभणइ मुञ्ज. ५ जुव्वणु गियउं म झूरि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोच्यमानोपि तां चिन्तामनुज्झरन् । अलवणाति-लवणरसवतीं भोजितोपि तदास्वादानवबोधात्तया निर्बन्धबन्धुरया गिरा सप्रणयं पृष्टः प्राह । अहमनया सुरङ्गया स्वस्थाने गन्तास्मीति चेद्भवती तत्र समुपैति तदा महादेवीपदेऽभिषिच्य प्रसादफलं दर्शयामीत्यभिहिते यावदाभरणकरण्डिकामुपनयामि तावत्क्षणं प्रतीक्षस्वेत्यभिदधानाऽसौ (कात्यायिनी तत्र गतो मां परिहरिष्यतीति विमृशन्ती स्वभ्रातुर्भूपतेस्तं वृत्तान्तं निवेद्य विशेषतो विडम्बनाय बन्धनबद्धं कारयित्वा प्रतिगृहं भिक्षाटनं कारयामास । स प्रतिगृहं परिभ्रमन्निर्वेदमेदुरतयेमानि वाक्यानि पपाठ ॥ तथाहि ॥

*सउचित्तहरिसट्ठी मम्मणहब्बत्तीसडीहियां ।
हिअम्मिं ते नर दट्ठ सीझे जे वीससइं थियां॥ १॥

---

* सर्वचित्तहर्षार्थं मणमणाद्यैर्मन्मथवार्त्तासु दाक्षिण्यशीलायां स्त्रियां ये विश्वसन्ति ते हृदये दृढं खिद्यन्ते ॥ अत्र प्राचीनदेशीशब्दाः ! १ ॥

---

१ A B तद्भवती. (१ अर्द्धान्तरतो मनसा विचारयति)

२ A चित्तहसट्ठीमणह ४ अस्मी ते नर B हंरिसट्ठी मम्मणडत्ति । हिअम्मि C D पञ्चासडीहियाहअम्मी ५ सियझे पत्तिअह तांह D अम्मी सीझै ६ पंतिष्यहतियांहं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*झाली तुट्टी किं न मुउ किं न हूयउ छारपुञ्ज ।
हिण्डइ दोरीबन्धोयउ जिममङ्कुड तिम मुञ्जं ॥२

तथा च ॥

*गयगयरहगयतुरयगयपायक्कडो निभिच्च ।
सग्गट्ठिय करि मन्तण उम्मुहुं ता रुद्दाइच्चं ॥ ३ .

अथान्यस्मिन्वासरे कस्यापि गृहपतेर्गृहे भिक्षानिमित्तं नीतः ॥

पडुकपाणिं तत्यत्नी तक्रं पाययित्वा गर्वोद्धुरकन्धरां भिक्षादाननिषेधं विदधतीं मुञ्जः४ प्राह॥

*भोलि मुन्धि म गव्वु करि पिक्कि वि पडुगुपांइ-
चउदसइ सइं छहुत्तरइं मुञ्जह गयह गैयाइं ॥४

---

* ज्वालित्वा त्रुटित्वा किं न भवेयं भस्मपुञ्जः हिण्डाति दवरकबद्धो यथा मर्कटस्तथा मुञ्जः ॥२॥

१ C झोली तुट्टि वि किं न कउ मुयउ । छारहपुञ्ज घरिघरि तिम्म नचावियइ जिम । D तुटवि A झोली त्रुटी । B हुयउ.

* गतगजरथगततुरगगतपद्रो निर्वृत्यो जातोहं । तस्मात् हे रुद्रादित्य उन्मुखं मां स्वर्गास्थितः सन्मन्त्रणमामन्त्रणं कुर्याः ! ३

२ C D पायकडा ठकुरुदाइच्च, ३ B उंमुऊ ४ D मतणुमहता

* हे अज्ञे हे मुग्धे मा गर्वं कुरु प्रेक्ष्य लघुपिठरकहस्तं पमुकशब्दो देशी ० षट्सप्तत्युत्तरचतुर्दशशतानि मुञ्जस्य गजानां तान्यपि गतानि ! ४

५ C D धनवन्ती म गव्वु पंडुरुआइ A चउदइसइ C छउत्तर.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मा मङ्कुड कुरूद्वेगं यदहं खण्डितोमया ।
रामरावणमुञ्जाद्याः स्त्रीभिः के के न खण्डिताः ५
रेरे यन्त्रक मा रोदीर्यदहं भ्रामितोऽनया ।
कटाक्षाक्षेपमात्रेण कराकृष्टौ च का कथा ॥ ६॥
*जा मति पच्छइ सम्पज्जइ सा मति पहिली होइ।
मुञ्ज भणइ मुणालवइ विघन न वेढइ कोइ ॥७
यशःपुञ्जो मुञ्जो गजपतिरवन्तिक्षितिपतिः
सरस्वत्यावासः समजनि पुरा यः कृतिरिति ।
स कर्णाटेशेन स्वसचिवबुद्ध्यैव विधृतः
कृतः शूलाप्रोतस्त्वहह विषमाः कर्मगतयः ॥ ८ ॥
सुहृद्देवेन्द्रस्य ऋतुपुरुषतेजोंशजनकः
प्रमीतः शय्यायां सुतविरहदुःखाद्दशरथः ।
ज्वलत्तैलद्रोण्यां निहितवपुषस्तस्य नृपते–
श्चिरात्संस्कारोऽभूदहह विषमाः कर्मगतयः ॥ ९ ॥
आपद्गतं हससि किं द्रविणान्धमूढ
लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ।
किं त्वं न पश्यसि घटीर्जलयन्त्रचक्रे

ह. C षट्करुपाणि. B षमुकपाणि. A षडुकरुपाणि.

*या मतिः पश्चात्संपद्यते सा मतिर्यदि प्रथमा भवेत्तर्हि मुञ्जो भणति हेमृणालवति विघ्नं न वहति कोपि ! ७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रिक्ता भवन्ति भरिता भरिता च रिक्ताः ॥ १० ॥

अलङ्कारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च तृण एको बहुवयाः ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्द्धे स्थितवति वयं के पुनरमी ॥ ११

*सायर षाई लंक गढ गढवइ दससिरु राउ ।
भग्गक्खय सो भज्जिगय मुञ्ज म करि विसाउ १२

इत्थं सुचिरं भिक्षां भ्रामयित्वा वध्यभूमौ नृपादेशाद्वधविधौ नीतः । तैरुक्तमिष्टं दैवतं स्मर ।

लक्ष्मी र्यास्पति गोविन्दे वीरश्रीर्वीरवेश्मनि ।
गते मुञ्जे यशःपुञ्जे निरालम्बा सरस्वती ॥ १ ॥

इत्यादि तद्वाक्यानि यथाश्रुतमवगन्तव्यानि ॥

तदनु मुञ्जं निहत्य तच्छिरो राजाङ्गणे शूलिकाग्रोतं कृत्वा नित्यं दधिवेष्टितं कारयन्निजममर्ष पुपोष । अथ मालवमण्डले तद्वृत्तान्तवेदिभिः सचिवैस्तद्भ्रातृजं भोजनामानं राज्येऽभ्यषिच्यत ॥

॥इति श्रीविक्रमप्रमुखनृपवर्णनो नाम प्रथमः सर्गः॥

---

* सागरः परिखा । लंका दुर्गः । दुर्गपतिर्दशशिरा राजा । भाग्यक्षये तत्सदृशं भद्रं हे मुञ्ज मा कुरु विषादमिति रिपुनारिवाक्यम् १२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोजभीमप्रबन्धौ

अथ यदा मालवकमण्डले श्रीभोजराजा राज्यं चकार तदाऽत्र गुर्जरधरित्र्यां चौलुक्यवंशीयश्रीभीमः[1] पृथिवीं शशास। कस्मिन्नपि निशाशेषे स श्रीभोजः श्रियश्चञ्चलतां निजचेतसि चिन्तयन् कल्लोललोलं निजं जीवितं च विमृशन् प्रातःकृत्यानन्तरं दानमण्डपेऽनुचरैराहूतेभ्योऽर्थिभ्यो यदृच्छया सुवर्णटङ्ककान्दातुमारेभे। अथ रोहकाभिधानस्तन्महामात्यः कोशविनाशात्तदौदार्यगुणं दोषं मन्यमानोऽपरथा तं दानविधिं निषेद्धुमक्षमः सर्वावसरे भग्ने सभामण्डपभारपट्टे॥

आपदर्थे धनं रक्षेत्

इत्यक्षराणि खटिकयाऽलेखि[2]। प्रातर्यथावसरं नृपतिस्तान्वर्णान्निर्वर्ण्य समस्तपरिजने तं व्यतिकरमपन्हुवाने।

भाग्यभाजः क्व चापदः।

इति नृपतिना लिखिते

दैवं हि कुप्यते क्वापि

एवं मन्लिलिखनादनन्तरं नृपतिना[3] तद्विलोक्य

---

१ C D चौलुक्यचक्रवर्त्ती. २ C D लिलेख. ३ A नृपः D नृपेण.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संचयोपि विनश्यति ॥ १ ॥

इति पुरो लिखिते स सचिवोऽभयं याचित्वा स्वलिखितं विज्ञपयामास ॥ तदनु पण्डितानां पश्यतां मम मनोगजं ज्ञानाङ्कुशेन वशीकर्तुममात्रं महामात्यसन्निभा यथायाचितं ग्रासं लभते ॥ तथाहि ॥ कङ्कणोत्कीर्णमार्याचतुष्टयमेतत् ॥

इदमन्तरमुपकृतये प्रकृतिचलायावदस्ति संपदियम्।
विपदि नियतोदितायां पुनरुपकर्तुं कुतोवसरः ॥१॥
निजकरनिकरसमृद्धया धवलय भुवनानि पार्वणशशाङ्क।
सुचिरं हन्त न सहते हतविधिरिह सुस्थितं किमपि २
अयमवसरः सरस्ते सलिलैरुपकर्तुमर्थिनामनिशम्।
इदमपि सुलभमम्भो भवति पुरा जलधराभ्युदये ३
कतिपयदिवसस्थायी पूरो दूरोन्नतोपि चण्डरयैः।
तटिनीतटद्रुमपातिनिपातकमेकं चिरस्थायि ॥४॥

किंच ॥

---

१ C D स्वं लेखकं ज्ञापयामास. २ C D इयं पण्डितानां. ३ C D भतिमात्रं D भङ्कुशेन वशीकृतां. ४ C D उदयायां. ५D दूरोन्नतिश्च भविता ते. (D किंच श्लोकद्वयं कुण्डलोत्कीर्णम् ॥ तद्यथा—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि नास्तमिते सूर्ये न दत्तं धनमर्थिनाम् ।
तद्धनं नैव जानामि प्रातः कस्य भविष्यति ॥ ५ ॥

इति स्वकृतं कण्ठाभरणीकृतं श्लोकमिष्टमन्त्रवज्जपन्मन्त्रिन्, प्रेतप्रायेण भवता कथं विप्रलम्भ्यैः। अथान्यस्मिन्नवसरे राजा राजपाटिकायां संचरन् सरित्तीरमुपागतः। तन्नीरमुल्लङ्घ्यागच्छन्तं दारिद्र्योपद्रुतं काष्ठभारवाहकं कमपि विप्रं प्राह ।

कियन्मात्रं जलं विप्र
विप्र०
जानुदघ्नं नराधिप ।
इति तेनोक्ते राजा०
कथं सेयमवस्था ते
इति नृपेणोक्तः ॥ विप्र०
न सर्वत्र भवादृशाः ॥ १ ॥

इति तद्वाक्यान्ते यत्पारितोषिकं नृपतिरस्मै अदापयत्तन्मन्त्री धर्मवाहिकायां श्लोकबद्धं लिलेख। तद्यथा ॥

लक्षंरपुनर्लक्षं मत्ताश्च दश दन्तिनः।

ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥१॥

१ A B यदनस्त. २ D इमानि सुभाषितानीह. ३ D विप्रलभ्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दत्तं देवेन तुष्टेन जानुदघ्नप्रभाषणात्[1] ॥ १ ॥

अथान्यदा निशि निशीथसमये ऽ कस्माद्विगतनिद्रो राजा राजानं गगनमण्डले नवोदितमालोक्य स्वसारस्वताम्भोधिप्रोन्मीलद्वेलनिभामिदं काव्यार्द्धमाह[2] ।

यदेतच्चन्द्रान्तर्जलदलवलीलां प्रकुरुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।

इति राज्ञा भूयो२ निगद्यमाने कश्चिच्चौरो नृपसौधे खात्रपातपूर्वं कोशभुवने[3] प्रविश्य प्रतिभाभरं निषेद्धुमक्षमः ॥

अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणशतकलङ्काङ्कितनुम् ॥ १ ॥

इति तत्पठनान्तरं चोरमङ्गरक्षकैः कारागारे निवेशयामास । ततोऽहर्मुखे सभामुपनीताय तस्मै चौराय यत्पारितोषकं राज्ञा प्रसादीकृतं तद्धर्मवहिकानियुक्तो नियोग्येवं काव्यमलिखत् ।

अमुष्मै चौराय प्रतिनिहितमृत्युप्रतिभिये
प्रभुः प्रीतः प्रादादुपरितनपादद्वयकृतेः ।
सुवर्णानां कोटीर्दश दशनकोटिक्षतगिरी-

---

१ C D प्रभाषिणे. २ चन्द्रं । ३ C ऊचे ४ कोशगृहे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्करीन्द्रानप्यष्टौ मदमुदितगुञ्जन्मधुलिहः ॥ १ ॥

॥ अथ कदाचित्तस्यां वाच्यमानायां स्वमेव स्थूललक्षं मन्यमानो दर्पभूताभिभूत इव[1] तत्कृतं यन्न केनापि तद्दत्तं यन्न के नचित् ।
तत्साधितमसाध्यं यत्तेन चेतो न दूयते ॥ १ ॥

इति स्वं मुहुर्मुहुः श्लाघ्यमानः केनापि पुरातनमन्त्रिणा तद्गर्वखर्वचिकीर्षया श्रीविक्रमार्कधर्मवहिका नृपायोपनिन्ये । तस्या उपरितनविभागे प्रथमतः प्रथमं काव्यमेतत् ॥

अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः
पञ्चाशन्मदगन्धमत्तमधुपक्रोधोद्धुराः सिन्धुराः ।
अश्वानामयुतं प्रपञ्चचतुरैर्वाराङ्गनानां शतं
दण्डेपाण्डुनृपेण[2] दौकितमिदं वैतालिकस्यार्पितम् १
वक्त्राम्भोजे सरस्वत्यधिवसति सदा शोण एवाधरस्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः।
वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्त्य-
भीक्ष्णं

---

१ C दर्पाभिभूतः २ D नाकण्योपचयप्रपञ्चितदशां.

३ B D वैतालकस्य [वैतालभट्टाय विक्रमपण्डितायेत्यर्थस्तस्मिन्पाठे]ग०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वच्छेऽन्तर्मानसेऽस्मिन्कथमवनिपते तेऽम्बुपानाभिलाषः ॥१॥

अस्य काव्यस्य पारितोषिकदानमष्टौ हाटकमिदं काव्यं ज्ञेयम् ॥

इति तत्काव्यार्थमवगम्य तदौदार्यविनिर्जितगर्वसर्वस्वस्तां वाहिकामर्थयित्वा यथास्थानमस्थापयत्। प्रतीहारेण विज्ञप्तःस्वामिन्देव दर्शनोत्सुकं सरस्वतीकुटुम्बं द्वारमध्यास्ते। क्षिप्रं प्रवेशयेति राजादेशादनुप्रथमं प्रविष्टं तत्। प्रेष्यः प्राह ॥

*बापो विद्वान् बापपुत्रोपि विद्वान्
आई विउषी आईधुआपि विउषी।
काणी चेटी सापि विउषी वराकी
राजन्मन्ये विज्जपुअं कुटुम्बम् ॥ १

इति तस्य प्रहसनप्रायेण वचसा नृपतिरीषद्विहस्य तज्ज्येष्ठपुरुषाय समस्यापदमाह ॥

असारात्सारमुद्धरेत् ॥

---

*[बापः पिता। हैमशेषकाण्डे। आई माता। धुआ सुता। दशो० विद्यासमूहं]

१ B बप्पो. २ A C D विदुषी. ३ A विद्वी. C विधी. D विदुसी. ४ B विज्ञ. D विद्व.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानं वित्तादृतं वाचः कीर्तिधर्मौ तथायुषः।
परोपकरणं कायादसारात्सारमुद्धरेत् ॥ १

अथ नृपस्तत्पुत्राय । हिमालयो नाम नगाधिराजः । चकार मेनाविरहातुराङ्गीति नृपतिवाक्यानन्तरम् ॥

तव प्रतापज्वलनाज्जगाल
हिमालयो नाम नगाधिराजः ।
चकार मेना विरहातुराङ्गी
प्रवालशय्याशरणं शरीरम् ॥ १ ॥

इति समस्यायां पूरितायां ज्येष्ठस्य पत्नीं प्रति राजा। कवणु पियावउ खीरु। इति समस्यापदे राज्ञाऽर्पिते।

*जइ यह रावणु जाईयउ दहमुहइकुशरीरु ।
जणणि वियम्भी चिन्तवइ कवणुपियावउ खीरु १

सेत्थं पूरयामास ॥ अथ राज्ञः, कण्ठि विलुल्लइं काउ । इति समस्यापदं ।

[काण वि विरहकरालिइं पेइउद्धावियउ वराउ।

---

१ D प्रवालशय्याशरणं शरीरं

*(यदा च रावणो जातो दशमुखैकशरीरः। तदा जननी विजृम्भिणी कम्पती सतीत्यर्थः चिन्तयति कस्मै मुखाय क्षीरं पाययामि १]

१ Aचेइ Bजइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहि अच्चभूउं दिट्ठ मइं कण्ठि विलुल्लइ काउ*॥१

स इत्थं पूरयामास । सुतां विस्मृत्य राज्ञा तानि सर्वाणि सत्कृत्य विसृष्टानि ॥

अथ राजा सर्वावसरे चन्द्रशालाभुवि परिभ्रमन्विधृतातपत्रो द्वाःस्थेन विज्ञप्तसुतावृत्तान्तो नृपउच्यतामिति तां प्रति प्राह ॥ अथ सा ॥

राजन्भोज कुलप्रदीप निखिलक्ष्मापालचूडामणे
युक्तं संचरणं तवात्र भुवने छन्नेन रात्रावपि ।
मा भूत्त्वद्वदनावलोकनवशाद्रीडाविलक्षः शशी
मा भूच्चेयमरुन्धती भगवती दुःशीलताभाजनम् १

इति तद्वाक्यानन्तरं तत्सौन्दर्यापहृतचित्तस्तामुवाह्य भोगिनीं चकार । अथान्यदा यमलपत्रेषु सत्स्वपि सन्धिदूषणोत्पत्तये श्रीभोजराजो गूर्जरदेशविज्ञतां जिज्ञासुः सान्धिविग्रहिककरे कृत्वेमां गाथां भीमं प्रति प्राहिणोत् ॥

---

* कथमपि विरहकरालितया कलहान्तरितयेत्यर्थः पतिरुद्वीविनो वराकः । हे सखि अत्यद्भुतं दृष्टं मया यतः कण्ठे विलुल्लति कस्य । पतिं विना कस्यावलम्बनं करिष्ये इति तया न प्रथमं विचरितमित्यर्थः ॥ १ ॥]

१ C D अच्चिउ.

२ [अन्योन्यमेवं वर्तितव्यमिति व्यवहारः]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*हेलानिर्दलितगजेन्द्रकुम्भपर्याटितप्रतापप्रसरस्य ।
सिंहस्य मृगेण समं न विग्रहो नैव सन्धानं १

इति तदुत्तररूपां गाथां याच्यमानो भीमः सर्वेषाम पिमहाकवीनां गाथाबन्धान्विविधान्फल्गुवल्गितांश्चिन्तयन् ।

*अन्धयसुयाण कालो पुहवी भीमो य निम्मिओ[२] विहिणा ।
जेण सयंपि न गणियं का गणना[३] तुज्झ इक्कस्स[४] १

इति गोविन्दाचार्यविरचितां तां चेतश्चमत्कारिणीं गाथां तस्य प्रधानस्य करे प्रस्थाप्य सन्धिदूषणमपाहरत् ॥ कस्मिन्नप्यवसरे प्रतिहारनिवेदितः कोपि पुरुषः सभां प्रविश्य श्रीभोजं प्रति ॥

अम्बा तुष्यति न मया न स्तुषया सापि नाम्बया न मया ।
अहमपि न तया न तया वद राजन्कस्य दोषोयम् १

---

* (हेलानिर्दलितगजेन्द्रकुम्भप्रकटितप्रतापप्रसरस्य । सिंहस्य मृगेण समं न विग्रहो नैव सन्धानं ॥ १ ॥)

* (अन्धकसुतानां कालः पृथिव्यां भीमश्च निर्मितो विधिना । येन शतमपि न गणितं का गणना तवैकस्य ॥ १)

B १ भीमो पुहवीइ २ D निम्मिअ ३ A गणना ४ C एकस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति तद्वाक्यानन्तरं तदाजन्मदारिद्र्यद्रोहि पारितोषिकं दापयामास ॥ अथ कस्यामपि निशि हिमसमये वीरचर्यया नृपतिः परिभ्रमन्कस्यापि देवकुलस्य पुरः कमपि पुरुषं ॥

शीतेनोद्धुषितस्य[2] माषफलवच्चिन्तार्णवे मज्जतः
शान्तोग्निः स्फुटिताधरस्य धमतः क्षुत्क्षामकुक्षेर्मम।
निद्रा काप्यवमानितेव दयिता संत्यज्य दूरं गता
सत्पात्रप्रतिपादितेव कमला[3] न क्षीयते शर्वरी ॥ १

इति पठन्तं । श्रुत्वा निशान्तमतिवाह्य तं प्रातराहूय पप्रच्छ। कथंभवता निशाशेषेऽत्यन्तशीतोपद्रवः सोढः । सत्पात्रप्रतिपादितेति संकेतपूर्वं समादिष्टं । स्वामिन्मया घनत्रिवेलीबलेन शीतमतिवाह्यते स इति विज्ञपयन् , का तव त्रिवेलीति

---

१ D अथ तन्नगरनिवासी कोपि द्विजः केवलभिक्षामात्रवृत्तिः कस्मिन्नपि पर्वणि स्नानव्याकुले सकलेपि नगरलोके अलब्धभिक्षया रिक्तताम्रपात्र एवागत इति ब्राह्मण्या निर्भर्त्स्यमानः संजातकलहे तां, प्रति प्रदत्तप्रहारं आरक्षपुरुषैः संयम्य राजमंदिरे नीयमानो राज्ञा पृष्टः सन्नाह । अम्बा तुष्यतीति श्लोकं पपाठ । तदर्थं पण्डितेष्वनवबुध्यमानेषु राज्ञा स्वमनीषया तदभिप्रायं समुपालभ्य तस्मै लक्षत्रये दापिते सति श्लोकार्धं कलहमूलं तदपि दारिद्र्यमूलं नृपो व्याचख्यौ ॥ २ D उद्धूषितस्य. ३ वसुधा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूयोभिहित इदमपाठीत् ।

रात्रौ जानुर्दिवा भानुः कृशानुः सन्ध्ययोर्द्वयोः ।
राजन् शीतं मया नीतं जानुभानुकृशानुभिः १
स इत्थं वदन् राज्ञा लक्षत्रयदानेन परितोषितः ।
धारयित्वा त्वया मानमहो त्यागाध्वनाधुना ।
मोचिता बलिकर्णाद्याः सज्ञेतोगुप्तिवेश्मनः १

इति सारस्वतोद्गारपूरपरे तत्पारितोषिकदानाक्षमेण राज्ञा सोपरोधं निवारितः । अन्यस्मिन्नवसरे राजा राजपाटिकाया गजारूढः पुरान्तरा संचरन्कमपि रोरं[२] भूमिपतितकणांश्चिन्वन्तमवलोक्य ।

*[नियउयरपूरणम्मि य असमत्था किंपि तेहि जाएहिं ।

इति तेनार्द्धकविना पूर्वार्द्धे प्रोक्ते ।

*[सुसमत्था वि हु न परोवयारिणो तेहि वि नहि किंपि[3] ॥ १ ॥

इति तद्वचनान्ते ॥

---

* (निजोदरपूरणे येऽसमर्थाः तैर्जातैरपि किं ।

* (सुसमर्था अपि निश्चयेन ये परोपकारिणो न तैर्जातैरपि किं नहि किमपि ॥ १

[१ कारागात्. २ दरिद्रं.] ३ D न किंपि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*परपत्थणापवत्तं मा जणणि जणेसु एरिसं पुत्तं ।
इति तद्वाक्यादनु ।
"मा पुहवि मा धारिज्जसु पत्थणभङ्गो कओ जेहिं२
स इति वदन्कस्त्वमिति राज्ञाभिहितो नगरप्र-
धानैर्भवद्विविधविद्वद्घटायामपरथा प्रवेशमलभमा-
नोऽनेनैव प्रपञ्चेन स्वामिदर्शनचिकीरयं राजशेखर-
*इति ज्ञापितः ।

तदुचितमहादानैः प्रसादीकृते ।

भेकैः कोटरशायिभिर्मृतमिव क्ष्मान्तर्गतं कच्छपैः
पाठीनैः पृथुपङ्कपीठलुठनाद्यस्मिन्मुहुर्मूर्छितम् ।
तस्मिन्नेव सरस्यकालजलदेनोन्नम्य तच्चेष्टितं
येनाकुम्भनिमग्नवन्यकरिणां यूथैः पयः पीयते॥१॥

---

* (परप्रार्थनाप्रवृत्तमीदृशं पुत्रं हे जननि मा जनय ।
* (हे मातः हे पृथिवि यैः प्रार्थनाभङ्गः कृतस्तादृशान्पुरुषान्मा धारय ॥ २) १ A मा पुरवि

---

* १ D इति ज्ञात्वेऽविप्राय हस्तिनीं ददौ
पुनः स विप्रः
निर्वीता न कुटी न चाग्निशकटी नापि द्वितीया पटी
वृत्तिर्नारजटी न तुन्दिलपुटी चूर्णौ च गृष्टा कटी ।
तुष्टिर्नैकघटी प्रिया न वधुटी तेनाप्यहं संकटी
श्रीमद्भोज तव प्रसादकरटी भद्रन्तां ममापत्तटी ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यकालजलदराजशेखरोक्तिः । कस्मिन्नपि संवत्सरे वृष्ट्यभावात्कणतृणानामप्राप्त्या स्थानपुरुषैर्भोजागमं ज्ञापितः श्रीभीमश्चिंतां प्रपन्नो डामरनामानं सन्धिविग्रहिकमादिशत् । यत्किमपि दण्डं दत्वाऽस्मिन्वर्षे श्रीभोज इहागच्छन्निवारणीयः। स इति तदादेशात्तत्र गतोऽत्यन्तविरूपवान्परार्चित्तज्ञः श्रीभोजेनेत्यभिदधे[1] ।

यौष्माकाधिपसन्धिविग्रहपदे दूताः कियन्तो वद
मादृक्षा[2] बहवोपि मालवपते ते सन्ति तत्र त्रिधा।
प्रेष्यन्ते[3] ऽधममध्यमोत्तमगुणप्रेक्षानुरूपक्रमा-
त्तेनान्तःस्मितमुत्तरं विदधता धाराधिपो रञ्जितः[4]॥१

- इति श्रुत्वा तेनैकादशसहस्राणि दत्तानि ॥
अथ राजशेखरनामा कविः संध्यायां महाकालप्रसादे सुप्तः पठति
पोतानेतान्जय गुणवति ग्रीष्मकालावसानं
यावत्तावच्छवय रुदतो येन केनाशनेन ।
पश्चादम्भोधररसपरीपाकमासाद्य तुम्बी
कुष्माण्डी च प्रभवति यदा के वयं तूजुलः कें ॥ १
प्रसन्नेन राज्ञा सर्वस्वदानात्तोषितेन कविनोक्तं भेकैरिति ॥.

---

१ D अथैकदा डामरनामा नागरज्ञातीयो द्विजः श्रीभोजसभायां गतो राज्ञोपहासपूर्वं २ द्विज त्वादृक्षा. ३ प्रेक्षन्ते

४ C D रञ्जितः ॥ १ ॥ श्रीभोजराजा गूर्जरोपरि कृतप्रस्थानो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*इति तद्वचनचातुर्यचमत्कृतो राजा गूर्जरदेशं प्रति प्रयाणपटहदानं चक्रे। प्रयाणावसरे बन्द्योक्तं।

चौलैःक्रोडं पयोधेर्विशति निवसते रन्ध्रमन्ध्रो गिरीन्द्रे
कर्णाटः पट्टबन्धं न भजति भजते गूर्जरो निर्झराणि।
चेदिर्लीयतेऽस्त्रैः क्षितिपतिसुभटः कन्यकुब्जोत्र कुब्जो
भोज त्वत्तन्त्रमात्रप्रसरभयभरव्याकुलो राजलोकः१

कोणे कौङ्कणकः कपाटनिकटे लाटः कलिङ्गोङ्गणे-
त्वं रे कोशल नूतनो मम पिताप्पत्रोषितः स्थाण्डिले।

- बाह्यावासे कृतस्नानो भेटितः सनूराज्ञोचे डामराख्यः। जीमडी-याको नापितोऽद्य कल्ये किं करोति। तेनोक्तं। अन्येषां राज्ञां शिरोमुण्डितमेकस्य शिरो जलनिम्नमास्ते पश्चान्मुण्डयिष्यती-ति भणिते राज्ञा चमत्कृतेन राजजुवने राजविडम्बननाटके चित्रे डामरस्वामी कर्णाटराजश्चाटूनि कुर्वन् दर्शित:। दूतेनोक्तं।

भोजराज मम स्वामी यदि कर्णाटभूपतेः२।
कराकृष्टो३ न पश्यामि कथं मुञ्जशिरः करे॥ १

इति वाक्येन स्मृतपूर्ववैरः गूर्जरदेशं परित्यज्य कर्णाटोपरि प्रयाणं कृतवान्। नृपाग्रे डामरस्योक्तिः।

सत्यं त्वं भोज मार्त्तण्ड पूर्वस्यां दिशि राजसे।
सूरोपि लघुतामेति पश्चिमाशावलम्बने॥ १॥

१ A B चौडः २ B D जूणतिः ३ कचाकृष्टं.

इत्थं यस्य विवर्द्धितो निशि मिथः प्रत्यर्थिनां संस्तर-स्थानन्यासभुवा विरोधकलहः कारानिकेतक्षितौ २

प्रयाणकपटहदापनादनु समस्तराजविडम्बना-टकेऽभिधीयमाने । सकोपः कोपि भूपः कारागारा-न्तरास्थितं सुस्थितं तैलिपं भूपमुत्थापयंस्तेनोचे । अहमिहान्वयवासी कथमागन्तुकभवद्वचसा निजं पदमुज्झामीति विहसन्नृपो डामरं प्रति नाटकरसा-वतारं प्रशंसंस्तेनाभिदधे । देवातिशायिन्यपि रसा-वतारे धिग्भटस्य कथानायकवृत्तान्तानभिज्ञताम्। यतः श्रीतैलिपदेवराजः शूलिकाप्रोतमुञ्जराजशि-रसा प्रतीयत इति सभासमक्षं तेनोक्ते तन्निर्भ-त्सनसंपन्नमन्युरनन्यसामग्र्या तदैव तिलङ्गदेशं प्र-ति प्रयाणमकरोत् । अथ तैलिपदेवस्यातिबल-मायान्तमाकर्ण्य व्याकुलं श्रीभोजं डामरः स-मायातः कल्पितराजादेशदर्शनपूर्वं भोगपुरे श्री-भीमं समायातं विज्ञपयामास । तया तद्वार्त्तया क्षते क्षारनिक्षेपसदृक्षया विलक्षीक्रियमाणः श्रीभो-जराजो डामरमभ्यधात्। अस्मिन्वर्षे त्वया स्व-स्वामी कथंचनेहागच्छन्निवार्य इति भूयो भूयः सदैन्यं भाषमाणे नृपे प्रस्तावविन्नृपाद्धस्तिनीस

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हितं हस्तिनमुपायने उपादाय पत्तने श्रीभीमं परितोषयामास । कस्मिंश्चिद्धर्मशास्त्राकर्णनक्षणेऽर्जुनस्य राधावेधमाकर्ण्य किमभ्यासस्य दुष्करमिति विमृशन्सततताभ्यासवशाद्विश्वविदितं राधावेधं विधाय नगरे हट्टशोभां कारयंस्तैलिकशूचिकाभ्यामवज्ञया निराकृतोत्सवाभ्यां श्रीभोजभूपो व्यज्ञप्यत। तैलिकेन चन्द्रशालास्थितेन भूमिस्थितसंकीर्णवदने मृन्मयपात्रे तैलधाराधिरोपणात्,सूचिकेन च भूमिस्थितेनोर्द्ध्वीकृततन्तुमुखे आकाशात्पतन्त्याः शूच्या विवरं नियोज्य निजाभ्यासकौशलं निवेद्य नृपं प्रति चेच्छक्तिरस्ति ततः प्रभुरप्येवं करोत्वित्यभिधाय राज्ञो गर्वं खर्वं चक्राते ॥

भोजराज मया ज्ञातं राधावेधस्य कारणम् ।
धाराया विपरीतं हि सहते न भवानिति ॥ १ ॥

विद्वद्भिरिति श्लाघ्यमानो नवनगरनिवेशं कर्तुकामः पटहे वाद्यमाने धाराभिधया पणस्त्रियाग्निवेतालनाम्ना पत्या सह लङ्कां गत्वा तं नगरनिवेशमालोक्य पुनः समागतया मन्नाम नगरे दातव्यमित्यभिधाय तत्प्रतिच्छन्दपटं समर्प्य सा धारां नगरीं निवेशयामास । कस्मिन्नप्यहनि स-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नृपः सान्ध्यसर्वावसरानन्तरं निजनगरान्तः परिभ्रमन् ॥

*एऊ जम्मु नग्गुहं गिउ भडसिरिखग्गु न भग्गु ।
तिक्खां तुरियां न माणियां गोरी गलि न लग्गु॥१

‡ इति केनापि दिगम्बरेण पठ्यमानमाकर्ण्य प्रातस्तमाकार्य रात्रिपठितवृत्तान्तसंकेतवशेन शक्तिं पृष्टः सन्

देव दीपोत्सवे जाते प्रवृत्ते दन्तिनां मदे।
एकच्छत्रं करोम्येव सगौडं दक्षिणापथम् ॥ २

इति स्वपौरुषमाविः कुर्वन्सेनानीपदेऽभिषिक्तः। सिन्धुदेशविजयप्रावृत्ते श्रीभीमे स दिगम्बरः समस्तसामन्तैः समं समेत्य श्रीमदणहिल्लपुरं भङ्गं कृत्वा धवलगृहघटिकाद्वारे कपर्दिकान्वापयित्वा जयपत्रं जग्राह। तदादि कुलचन्द्रेण मुषितमिति सर्वत्र क्षितौ ख्यातिरासीत् । स जयपत्रमादाय मालवमण्डले गतः श्रीभोजाय तं वृत्तान्तं विज्ञपयन्नुक्तो

* एतज्जन्य गतं नग्नोहं भटश्रीखड्गो न भग्नः तीक्ष्णाः खड्किटाङ्गाम्बूलिकादिशय्योपकरणानि च नानुभूतानि देशी० यतो गौरीगले खड्गकण्ठे न लग्नः ॥ १ ॥ !

‡ आउ जम्मु निग्गहं Λ नग्गहं [आगतं जन्म यद्वायुः। निर्गृहं]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवतेङ्गालवापः कथं न कारितोऽत्रत्यमुद्ग्राहितं गूर्जरदेशे प्रयास्यतीति[1] श्रीसरस्वतीकण्ठाभरणेन श्रीभोजेनेत्यभिदधे ॥ कदाचिच्चन्द्रातपे उपविष्टः श्रीभोजः संनिहिते कुलचन्द्रे पूर्णचन्द्रमण्डलमवलोकमान इदमपाठीत् ॥

येषां वल्लभया सह क्षणमिव क्षिप्रं क्षपा क्षीयते
तेषां शीतकरः शशी विरहिणामुल्केव संतापकृत्॥

इत्यर्द्धं कविना तेनोक्ते कुलचन्द्रः प्राह ।

अस्माकं तु न वल्लभा न विरहस्तेनोभयभ्रंशिनामिन्दू राजति दर्पणाकृतिरसौ नोष्णो न वा शीतलः ।

इति तदुक्तेरनन्तरमेवैकां वराङ्गनां प्रसादीचकार ॥

अथ डामरनामा सन्धिविग्रहिको मालवमण्डु-

---

१ ० नवजलभरीया मग्गडा गयणि धहडकइ मेहु ।
इत्थन्तरि जरि आविसिइ तउ जाणीसिइ नेहु ॥
[नवजलभरिता मार्गा गगने गर्जति मेघः ।
अत्रान्तरे यद्यागमिष्यसि ततो ज्ञायते स्नेहः ॥]

एषां भवि (धर्म)जभया सह राज्ञा तन्निजपुत्रीस्वरूपं दृष्टं प्रातराकार्य गूर्जरदेशोपरि सेनाधिपत्यं ददौ तदा तेनोक्तं । देव दीपेति॥ ततो गूर्जरदेशः समग्रोपि तेन विनाशितः । श्रीपत्तनचतुःपथे कपर्दिका वापितास्तस्यागतस्य राज्ञोक्तं । न कृतं रम्यं । अद्य प्रभृति मालवदेशदण्डः श्रीगूर्जरे यास्यतीति ॥ कपर्दिका मालवकदेशीयनाणकम्॥

11

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लादायातः श्रीभोजस्य सभां वर्णयन्महान्तमायल्लकं[1] जनयति। तत्र गतश्च श्रीभीमस्यामात्रां रूपपात्रतां वर्णयंस्तद्दिदृक्षातरलितः श्रीभोजस्तमिहानय तत्र मां नयेति वेत्यभ्यर्थ्यमानः। सभादर्शनोत्कण्ठितेन भीमेन तथैवोच्यमानश्च कस्मिन्नपि वर्षे उपायविन्महदुपायनमादाय विप्रवेषधारिणं ताम्बूलकरण्डकवाहिनं श्रीभीमं स गृहीत्वा सदसि गतः प्रणमन्,श्रीभोजेन श्रीभीमानयनवृत्तान्तं व्याहृतः स विज्ञपयांचक्रे। स्वतन्त्राः स्वामिनोऽभिमतं कार्यं केन बलात्कार्यन्ते, इति सर्वथाप्येके दासा देवेन नावधीरणीया[2] इत्यभिधाय, श्रीभीमस्य वयोवर्णाकृतीनां सादृश्यं पृच्छञ्श्रीभोजस्तान्सभासदो लोकानवलोकयन्स्थगीधरं लक्षीकृत्य डामरेणेत्यभिदधे। स्वामिन्

इमाकृतिरयं वर्ण इदं रूपमिदं वयः।
अन्तरं चास्य भूपस्य काचचिन्तामणेरिव ॥ १ ॥

इति तेन विज्ञप्ते चतुरचक्रवर्ती श्रीभोजस्तत्सामुद्रिकाविलोकनान्निश्चलदृग्तादृशं नृपं विमृश्योपायनवस्तून्युपनेतुं स सन्धिविग्रहिकस्तं प्राहिणोत्।

---

१ आश्चर्यं. २ न तिरस्कर्तुं योग्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषु वस्तुषूपनीयमानेषु तद्गुणवर्णनवार्तान्तरव्याक्षेपेण च भूयसि कालविलम्बे संवृत्ते स्थगीवाहको ऽद्यापि कियच्चिरं विलम्बत इति राज्ञा समादिष्टः स तं भीममिति विज्ञपयामास। राजा तदा तदनुपदिकानि सैन्यानि प्रगुणयन् डामरेणाभिदधे। द्वादश २ योजनानां प्रान्ते प्रावहणिका हया घटिकायोजनगामिन्यः करभ्योनया समग्रसामग्र्या श्रीभीमो भुवमाक्रमन्कथं भवता गृह्यते इति विज्ञप्तस्तेन पाणी घर्षयित्वा चिरं तस्थे। अथ श्रीभोजः श्रीमाघपण्डितविद्वत्तां पुण्यवत्तां च सततमाकर्ण्य तद्दर्शनोत्सुकतया राजादेशैः सततं प्रेष्यमाणैः श्रीमालनगराद्धिमसमये समानीय सबहुमानं भोजनादिभिः सत्कृत्य तदनु राजोचितान्विनोदान्दर्शयन्, रात्रावारात्रिक्रावसरानन्तरं संनिहिते स्वसंनिभे पल्यङ्के माघपण्डितं नियोज्य तस्मै स्वशीतरक्षामुपनीय प्रियालापांश्चिरं कुर्वाणः सुखं सुखेन सुष्वाप। प्रातर्माङ्गल्यतूर्यनिर्घोषैर्विनिद्रं नृपं स्वस्थानगमनायं माघपण्डित आपृष्टवान्। विस्मयापन्नहृदयेन राज्ञा दिने भोजनाच्छादनादिसुखं पृष्टः स क-

१ D कुमुदपण्डितमुनयाय. २ C आकर्ण्य तु

दन्नसदन्नवार्त्ताभिरलं शीतभारेण[1] श्रान्तं विज्ञपय-न्खिद्यमानेन राज्ञा कथं कथञ्चिदनुज्ञातः पुरोपवनं यावद्भुजानुगम्यमानः माघपण्डितेन स्वागमनप्र-सादेन संभावनीयोऽहमिति विज्ञप्तो नृपानुज्ञातः स्वं पदं भेजे । तदनु कतिपयादिनैः श्रीभोजस्तद्वि-भवभोगसामग्रीदिदृक्षया श्रीश्रीमालनगरं प्राप्तः । माघपण्डितेन प्रत्युद्गमादियथोचितभक्त्याऽऽवर्जितः ससैन्यस्तन्मन्दुरायां ममौ । स्वयं तु माघपण्डित-स्य सौधमध्यास्य संचारकभुवं काञ्चनबद्धामवलो-क्य स्नानादनु देवतावसरोर्व्यां मणिमरकतकुट्टि-मशैवलवल्लरीयुग्जलभ्रान्त्या धौताम्बरीयं संवृण्व-न् सौवस्तिकेन[2] ज्ञापितवृत्तान्तस्तदैव तद्देवतार्चान-न्तरं निवृत्ते मन्त्रावसरेऽशनसमयसमागतां रसव-तीमास्वादमान आकालिकैर्देशजैर्वयज्ञनैः फला-दिभिश्चित्रीयमानमानसः संस्कृतपयःशालिशालिनीं रसवतीमाकण्ठमुपभुज्य भोजनान्ते चन्द्रशालाम-धिरुह्याश्रुतादृष्टपूर्वकाव्यकथाप्रबन्धप्रेक्ष्यादीनि प्रे-क्षमाणः शिशिरसमयेपि संजाताकस्मिकग्रीष्मभ्रा-न्त्या संवीतासितस्वच्छवसनस्तालवृन्तकैररनुचैर-

---

१ C शीतरङ्गतारेण. २ स्वस्तिवत्का सेवकेन.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीज्यमानोऽमन्दचन्दनालेपनेपथ्यः सुखनिद्रया तां क्षणदां क्षणमिवातिवाह्य प्रत्यूषे शङ्खनिस्वनाद्विगतनिद्रो हिमसमये ग्रीष्मावतारव्यतिकरो माघपण्डितेन ज्ञापितः प्रतिसमयं सविस्मयः कति दिनान्यवस्थाय स्वदेशगमनायाप्टच्छन् स्वयं करिष्यमाणनव्यभोजस्वामिप्रसादप्रदत्तपुण्यो[1] मालवमण्डलं प्रति प्रतस्थे। तथा निजजन्मदिने जनकेन नैमित्तिकाज्जातके कार्यमाणे पूर्वमुदितोदितसमृद्धिर्भूत्वा प्रान्ते गलितविभवः किंचिच्चरणयोराविर्भूतश्वयथुविकारः पञ्चत्वमाप्स्यतीति । निमित्तविदा निवेदितां विभवसंभारेण तां ग्रहगतिं निराचिकीर्षुणा माघपिता संवत्सरशतप्रमाणे मनुजायुषि षट्त्रिंशत्सहस्राणि दिनानि भविष्यन्तीति विमृश्य नाणकपरिपूर्णास्तावत्संख्यान् हारकान् कारितनव्यकोशेषु निवेश्य तदधिकां परां भूतिं शतशः समर्प्य प्रदत्तमाघनाम्ने सुताय कुलोचितां शिक्षां वितीर्य कृतकृत्यमानिना तेन विपेदे । तदनन्तरमुत्तराशापतिरिव प्राज्यसाम्राज्यो विद्वज्जनेभ्यः श्रियं तदिच्छया यच्छन्नमानैर्दानैरर्थिसार्थै

---

१ तन्नामकग्रन्थस्यापि श्रेयाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतार्थयंस्तैर्भोगविधिभिः स्वममानुषावतारमिव दर्शयन् विरचितशिशुपालवधाभिधानमहाकाव्यचमत्कृतविद्वज्जनः स प्रान्ते पुण्यक्षयात्क्षीणवित्तो विपत्तिपाते स्वविषये स्थातुमप्रभूष्णुः सकलत्रो मालवमण्डले गत्वा धारायां कृतावासः पुस्तकग्रहणकार्पणपूर्वकं श्रीभोजात्किंयदपि द्रव्यमानेयमिति तत्र पत्नीं प्रस्थाप्य यावत्तदाशया माघपण्डितश्चिरं तस्थौ । तावत्तथावस्थां श्रीभोजस्तत्पत्नीं विलोक्यससंभ्रमाशलाकान्यासेन तत्पुस्तकमुन्मुद्य काव्यमद्राक्षीत् ॥

कुमुदवनमपश्रि श्रीमदभ्भोजखण्डं
त्यजति मदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिललितानां ही विचित्रो विपाकः ॥ १ ॥

अथ काव्यार्थमवगम्य का कथा ग्रन्थस्य केवलमस्यैव काव्यस्य विश्वम्भरामूल्यमल्यं समयोचितस्यानुच्छिष्टस्य हीशब्दस्य पारितोषिके क्षितिपतिर्लक्षद्रव्यं वितीर्य तां विससर्ज । सापि ततः संचरन्ती विदितमाघपण्डितपत्नी कैश्चिद्भिरर्थीभिर्याच्यमाना तत्पारितोषिकं तेभ्यः समस्तमपि वितीर्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथावस्थिता गृहमुपेयुषी तद्वृत्तान्तं विज्ञापनापूर्वं किञ्चिच्चरणस्फुरच्छोफाय पत्ये निवेदयामास । अथ त्वमेव मे शरीरिणी कीर्त्तिरिति श्लाघमानस्तदा स्वगृहमागतं कमपि भिक्षुं वीक्ष्य भुवने तदुचितं किमपि देयमपश्यन् संजातनिर्वेद इदमवादीत् ॥

अर्था न सन्ति न च मुञ्चति मां दुराशा
दार्नद्धि सङ्कुचति दुर्ललितः करो मे ।
याञ्चा च लाघवकरी स्ववधे च पापं
प्राणाः स्वयं व्रजत किं परिदेवितेन ॥ १ ॥
दारिद्र्यानलसंतापः शान्तः संतोषवारिणा ।
दीनाशाभङ्गजन्मा तु केनायमुपशाम्यतु ॥ २ ॥
व्रजत व्रजत प्राणा अर्थिनि व्यर्थतां गते ।
पश्चादपि हि गन्तव्यं क्व सार्थः पुनरीदृशः ॥ १ ॥
न भिक्षा दुर्भिक्षे पतति दुरवस्थाः कथमृणं
लभन्ते कर्माणि क्षितिपरिवृढान्कारयति कः ।
अदत्त्वापि ग्रासं ग्रहपतिरसावस्तमयते
क्व यामः किं कुर्मो गृहिणि गहनो जीवितविधिः २
क्षुत्क्षामः पथिको मदीयभवनं पृच्छन्कुतोप्यागतः

१ D द्विज.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्किं गेहिनि किंचिदस्ति यदयं भुङ्क्ते बुभुक्षातुरः। वाचास्तीत्यभिधाय नास्ति च पुनः प्रोक्तं विनैवाक्षरैः स्थूलस्थूलविलोललोचनजलैर्बाष्पाम्भसां बिन्दुभिः ॥ ३ ॥

इति तद्वाक्यान्त एव स माघपण्डितः[2] पञ्चत्वमवाप। प्रातस्तं वृत्तान्तमवगम्य श्रीभोजेन श्रीमालेषु सजातिषु धनवत्सु सत्सु तस्मिन्पुरुषरत्ने विनष्टे क्षुधाबाधिते सति भिल्लमाल इति तज्ज्ञातं* नाम[3] निर्ममे ॥

पुरा समृद्धिविशालायां विशालायां पुरि मध्यदेशजन्मा काश्यपगोत्रः सर्वदेवनामा द्विजो निवसन् जैनदर्शनसंसर्गात्प्रायः प्रशान्तमिथ्यात्वो धनपालशोभनपुत्रद्वयेनान्वितः कदाचिदागतान्श्रीवर्द्धमानसूरीन्गुणानुरागान्निजोपाश्रये निवास्य निर्द्वन्द्वभक्त्या परितोषितान्सर्वज्ञपुत्रानिति धिया तिरोहितं निजपूर्वजनिधिं पृच्छंस्तैर्वचनच्छलेनार्द्धविभागं याचितः संकेतनिवेदनाल्लब्धनिधिस्तदर्द्धं यच्छंस्तैः पुत्रद्वयादर्द्धं याचितो ज्यायसा धनपालेन मिथ्या-

१ B C गलद्बाष्प. २ क सार्थः पुनरीदृश इति वाक्यान्ते ३ इति ज्ञानात्तज्ज्ञातेर्नाम

* तेन कर्मणा प्रसिद्धं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वान्धमतिना जैनमार्गनिन्दापरेण निषिद्धः कनीयसि शोभने कृपापरः स्वप्रतिज्ञाभङ्गपातकं तीर्थेषु क्षालयितुमिच्छुः प्रतितीर्थं प्रतस्थे। अथ पितृभक्तेन शोभननाम्ना लघुपुत्रेण तं तदाग्रहान्निषिध्य पितुः प्रतिज्ञां प्रतिपालयितुमुपात्तव्रतः स्वयं तान्गुरूननुससार। अभ्यस्तसमस्तविद्यास्थानेन[1] धनपालेन श्रीभोजप्रसादसंप्राप्तसमस्तपण्डितप्रकृष्टप्रतिष्ठेन निजसहोदरामर्षभावाद्द्वादशाब्दीं यावत्स्वदेशानिषिद्धजैनदर्शनप्रवेशेन तद्देशोपासकैरत्यर्थमभ्यर्थनया गुरुपुरुषेष्वाहूयमानेषु सकलसिद्धान्तपारावारपारदृश्वा स शोभननामा तपोधनो गुरूनापृच्छ्य तत्र प्रयातो धारायां प्रविशन् पण्डितधनपालेन राजपाटिकायां व्रजता तं सहोदरमित्यनुपलक्ष्य सोपहासं गर्दभदन्त भदन्त नमस्ते इति प्रोक्ते कपिवृषणास्य वयस्य सुखं ते इति शोभनमुनेर्वचसान्तश्चमत्कृतो मया नर्मणापि नमस्ते इत्युक्तेऽनेन तु वयस्य सुखं ते इत्युच्चरता वचनचातुर्यान्निर्जितोस्मीति। तत्कस्यातिथयो यूयमिति धनपालस्यालापैर्भवत एवातिथयो वयमिति शोभनमुने-

१ पठितपुराणन्यायमीमांसाधर्मशास्त्रवेद४वेदाङ्गेन६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाचमाकर्ण्य बटुना सह निजसौधे प्रस्थाप्य तत्रैव स्थापितः । स्वयं सौधे समागत्य धनपालः प्रियालापैः सपरिकरमपि तं भोजनाय निमन्त्रयंस्तैः प्रासुकाहारसेवापरैर्निषिद्धः । बलाद्दोषहेतुं पृच्छन्

भजेन्माधुकरीं वृत्तिं मुनिर्म्लेच्छकुलादपि ।
एकान्नं नैव भुञ्जीत बृहस्पतिसमादपि ॥ १ ॥

तथाच । जैनसमये दशवैकालिके ॥

*महुकारसमा बुद्धा जे भवन्ति अणिस्सिया ।
नाणापिण्डरया दन्ता तेण वुच्चन्ति साहुणो ॥ १

. इति स्वसमयपरसमयाभ्यां निषिद्धं कल्पितैमाहारं परिहरन्तः शुद्धाशनभोजिनो वयमिति तच्चरित्रचित्रितमनाः सतुष्णीकमुत्थाय सौधमाप । मज्जनारम्भे गोचरचर्यया समागतं तन्मुनिद्वन्द्वमवलोक्य सिद्धेऽन्नपाके तद्ब्राह्मण्योपढौकिते दध्नि मुनिभ्यां, व्यतीतकियद्दिनमेदादिति पृच्छ्यमाने, धनपालः किमत्र पृतराः सन्तीति सोपहासमभिदधानो, व्य-

* मधुकरसमा भ्रमरवृत्तयः, बुद्धा ये भवन्ति, अनिश्रिता निश्रादोषरहिताः, नानापिण्डरता दान्ताः तेन हेतुना साधव उच्यन्ते ॥

१ जिनोक्तजीवहिंसारहिताहारसेवनतत्परैः २ कमपि साध्वादिकमुद्दिश्य निष्पादितं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीतदिनद्वयमेदिति ब्राह्मण्या निर्णीय प्रोक्तं ताभ्यां पूतराः सन्तीत्पत्रेत्यभिहिते स्नानासनात्तद्दर्शनार्थ-मुत्थाय तत्रागतः सन्, स्थालेधिरोपितदधिसंनिधौ यावद्यावकपुम्भेऽधिरूढैस्तद्वर्णजन्तुभिर्दधिपिण्ड इव पाण्डुरतामालोक्य जिनधर्मे जीवदयाप्राधान्यं तं-त्रापि जीवोत्पत्तिज्ञानवैदग्ध्यं ॥ यतः॥

*मुग्गमासाइपमुहं[२] विदिलं कच्चम्मिं[३] गोरसे पडइ।
ता तसजीवुप्पत्ती भणन्ति दहिए तिदिणुव्वरिएँ[४] १

तज्जिनशासने एवेति निश्चित्य शोभनमुनेः शोभनबोधात्सम्यक्त्वप्रतिपत्तिपुरःसरं सम्यक्त्वं भे-जे। कर्मप्रकृत्यादिजैनविचारग्रन्थेषु प्रकृत्या प्रा-ज्ञः परंप्रावीण्यमुद्वहन,प्रातः प्रातर्जिनार्चावसरप्रान्ते कतिपयपुरस्वामी कायव्ययैरपि दुर्ग्रहो
मतिवितरता मोहेनाहो मयानुसृतः पुरा।
त्रिभुवनपतिर्बुद्ध्याराध्योऽधुना स्वपदप्रदः।
प्रभुरधिगतस्तत्प्राचीनो दुनोति दिनव्ययः॥ १ ॥

[* मुद्गमाषादिप्रमुखं द्विदलं अपक्वे गोरसे पतति तदा त्रसजी-वोत्पत्तिं भणन्ति दधि त्रिदिनोद्धरिते च]

१ सालक्तककार्पासतूलवर्तिकायामित्यर्थः २ (पतिं.

3 पटम्मि ४ त्रिदिनिदिण्डतरि ५ प्रतिपन्नः

*सव्वत्थं अत्थि धम्मो जा मुणियं जिन न सासणं तुम्ह ।
कणगाउराण कणगुव्वसासियपयमलम्भमाणाणं[1]
देशाधीशो ग्राममेकं ददाति
ग्रामाधीशः क्षेत्रमेकं ददाति ।
क्षेत्राधीशः शिम्बिकाः संप्रदत्ते
सॅर्वस्तुष्टः संपदं स्वां ददाति ॥ १ ॥

इत्यादीनि वाक्यानि पठन्स धनपालः कदाचिन्नृपेण सह मृगयां नीतो धनपालोऽभिहितः

किं कारणं नु धनपाल[4] मृगा यदेते
व्योमोत्पतन्ति विलिखन्ति भुवं वराहाः ।
देव त्वदस्त्रचकिताः श्रयितुं स्वजाति-
मेके मृगाङ्कमृगमादिवराहमन्ये ॥ १ ॥

राज्ञा बाणेन मृगे विद्धे सति तद्वर्णनाय विलोकितमुखो धनपालः प्राह ।

---

* सर्वत्र धर्मोऽस्ति यावत् ज्ञातं हे जिन न शासनं तव । कनकानुराणां कनकमिव स्वसितपदमलभ्यमानां ॥ यथा धत्तूररसमत्ताः सर्वत्र कनकं पीतवर्णं पश्यन्ति यतः स्वस्य धवलपदं शुद्धपदं न प्राप्ता विपरीतं पश्यन्तीत्यर्थः। यद्वा श्वसितपदं विश्वासयोग्यं स्थानं यामुणियं माथुरसंघमिति वा (घ)]

१ C सच्चत्थ २ कणगं व. ३ A सेतिकां B शाकमात्रं ४ सर्वज्ञः ५ B C कविराज.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रसातलं यातु तवात्र पौरुषं
कुनीतिरेषा शरणो[1] ह्यदोषवान् ।
निहन्यते यद्बलिनापि दुर्बलो
ह्ह हा महाकष्टमराजकं जगत् ॥ २ ॥

इति तन्निर्भर्त्सनात्क्रुद्धो नृपः किमेतदित्यभिदधाने [2]वैरिणापि हि मुच्यन्ते प्राणान्ते तृणभक्षणात् ।
तृणाहाराः सदैवैते हन्यन्ते पशवः कथम् ॥ १ ॥

इत्यूचेऽतोऽद्भुतसंजातकृपेण नृपेण धनुर्बाणभङ्गमङ्गीकृत्याजीवितान्तं संन्यस्तमृगयाव्यसनेन पुरं प्रत्यागच्छता तत्र यज्ञमण्डपे यज्ञस्तम्भनियन्त्रितच्छागस्य दीनां गिरमाकर्ण्य किं पशुरसौ व्याहरतीत्यादिष्टः स धनपालोऽवधेहीति प्राह ॥

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया
संतुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव ।
स्वर्गं याति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो
यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ॥ १ ॥

इति तद्वाक्यानन्तरं राज्ञा किमेतादिति भूयोभियुक्तः।

---

१ शरणागतः (२ C अत्र धनपालः । रसातलमित्यादि० तन्निर्भर्त्सनात्क्रुद्धो नृपः किमेतदित्यभिदधानः वैरिणोपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यूपं कृत्वा पशून्हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे नरके केन गम्यते ॥ २ ॥
सत्यं यूपं तपो ह्यग्निः कर्माणि समिधो[1] मम ।
अहिंसामाहुतिं दद्यादेवं यज्ञः सतां मतः[2] ॥ ३ ॥

इत्यादि शुकसंवादोदितानि[3] वचांसि नरेन्द्रस्य पुरतः पठन् हिंसाशास्त्रोपदेशिनो हिंसकप्रकृतीन्ब्राह्मणरूपेण राक्षसांस्ताञ्ज्ञापयन्नृपमहर्द्धर्माभिमुखं चकार ॥ अथ कस्मिन्नप्यवसरे नरेश्वरः सरस्वतीकण्ठाभरणप्रासादे व्रजन्सदा सर्वज्ञशासनप्रशंसापरं पण्डितं धनपालमालपत् । सर्वज्ञस्तावत्कदाचिदासीत्तद्दर्शने साम्प्रतं कश्चिज्ज्ञानातिशयोस्तीत्यभिहिते, अर्हत्कृतेऽर्हच्चूडामणिग्रन्थे[4] विश्वत्रयस्यत्रिकालवस्तुविषयस्वरूपपरिज्ञानमद्यापि विद्यत इति तेनोक्ते, त्रिर्द्वारमण्डपे स्थितः कस्मिन्द्वारेऽस्माकं निर्गम इति शास्त्रकलङ्कारोपणोद्यते नृपे बुद्धिमात्रा त्रयोदशीति पाठं सत्यापयता भूर्जपत्रे नृपप्रश्ननिर्णयमालिख्य मृण्मयगोलके निधाय च

---

१ C प्राणाः समिधो २ एष यज्ञः सनातनः ३ श्रुतिसंवाद० ४ D अर्हन्नश्रीचूडामणिनामानि. (५ निर्णयस्तु बुद्धिमात्रगम्य इति लोकोक्तिः, तत्स्थानेऽधुना सर्वसिद्धा त्रयोदशीति ज्योतिर्विदः।.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छगिकाधरस्य तं समर्प्य देव पादोवधार्यतामिति नृपं प्राह। नृपस्तद्बुद्धिसंकटे निपतितं स्वं मन्यमान एतद्वारत्रयस्य मध्यात्किमपि निर्णीतं भविष्यतीति विमृश्य सूत्रभृद्भिर्मण्डपपद्मशिलातलमपनीय तन्मार्गेण निर्गत्य तं गोलकं भित्वा तेष्वक्षरेषु तमेव निर्गमनिर्णयं वाचयंस्तत्कौतुकोत्तालचित्तः श्रीजिनशासनमेव प्रशशंस ।

तथाहि ॥

द्वाभ्यां यन्न हरिस्त्रिभिर्न च हरः स्रष्टा न चैवाष्टभिर्यन्न द्वादशभिर्गुहो न दशकद्वन्द्वेन लङ्केशपतिः ।
यन्नेन्द्रो दशभिः शतैर्न जनता नेत्रैरसंख्यैरपि
तत्प्रज्ञानयनेन पश्यति बुधश्चैकेन वस्तु स्फुटम् ॥१

अथ धनपालः ऋषभपञ्चाशिकास्तुतिं निर्माय, सरस्वतीकण्ठाभरणप्रासादे स्वनिर्मितप्रशस्तिपट्टिकां राज्ञे कदाचिद्दर्शयामास[1] तत्र ।

[2]अभ्युद्धृता वसुमती दलितं रिपूरः
क्रोडीकृता बलवता बलिराज्यलक्ष्मीः ।
एकत्र जन्मनि कृतं तदनेन यूना
जन्मत्रये यदकरोत्पुरुषः पुराणः ॥ १ ॥

---

१ G पट्टिकायां कदाचिन्नृपः (२ खण्डप्रशस्तावित्यम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्यमिदं निर्वर्ण्य पारितोषिके तस्याः पट्टिकायाः काञ्चनकलशं ददौ नृपः। तस्मात्प्रासादादपसरंस्तदीयद्वारखत्तके[1] रत्या सह हस्ततालदानपरं स्मरं मूर्त्तिमन्तमालोक्य नृपेण हासहेतुं पृष्टः पण्डितः प्राह ।

स एव भुवनत्रयप्रथितसंयमः शंकरो
विभर्त्ति वपुषाधुना विरहकातरः कामिनीम् ।
अनेन किल निर्जिता वयमिति प्रियायाः करं
करेण परिताडयन् जयति जातहासः स्मरः ॥ १

*अन्नदिणे सिवभवणे दुवारदेसे निए वि भङ्गिगणं ।
किं दुब्बलो पलोइअ निवपुट्ठो भणइ धणपालो २

दिग्वासा यदि तत्किमस्य धनुषा तच्चेत्कृतं भस्मना
भस्माथास्य किमङ्गना यदि च सा कामं पुनर्द्वेष्टि किम् ।

इत्यन्योन्यविरुद्धचेष्टितमहो पश्यन्निजस्वामिनो
भृङ्गी सान्द्रशिरापिनद्धपरुषं[3] धत्तेऽस्थिशेषं वपुः १

[4]पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।

---

* अन्यदिने शिवभवने द्वारदेशे निजेपि भृङ्गिगणं । (वीक्ष्य)
किं दुर्बलः प्रलोक्यते एवं नृपपृष्टो भणति धनपालः ॥ २ ॥

१ प्रवेशविशेषे. (२ C D ह्रास्य.) ३ घननाडीनिबद्धकार्कश्यं.
४ गोवर्द्धनसप्तशत्यामिदम्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अङ्कुरित इव मनोभूर्यस्मिन्भस्मावशेषोपि ॥ ३

अमेध्यमश्नाति विवेकशून्या
स्वनन्दनं कामयतेऽतिसक्ता ।
खुराग्रशृङ्गैर्विनिहन्ति जन्तून्
गौर्वन्द्यते केन गुणेन राजन् ॥ ४ ॥

पयःप्रदानसामर्थ्याद्धन्या चेन्महिषी न किम् ।
विशेषो दृश्यते नास्या महिषीतो मनागपि ॥ ५

इत्यादिभिः प्रसिद्धसिद्धसारस्वतोद्गारैर्नृपं रञ्जयन् यावदास्ते तावत्कोपि सांयात्रिको द्वाःस्थनिवेदितः सभां प्रविश्य नृपं नत्वा मदनपट्टिकायां[1] प्रशस्तिकाव्यानि दर्शयामास । नृपेण तल्लाभस्थानके पृष्टे स एवमवादीत् । नीरधावकस्मादेव मम वाहने स्खलिते निर्यामकैः शोध्यमाने समुद्रे तन्मग्नं[2] शिवायतनमालोक्य परितः परिस्फुरज्जलमप्यन्तः सलिलविकलमवलोक्य कस्यामपि भित्तौ वर्णान्निर्वर्ण्य च तज्जिज्ञासया मदनपट्टिकां[3] तत्र प्रस्थाप्य तत्कान्ताक्षरमयी[4] पट्टिकेयमिति नृपतिर्निशम्य तदुपरि मृन्मयीं पट्टिकां नियोज्य तत्र

१ मेणपट्टीति लोकोक्तौ.

२ J) तन्निमग्नं. ३ मदनमयपट्टिकायां ४ तत्संकेताक्षरमयी,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतितान्[1]वर्णान्पण्डितैर्वाचयामास ॥

आबाल्याधिगमान्मयैव गमितः कोटिं परामुन्नते-
रस्मत्संकथयैव पार्थिवसुतः सम्प्रत्यसौ लज्जते ।
इत्थं खिन्न इवात्मजेन यशसा दत्तावलम्बोम्बुधे-
र्यातस्तीरतपोवनानि तपसे वृद्धो[2] गुणानां गणः १

देवे दिग्विजयोद्यते धतधनुःप्रत्यर्थिसीमन्तिनी-
वैधव्यव्रतदायिनि प्रतिदिशं क्रुद्धे परिभ्राम्यति ।
आस्तामन्यनितम्बिनी रतिरपि[3] त्रासान्न पार्श्वे करे
भर्तुर्द्धर्तुमदान्मदान्धमधुपीनीलीनिचोलं* धनुः २

चिन्तागम्भीरकूपादनवरतचलद्भूरिशोकारघट्ट-
व्याकृष्टं निःश्वसन्त्यः पृथुनयनघटीयन्त्रमुक्ताश्रु-
धारम् ।
नासावंशप्रणालीविषमपथपतद्वाष्पपानीयमेता[4]
देव त्वद्वैरिनार्यः स्तनकलशयुगेनाऽविरामं[5] वहन्ति १

इति संपूर्णेषु काव्येषु वाच्यमानेषु ॥

अयि खलु विषमः पुराकृतानां
भवति हि जन्तुषु कर्मणां विपाकः ।

अस्य काव्यस्योत्तरार्द्धं छिन्नपादिभिः[6] परःशतै-

---

* भ्रमरीश्यामिकाप्रच्छदपटमिव यस्य तत्पुष्पं

१ A B विपरीतान्. (२ वृद्धिं प्राप्तो जगच्च) ३ D रतिरति.
४ मृदु. ५ एतत्. ६ अजिरामं. ७ छिन्नपदसंपादनशीलैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रपि पण्डितैः परिपूर्यमाणमपि विसंवदतीति
राज्ञाधनपालपण्डितः पृष्टः ।
हराशिरसि शिरांसि यानि रेजु—
र्हरिहरितानि लुठन्ति गृध्रपादैः ॥ १ ॥

इदमेवोत्तरार्द्धं संवदतीति नृपेणोक्ते सति स पण्डितः प्रोवाच । यदि गुम्फार्थाभ्यां श्रीरामेश्वरप्रशस्तिभित्तावदिं न भवति तदतःपरमाजीवितान्तं कवित्वस्य संन्यास एवेति तत्प्रतिश्रवसमकालमेव यानपात्रे निर्यामकान्निक्षेप्यावगाह्यमाने नीरधौ षड्भिर्मासैस्तं प्रासादमासाद्य पुनर्मदनपट्टिकायां न्यस्तायामिदमेवोत्तरार्द्धमागतमालोक्य तस्मै तदुचितं पारितोषिकं प्रसादीचकार ॥ इति खण्डप्रशस्तेर्यथाश्रुतानि बहूनि काव्यानि मन्तव्यानि ॥

कदाचिद्राज्ञा सेवाश्लथतां पृष्टः, स्वं[1] पण्डितस्तिलकमञ्जरीगुम्फवैयग्र्यं जगौ । शिशिरयामिन्याश्चरमयामे निर्विनोदत्वात्तां प्रथमादर्शप्रतिमानीय पण्डितेन व्याख्यायमानां तिलकमञ्जरीकथां वाचयंस्तद्रसनिपातभीरुः पुस्तकस्याधः कञ्चोलकयुतसुवर्णस्थालस्थापनापूर्वं तां समाप्य तच्चित्रकवितावि-

१ G.D सः

त्रीयमाणचित्तो नृपः पण्डितं प्राह । मामत्र कथानायकं कुर्वन् विनतायाः पदेऽवन्तीमारोपयन् शक्रावतारतीर्थस्य पदे महाकालमाकलयन् यद्याचसे तत्तुभ्यं ददामीत्यभिदधाने नृपे खद्योतप्रद्योतनयोः सर्षपकनकाचलयोः काचकाञ्चनयोः धत्तूरकल्पपादपयोरिव तेषां महदन्तरमित्युच्चरन्

*दोमुहय निरक्खर लोहमइय[1] नाराय तुज्झ किं[2] भणिमो ।
गुञ्जाहि समं कणयं तोलन्तु न गउसि पायालं १

इत्याक्रोशपरे तस्मिन्जाज्वल्यमानेग्नौ श्रीभोजेतां मूलप्रतिमिन्धनीचकार। अथ स द्विधा निर्वेदभाग् द्विधाऽवाङ्मुखो निजसौधपश्चाद्भागे जीर्णमञ्चाधिरूढो निःश्वसन् भृशं सुष्वाप । बालपण्डितया तत्सुतया सभक्तिकमुत्थाप्य स्नानपानभोजननिर्मापणानन्तरं तिलकमञ्जरी प्रथमादर्शलेखदर्शनात्संस्मृत्य ग्रन्थस्यार्द्धं लेखयांचक्रे तदुत्तरार्द्धं नूतनीकृत्य ग्रन्थः समर्थितः ॥

---

* रे द्विमुखक निरक्षर लोहमय नाराचतुल्य त्वां किं भणामः गुञ्जाभिः समं कनकं तोलयन् न गतोसि पातालं ।

१ A लोहमयी २ C किंत्विय. ३ C D प्रथमादर्शलेखनात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा भोजसभायां काव्यमिदमुक्तं तेन ।
धाराधीश धरामहीशगणने कौतूहलीयानयं
वेधास्त्वद्गणनां चकार खटिकाखण्डेन रेखां दिवि ।
सैवेयं त्रिदशापगा समभवत्त्वत्तुल्यभूमिधवा-
भावात्तत्त्यजति स्म सोयमवनीपीठे तुषाराचलः ॥
अपरपण्डितैरस्मिन्काव्ये उपहसिते धनपालेनोक्तम्
शैलैर्बन्धयति स्म वानरहृतैर्वाल्मीकिरम्भोनिधिं
व्यासः पार्थशरैस्तथापि न तयोरत्युक्तिरुद्भाव्यते ।
वस्तु प्रस्तुतमेव किंचन वयं ब्रूमस्तथाप्युच्चकै-
र्लोकोयं हसति प्रसारितमुखस्तुभ्यं प्रतिष्ठे नमः ॥

एकदा राजन्महाभारती कथा श्रूयतामित्युक्ते पण्डितं प्रति परमार्हतेन तेन प्रत्युक्तं
कानीनस्य मुनेः स्ववान्धववधूवैधव्यविध्वंसिनो
नेतारः किल पञ्च गोलकसुताः कुण्डाः* स्वयं पाण्डवाः ।
तेमी पञ्च समानजातय इति ख्यातास्तदुत्कीर्त्तनं
पुण्यं स्वस्त्ययनं भवेद्यदि नृणां पापस्य कान्या गतिः ॥ २ ॥

शोभनमुनेश्चतुर्विंशतिका स्तुतिः प्रतीतैव[२] ॥

(* अमृते जारजः कुण्डो मृते भर्त्तरि गोलकः)

१ B D तु शोजनचतु. २ धनपालस्य धनपालपञ्चाशिकाविद्यते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुना किमपि प्रबन्धादि क्रियमाणमास्ते नृपेणेत्युक्ते धनपालः प्राह ।

आरनालगलदाहशङ्कया
मन्मुखादपगता सरस्वती ।
तेन वैरिकमलाकचग्रह—
व्यग्रहस्त न कवित्वमस्ति मे ॥ १ ॥

वचनं धनपालस्य चन्दनं मलयस्य च ।
सरसं हृदि विन्यस्य कोभून्नाम न निर्वृतः ॥ १ ॥

अन्यदा सर्वाण्यपि दर्शनानि एकत्राहूय मुक्तिमार्गे पृष्टे ते स्व२दर्शनपक्षपातं ब्रूवाणाः सत्यमार्गजिज्ञासयैकीक्रियमाणाः षण्मासीमवधीकृत्य श्रीशारदाराधनतत्पराः । कस्या अपि निशेः शेषे जागर्षीति व्याहृतिपूर्वमुत्थाप्यै सा नृपं ॥

श्रोतव्यः सौगतो धर्मः कर्त्तव्यः पुनरार्हतः ।
वैदिको व्यवहर्त्तव्यो धातव्यः परमः शिवः ॥ १ ॥

अथवा धातव्यं पदमक्षयं । श्लोकममुं राज्ञे दर्शनेभ्यश्च समादिश्य श्रीभारती तिरोदधे ।

अहिंसालक्षणो धर्मो मान्यादेवी च भारती ।

---

१ आरनालं काञ्जिकमुष्णोदकं वा उपदंशकं वा

२ C निशा. ३ C D व्याहृतः ४ स्तुत्या. ५ C D सरस्वती.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यानेन मुक्तिमाप्नोति सर्वदर्शिनिनां मतम् ॥ २ ॥ इति श्लोकयुग्मं निर्माय नृपाय निरपायनिर्णयं प्राहुः ॥

अथ तन्नगरनिवासिनी शीताभिधाना रन्धनी कमपि विदेशवासिनं कार्पटिकं सूर्यपर्वणि जलाश्रये कङ्गुणीतैलमास्वाद्य गृहमुपेत्य पाकप्राशनमुपादायँ तद्वमनाद्विपन्नमालोक्यँ सद्रव्यमित्युत्पद्यमानकलङ्कशङ्काकुलतया पञ्चत्वाय तद्वमनमेवँ बुभुजे । तस्मिन्स्थिरे प्रादुर्भूतप्रातिभवैभवा विद्यात्रयीं रघुवात्स्यायनकामशास्त्रचाणाक्यनीतिशास्त्रमीषत्समँभ्यस्य च नवयौवनया विजयाभिधानया विदुष्या स्वसुतया सार्द्धं श्रीभोजस्य सदः शृङ्गारयन्ती श्रीभोजं प्रति प्राह ॥

शौर्यं शत्रुकुलक्षयावधि यशो ब्रह्माण्डभाण्डावधिस्त्यागस्तर्कुर्कवाञ्छितावधिरियँ क्षोणी समुद्रावधिः।
श्रद्धा पर्वतपुत्रिकापतिपदद्वन्द्वप्रमाणावधिः

---

१ a D मुक्तिमार्गः स्यादेवं २ D युग्मश्लोकमुक्त्वा देवी तिरोधत्त ३ उपनीय. ४ कार्पटिकं पाकाय तस्या गृहेऽन्नं कारयित्वा निशि घृतकुपिकध्यत्ययेन काङ्गुणीतैलं परिवेषितं तं विपन्नं विलोक्य ५ तदशनमेव. ६ C D प्रजूत. ७ त्रयीमीषत्. ८ लोकोऽसौ त्रागडो ९ रिति.

श्रीमद्भोजमहीपतेर्निरवधिः शेषो गुणानां गणः ॥१
अथ विनोदप्रियेण राज्ञा कुचवर्णनाय नियुक्ता[1]
विजया प्राह ॥
उन्नाहश्चिबुकावधिर्भुजलतामूलावधिः संभवो
विस्तारो हृदयावधिः कमलिनीसूत्रावधिः संहतिः।
वर्णः स्वर्णकषावधिः[2] कठिनता वज्राकरक्ष्मावधि-
स्तन्वङ्ग्याः स्तनमण्डले यदपरं लावण्यमस्तावधि१
इति तद्वर्णनाकर्णनात्[4]नार्द्धकविना राज्ञा ॥
किं वर्ण्यते कुचद्वन्द्वमस्याः कमलचक्षुषः ।
तयोक्तम्
सप्तद्वीपकरग्राही भवान् यत्र करप्रदः ॥ २
राज्ञा.
प्रहतमुरजमन्द्रध्वानवद्भिः पयोदैः
कथमलिकुलनीलैः सैव दिग् संप्ररुद्धा ।
तयोक्तम्
प्रथमविरहखेदम्लायिनी यत्र बाला
वसति नयनवान्तैरश्रुभिर्धौतवक्त्रा ॥ ३ ॥
राज्ञा.

---

१ अनुयुक्ता २ A B कषावधिः ३ D कुचमण्डले किमपरं
४ G D तद्वर्णनाकर्णनात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरताय नमस्तस्मै जगदानन्ददायिने ।
इति प्रोक्ते ॥
आनुषङ्गि फलं यस्य भोजराज भवादृशाः ॥ १ ॥
इति विजययोक्ते राजा सव्रपमधोमुखं[1] तस्थौ।
ततो राजा तां भोगिनीं चक्रे
अन्यदा तया जालान्तरे, चन्द्रकरस्पर्शेऽपाठि ।
अलं कलङ्कशङ्कार करस्पर्शनलीलया ।
चन्द्र चण्डीशनिर्माल्यमसि न स्पर्शमर्हसि ॥ १ ॥
इत्यत्र बहु वक्तव्यं परंपरया तत्तु ज्ञातव्यम् ॥
इति शर्तापण्डिताप्रबन्धः ॥

॥ अथ मयूरबाणाभिधानौ भावुकशालकौ पण्डितौ निजविद्वत्तया मिथः स्पर्द्धमानौ नृपसदसि लब्धप्रतिष्ठावभूतां । कदाचिद्बाणपण्डितो जामिमिलनाय तद्गृहं गतो निशि द्वारप्रसुप्तो भावुकेनानुनीयमानां जामिं निशम्य तत्र दत्तावधान इत्यशृणोत् ॥

गतप्राया रात्रिः कृशतनुशशी शीर्यत इव
प्रदीपोयं निद्रावशमुपगतो घूर्णित इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो

१ C D मुखः २ सीता ३ कन्या ४ जामात्रा ५ इमां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति भूयो भूयस्तेन त्रिपदीमुदीर्यमाणामाकर्ण्य । कुचप्रत्यासत्त्या हृदयमपि ते चण्डि कठिनम् । १

इति भ्रातृमुखात्तूर्यं पदमाकर्ण्य क्रुद्धा सा सव्रपा च कुष्ठी भवेति तं भ्रातरं शशाप । इति पतिव्रताव्रतप्रभावात्तदाख्यप्रभृतिरोगोभूत् । प्रातः शीतरक्षापिहिततनुर्नृपसभायातो मयूरेण मयूरेणेव कोमलगिरा वरकोडीति[2] तं प्राकृतशब्दे प्रोक्ते चतुरचक्रवर्ती नृपो बाणं सविस्मयं प्रेक्ष्यमाणस्तेन[3] प्रस्तावान्तरे देवताराधनोपायश्चेतस्यवतारयांचक्रे[4] बाणस्तु सापत्रपस्तत उत्थाय नरगसीमनि स्तम्भमारोप्य खदिराङ्गारपूर्णमधःकुण्डं विधाय स्तम्भाग्रवर्त्तिनि सिक्कके[5] स्वयमाधिरूढः सूर्यस्तुतौ प्रतिकाव्यप्रान्ते सिक्कपदं छुरिकया छिन्दन् पञ्चभिः काव्यैस्तेन पञ्चसु पदेषु छिन्नेषु सिक्काग्रे विलग्नः षष्ठेन काव्येन प्रत्यक्षीकृतभानुस्तत्प्रसादात्सद्यः संजातजात्यकाञ्चनकायः। अन्यस्मिन्नहनि स सुवर्णचन्दनावलिप्ताङ्गः संवीतसितदिव्यवसनः समाजगाम । तद्वपुःपाटवं पश्यता नृपेण सूर्यवरप्रसादं म-

---

१ C D तदात्वे प्रसूतप्रत्नूतरोगः २ B वरकोढी D वकोढी ३ ततः ४ C चिन्तयांचक्रे ५ सव्रपः ६ शिक्यके ७ कायकान्तिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यूरे विज्ञपयति बाणो बाणनिभया गिरा तं मर्म-
णि विव्याध । यदि देवताराधनं[1] सुकरं तदा त्व-
मपि किमपीदृक् चित्रमाविःकुरु । इत्यभिहिते ते-
न मयूरेण तं प्रति प्रतिवचः संदधे । निरामयस्य
किमायुर्वेदाविदा तथापि तव वचः सत्यापयितुं नि-
जपादौ च पाणी छुर्या विदार्य त्वया षष्ठे काव्ये सू-
र्यः परितोषितोऽहं तु पूर्वस्य काव्यस्य षष्ठेऽक्षरे भ-
वानीं परितोषयामीति प्रतिश्रुत्य सुखासनमासीन-
श्चण्डिकाप्रासादपश्चाद्भागे निविष्टो माभ्राङ्क्षीर्विभ्रम-
मिति षष्ठेक्षरे प्रत्यक्षीकृतचण्डिकाप्रसादात्प्रत्यग्रप्र-
थमानवपुःपल्लवः स्वसन्मुखं च तत्प्रासादमालो-
क्याभिमुखागतैर्नृपतिप्रमुखराजलोकैः कृतजयज-
यारवो महता महेन पुरं प्राविक्षत् । [2]एतस्मिन्नव-
सरे मिथ्यादृशां शासने विजयिनि सम्यग्दर्शनद्वे-
षिभिः कैश्चित्प्रधानपुरुषैर्नृपोऽभिदधे। यदि जैनमते
कश्चिदीदृग्प्रभावविर्भावः प्रभवति तदा सिताम्बराः
स्वदेशे स्थाप्यन्ते नो चेन्निर्वास्यन्ते इति तद्वचनान-
न्तरं श्रीमानतुङ्गाचार्यास्तत्राकार्य निजदेवतातिशयं
कमपि दर्शयन्तुं इति राज्ञा भणितं । ते प्राहुः ।

१ A आराधनाद्यं २ D ततस्तौ स्पर्द्धया काश्मीरं गतौ ३ दर्शयत.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्तानामस्मद्देवतानामत्र कोऽतिशयः संभवति तथापि तत्किंकराणां सुराणां प्रभावाविर्भावः कोपि विश्वचमत्कारकारी दृश्यत इत्यभिधाय चतुश्चत्वारिंशतां निगडैर्निजमङ्गं नियमितं कारयित्वा तन्नगरवर्त्तिनः श्रीयुगादिदेवस्य प्रासादपाश्चात्यभागे स्थितो मन्त्रगर्भं भक्तामरेति नवं स्तवं कुर्वन्प्रतिकाव्यं भग्नैकैकनिगडः शृङ्खलासंख्यैः काव्यैः पर्याप्तस्तवोऽभिमुखीकृतप्रासादः शासनं प्रभावयामास ॥ इति श्रीमानतुङ्गाचार्यप्रबन्धः ॥

॥ अथ कदापि राजा स्वदेशपण्डितानां पाण्डित्यं श्लाघमानो गूर्जरदेशमविदग्धतया निन्दन् स्थानपुरुषेणाभिदधे । अस्मद्देशीयाबालगोपालस्यापि[2] भवदीयपण्डिताग्रणीः कोपि तुलां नारोहतीति। ततः[3] ज्ञापितवृत्तान्तः श्रीभीमः कदापि गोवेषधा-

---

1C D ततश्चत्वारिंशत् २ C देशीयबालगोपालयोः

३ विज्ञप्ते नृपस्तं वृथा भाषिणं चिकीर्षुः आकारसंवृत्या कियन्तमपि कालं विलम्बमानः स्थानपुरुषेण तद्वृत्तान्तं ज्ञापितः श्रीभीमः स्वदेशसीमान्तनगरे विदग्धाः काश्चित्पण्यस्त्रियः कांश्चन गोपवेषधारिणः पण्डितांश्च मुक्तवान्। अन्यदा श्रीभोजदौवारिकेण, तत्रागत्य कश्चिद्विधो गोपः प्रतापदेवीनाम्नीं पण्यस्त्रियं स गृहीत्वा विदग्धलोकसुधासारां धारामारादवाप्य तां क्वापि सज्जनाकृते विमुष्य प्रत्यूषमुखे भूपाय गोपे निवेदिते श्रीभोजेन किमपि वदेत्यादिष्टः

रिणं पण्डितं पणस्त्रियं च तत्र प्रहितवान् । तत्र प्रत्यूषे नृपसमीपे नीतो गोपालः श्रीभोजेन किमपि निवेदयेत्यादिष्टः

*भोय ए हु गलिं[1] कण्ठुलउ भण केहउं[2] पडिहाइ।
उर लच्छिहि[3] मुह सरसति सीम निबद्धि काइं[4]

सरस्वतीकण्ठाभरणगोप इत्याह ततो राजा तदुक्तिविस्मितः। सभायामलंकृतायां नेपथ्यधारिणीं पणस्त्रियं पुरो विलोक्य तां प्रति 'इह किं' इत्याकस्मिकं वचः श्रीभोजः समादिक्षत्। अथ स्वजातिपक्षपातादिव सरस्वत्याः प्रसादपात्रं शेमुषीनिधिः सा सुमुखीशिरोमणी प्रतिभेव गम्भीरमपि तद्वचनतत्त्वमवगम्यें, पृच्छन्तीति नृपं प्रति वचः प्रथितवतीत्युचिततद्वचनविकसितास्येन[5] भोजेन लक्षत्रये दाप्यमानेऽज्ञाततत्त्वतया त्रिरुक्तोपि कोशाधिपो यदा न ददाति तदा तं प्रकाशमाह । देश-

* हे भोज एतत्कण्ठाभरणं वद कीदृशं प्रतिभाति।
उरसि लक्ष्मीर्मुखे सरस्वती स्थिता तयोः सीमा निबद्धा किम् ॥

१ A भोज एव हु कण्ठलउ २ स्तंभलउ कंचुल, ३ लच्छिहिं ४ कांइं C उरि लच्छिहि मुहि B सीम विहली कोइ
५ C तद्वचोवगम्य ६ वचसा D ७ विकसितवदनाभ्योजेन

सात्म्यात्प्रकृतिकार्पण्यनैपुण्याच्च लक्षत्रयमस्यै दाप्यते। औदार्यात्तु साम्राज्यमपि दीयमानमल्पतरमेव स्यादित्यादिष्टे समस्तसमाजलोकैः प्रेर्यमाणः स तयोर्वचनयोरन्वयं पृष्ट इत्यभिदधे । कर्णान्तविश्रान्तमपाङ्गाञ्जनरेखायुगं युगपदस्या निरूप्य मयेह किमित्यभिहितं ।अनया तु द्विवचनस्य बहुवचनमिति प्राकृतलक्षणात्पृच्छन्तीति कर्णाभ्यर्णेञ्जनरेषामिषात् । यो भवद्भ्यां श्रुतपूर्वः स एवायं श्रीभोज इति निर्णेतुं दृशौ गते इत्युत्तरं प्रतिपादितं तादियं प्रत्यक्षरूपा भारती तदस्याः पारितोषिके लक्षत्रयं कियदिति ततो लक्षत्रयस्य त्रिर्व्याहारान्नवलक्षास्तस्यै दापयामास ॥ अथाबाल्यादेव स नृपो ।

मस्तकस्थायिनं मृत्युं यदि पश्येदयं जनः ।
आहारोपि न रोचेत किमुताकार्यकारिता ॥ १ ॥

इति विज्ञाततत्त्वो धर्मेऽप्रमत्तोभूत् । कदाचिन्निद्राभङ्गानन्तरं कश्चिद्विपश्चित्समेत्य वेगवति तुरगेऽधिरूढस्त्वां प्रति प्रेतपतिरुपैतीत्यनुसारेण धर्मकर्मणि सज्जीभवितव्यमिति वचनाधिकारिणे पण्डि-

---

१ B गत इत्याशङ्क्योत्तरं दत्तवती प्रज्ञावदातवाक्यतीनामपि पण्डितानां योर्थोऽविषयस्तं सहसैवोद्गिरन्ती २C अकृत्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताय प्रत्यहमुचितदानं ददानः कदापि पराह्णे सभासिंहासने उपविष्टः। स्थगिकावित्तसमर्पितबीटकात्प्रागेव मुखे पत्रं क्षिप्त्वाभ्यवहरन् व्यवहारवेदिभिस्तत्कारणं पृष्ट इत्यवदत्। कृतान्तदन्तान्तरवर्त्तिनां मनुष्याणां यद्दत्तं यच्च भुक्तं तदेवात्मीयं परस्प तु संशयः तथाच ॥

उत्थायोत्थाय बोधव्यं किमद्य सुकृतं कृतम्।
आयुषः खण्डमादाय रविरस्तं प्रयास्यति ॥ १ ॥
लोकः पृच्छति मे वार्त्तां शरीरे कुशलं तव।
कुतः कुशलमस्माकमायुर्याति दिने दिने ॥ २ ॥
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्[1]।
मृत्युर्न हि परीक्षेत कृतं वास्य न वा कृतम् ॥ ३
मृतो मृत्युर्जरां जीर्णा विपन्नाः किं विपत्तयः।
व्याधयो बाधितां[2]ः किं तु हृष्यन्ति[3] यदमी जनाः ४
इत्यनित्यताश्लोकचतुष्कप्रबन्धः ॥

अथान्यदा श्रीभोजः श्रीभीमभूपतेः पार्श्वादूतमुखेन वस्तुचतुष्टयमयाचिष्ट। एकं वस्तु इहास्ति

---

१ A पत्रं मुखबीटिकयाभ्यवहरन् व्यवहारवेदिभिर्विज्ञप्त इति श्लोकचतुष्टयं जगाद

२ C पूर्वाह्णे वापराह्णिकम् ३ व्याधिताः ४ मान्यन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परत्र नास्ति १ द्वितीयं परत्रास्ति अत्र नास्ति २ तृतीयमुभयत्रास्ति ३ चतुर्थमुभयत्रापि नास्ति ४ इति विदुषां संदिग्धेऽर्थे पटहे वाद्यमाने गणिकावचनाद्देश्यातपस्विदानेश्वरद्यूतकाररूपं वस्तुचतुष्टयं प्रहितंमिति वस्तुचतुष्टयप्रबन्धः ॥

अन्यदा भोजनृपो वीरचर्यया परिभ्रमन्निशि कयाचिदपि दरिद्रैवध्वा ।

*माणुसडाँ दसदसदँसा सुणियइँ लोयपसिद्ध ।
महँ कन्त ह इक्कज दसा अवरि नवोरहिं लिद्धँ॥१

इति पठ्यमानमाकर्ण्य तस्या दुस्थावस्थया संजातरूपो नृपः प्रातस्तत्पतिं सदस्यानीय तस्याः किमप्यायतिहितं विमृश्य बीजपूरकद्वये प्रत्येकलक्षमूल्यं रत्नं तदुपकारायान्तर्विधाय तस्मै प्रसादीकृतवान् । तेनापि तं वृत्तान्तमजानता मूल्येन पत्रशाकापणे विक्रीतं तेनाप्युपायनाय तन्मातु-

* मनुष्या दशदशवर्षेषु गतेषु दशावन्तो भिन्नभिन्नावस्थावन्तो लक्ष्यन्ते इति लोकप्रसिद्धम् । मम स्वामिनस्तु एकैव दशा या निकृष्टा तदनन्तरमुत्कृष्टा दशा कदापि न लब्धा सदैव दारिद्र्याभित्यर्थः १ D १ प्रहीयतां २ दुर्विध. ३B माणसडी ४ D हवइ ५ C माणसडा दसइं देवेहि निम्माविआइं ६ मुज्झ ७ नवोरिहिं हरियाइं ते वोरहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिङ्गद्वयं कस्यापि समर्पितं तेन श्रीभोजस्यैव समर्पितं[1] ॥

*वेलामहल्लकल्लोलपल्लिदं[2] जइ वि गिरिनई पत्तं ।
अणुसरइ मग्गलग्गं पुणोवि रयणायरे रयणं ॥ १

इत्यनुभवाद्भाग्यं नृपस्तथ्यमेव मेने

यतः

प्रीणिताशेषविश्वासु वर्षास्वपि पयोलवम् ।
नाप्नुयाच्चातको नूनमलभ्यं लभ्यते कुतः ॥ १ ॥

इति बीजपूरकप्रबन्धः ॥

अथान्यदा कस्यामपि निशि नृप एको न भव्य इति प्रच्छन्नं क्रीडाशुकं पाठयित्वा प्रातस्त्वया वाक्यमिदमुच्चारणीयमिति शिक्षितवान । अथ तेन तथाभिधीयमाने नृपेण पृष्टाः पण्डिता निर्णयमजानन्तः षाण्मासीमवधिं याचितवन्तः। ततस्तन्मुख्यो वररुचिस्तन्निर्णयाय देशान्तरं परिभ्रमन्केनापि पशुपालेनाहमेवामुं निर्णयं भवत्स्वामिने निवेदयिष्यामि। परममुं श्वानं वृद्धतया नोद्वोढुं वत्सल-

* समुद्रवेलामहाकल्लोलैः पर्यस्तलुण्ठितं सत् यद्यपि गिरिनदीप्राप्तं पुनरपि मार्गलग्नं रत्नं रत्नाकरमनुसरतीत्यन्योक्त्यावबुद्धम्॥ १

१ D उपढौकितम् २ A पल्लियं C D पिल्लियं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तया न मोक्तुं च शक्नोमीति तेनोक्ते तं श्वानं निजस्कन्धे समारोप्य पशुपालं सह नीत्वा नृपसभामुपागतस्तमुत्तरकारिणं निवेदयामास। अथ स पशुपालो नृपेण तदेव वचनं पृष्टः। आस्मिन् जीवलोके राजन् लोभ एवैको न भव्यः। राज्ञा कथमिति भूयोपि पृष्टः। यद्ब्राह्मणः श्वानं स्कन्धदेशेनास्पृश्यमपि वहति तल्लोभस्यैव विजृम्भितमतो लोभ एव न भव्यः॥ अथान्यदा मित्रमात्रसहायो नृपतिर्निशि परिभ्रमन्पिपासाकुलतया पणरमणीगृहं गत्वा मित्रमुखेन जलं याचितवान्। ततोऽतुच्छवात्सल्याच्छम्भल्या कालविलम्बनेनेक्षुरसपूर्णः करकः सखेदमुपानीयत। मित्रेण खेदकारणे पृष्टे, एकस्यामिक्षुलतायां[1] पुरा रसः संपूर्णः सचाहटिको घट आसीत् साम्प्रतं तु प्रजासु विरुद्धमानसाय चिरकालेन केवला वाहटिकैव भूतेति खेदकारणं नृपस्तदाकर्ण्य केनापि वणिजा शिवायतने महति नाटके कार्यमाणे तल्लुण्टनचित्तमात्मानं विमृश्य तदे-[2]

---

१ C शूद्रेण भिद्यमानायां रसः परिपूर्णः सचोहटिको घट आसीत्. २ लुण्ठन.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व तथ्यमेवेति[1] ततो व्यावृत्य स्वस्थानमासाद्य निद्रां सिषेवे। अपरेद्युः प्रजासु संजातकूपो नृपः पणाङ्गनागृहं गतः। तदाच तयाद्य प्रजासु वत्सलो नृपतिरिति प्रचुरेक्षुरससंकेतादिति व्याहरन्त्या राजा तोषितः॥

इतीक्षुरसप्रबन्धः॥

अथ धारानगर्याः शाखानगरे प्रासादस्थितायाः गोत्रदेव्या नमश्चिकीर्षया नित्यमागच्छन् कदापि तद्भक्तिरञ्जितया देव्या स नृपः साक्षादभ्यधायि परबलं संनिहितमागतं ततः शीघ्रं व्रजेति विसृष्टः क्षणाद्गूर्जरसैन्यैः स्वं वेष्टितमालोक्यं जवाधिकेन वाजिना व्रजन् धारानगरगोपुरे प्राविशन्नालूयाको लूयाभिधानाभ्यां गूर्जराश्ववाराभ्यां तत्कण्ठे धनुषी

---

१ C दध्यौ पुनः स वसुधाधवः सौधमध्यास्य निद्रावसरे संजातकूपः प्रजासु। परस्मिन्नहनि पणाङ्गनागृहमुपगतस्तत्कालागतयातयाद्य प्रजासु वत्सलो नृपतिरिति.

२ C D कदाचिद्वेलाव्यतिक्रमे जाते सति प्रत्यहीभूतया देवतया मितपरिच्छदं द्वारप्रदेशमागतमकस्मान्नृपमालोक्य ससंभ्रमाभिषेडुषी निजासनमतिचक्राम। नृपः प्रणामपूर्वकं तं वृत्तान्तं पृच्छन् सन्निहितं परबलमागतं विचिन्त्य शीघ्रं व्रजेति विसृष्टो देवतया क्षणात् गूर्जरसैन्यैर्वेष्टितं स्वमपश्यत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षिप्य, एतावता व्यापादितोसीति वद्भ्यां त्यक्तः॥

असौ गुणी नमत्येव भोजः कण्ठमुपेयुषा ।
धनुषा गुणिना यश्चापश्यदश्वान्निपातितः ॥ १ ॥

॥ इत्यश्ववारप्रबन्धः ॥

अथान्यदा स एव राजा राजपाटिकायाः प्रत्यावृत्तः पुरगोपुरे सुमुखमुक्तेन तुरगेण प्रविशन् व्याकुलीकृतेषु लोकेषु, इतस्ततः पलायमानेषु जनेषु कामपि तक्रविक्रयिणीं जनसंमर्देन मौलिकम्याद्भूतलपतितभग्नभाण्डामपि गोरसे सरित्प्रवाह इव प्रसरति विकसितमुखां तां प्राह । तवाविषादे किं कारणमिति नृपेण पृष्टे सा प्राह ।

हत्वा नृपं पतिमवेक्ष्य भुजङ्गदष्टं
देशान्तरे विधिशाद्गणिकास्मि जाता ।
पुत्रं भुजगमधिगम्य चितां प्रविष्टा
शोचामि गोपगृहिणी कथमद्य तक्रम् ॥ १ ॥
तस्मात्प्रदेशान्महीनदी प्रादुरासेत्यवादिषुः॥[२]

॥ इति गोपगृहिणीप्रबन्धः ॥

अन्यदा प्रीतो भोज उपाशिलामेकां लक्षीकृत्य धनुर्वेदमनिर्वेदमभ्यस्यंस्तत्कालदर्शनार्थमागेतन सि-

---

१C लोकेषु. २ C इति श्लोका वदन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताम्बरवेषधारिणा श्रीचन्दनाचार्येण प्रत्युत्पन्नप्रतिभाभिरामतयौचित्यमभिदधे ॥

विद्धा विद्धा शिलेयं भवतु परमतः कार्मुकक्रीडितेन राजन्याषाणवेधव्यसनरसिकतां मुञ्च देव प्रसीद । क्रीडेयं चेत्प्रवृद्धा कुलशिखरिकुलं केलिलक्षं करोषि ध्वस्ताधारा धरित्री नृपतिलक तदा याति पातालमूलम् ॥ १ ॥

इति तत्कवितातीशयचत्कृतोपि किंचिद्विचिन्त्य नृपतिरित्युवाच । भवता सर्वशास्त्रपारगतेनापि ध्वस्ता धारेति यत्पदमपाठि ततः कमप्युत्पातं सूचयति ॥इतश्च॥ डाहालदेशीयराज्ञो राज्ञी देमतीनाम्नी महायोगिनी कदाचिदासन्नप्रसवा सदैव दैवज्ञानिति पप्रच्छ । कस्मिन्सुलग्ने जातः सुतः सार्वभौमो भवतीति। अथ तैः सम्यगवगम्योच्चराशिषु केन्द्रस्थेषु सौम्यग्रहेषु त्रिषडायगेषु क्रूरेषु चामुकलग्ने जातः सुतः सार्वभौमो भवतीत्युक्तं तन्निशम्य[1] निश्चितप्रसवदिनादूर्ध्वं षोडशप्रहरान्यावद्योगयुक्त्या गर्भस्तम्भं कृत्वा नैमित्तिकनिर्णीते लग्ने सुतं[2] कर्णनामानं प्रासूत[3] । तद्गर्भधारणदोषादष्टमे यामे सा विपन्ना । सुल,

१ D इति निशम्य २ सुतमसूत ३ संयमिनी पुरीं जगाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अजातत्वात्पराक्रमाक्रान्तदिग्चक्रः षट्त्रिंशदाधिकेन राज्ञां शतेन सेव्यमानश्चतुर्षु राजविद्यासु परं प्राविण्यमावहन् विद्यापतिप्रमुखैर्महाकविभिः स्तूयमानः। तद्यथा

मुखे हारावाप्तिर्नयनयुगले कङ्कणभरो
नितम्बे पत्राली[1] सतिकलमभूत्पाणियुगलम्।
अरण्ये श्रीकर्ण त्वदरियुवतीनां विधिवशा-
दपूर्वोयं भूषाविधिरहह जातः किमधुना ॥ १ ॥
गोपीपीनपयोधराहतमुरः संत्यज्य लक्ष्मीपतेः
शङ्के पङ्कजशङ्कया नयनयोर्विश्राम्यति श्रीस्तव।
श्रीमत्कर्णनरेन्द्र यत्र चलति भ्रूवल्लरीपल्लव-
स्तत्र त्रुट्यति भीतिभङ्गुरतया दारिद्र्यमुद्रा यतः ॥१

इति स्तूयमानः स कर्णनृपः कदाचिद्दूतमुखेन श्रीभोजमुवाच[2]। भवन्नगर्यां भवत्कारिताश्चतुरुत्तरं शतं प्रासादाः। एतावन्त एव गीतप्रबन्धा भवदीयाः। एतावन्ति तव बिरुदानि। अतश्चतुरङ्गयुद्धेन द्वन्द्वयुद्धेन वा चतसृषु विद्यासु वादिवत्, त्यागशक्त्या

---

१ C कुन्तलकलापेन २ D पत्राजिः ३ स्तूयमाननानावदातः श्रीभोजं प्रति प्रधानानि प्राहिणोत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा मां निर्जित्य पञ्चोत्तरशतांबिरुदानां भाजनं भूयाः। नो वाहं त्वां विजित्य सप्तत्रिंशताधिकस्य राज्ञां शतस्य नाथो भवामीति तद्वचसा [2]परिम्लान मुखाम्भोजः श्रीभोजः सर्वेष्वपि प्रकारेषु जितकासिं[3]नं श्रीकाशिपुराधीशं विमृशन् स्वं विजितं मन्यमानस्तानुपरोधपूर्वमभ्यर्थ्यैवमङ्गीकारयामास। मयावन्त्यां श्रीकर्णेन वाणारस्यामेकस्मिन्नहनि लग्ने गर्तापूरपूर्वमारभ्याहंपूर्विकया कार्यमाणयोः पञ्चाशद्धस्त प्रमाणयोः प्रासादयोः यस्मिन्प्रासादे प्रथमं कलशध्वजारोपो भवति तस्मिन्नुत्सवे परेण नरेन्द्रेण त्यक्तच्छत्रचामरेण करेणुमधिरूह्य समागन्तव्यमित्थं भोजस्य यथारुच्यङ्गीकारे कर्णगोचरंगते श्रीकर्णस्तेनापि प्रकारेण भोजमधश्चिकीर्षुरेकस्मिन्नेव लग्ने पृथग् २ प्रारब्धयोरुभयोः प्रासादयोः सर्वाभिसारेण निजप्रसादं निर्मापयतोस्तत्र कर्णः सूत्रभृतं पप्रच्छ। एकस्मिन्नहन्युदयास्तयोरन्तरे कियान्कर्मोच्छ्रायो[4] भवतीति निवेद्यतां। अथ तेन चतु-

---

१ वादस्थलेन त्यागेन च मां विनिर्जित्यचतुरुत्तरशत.
२ इतिप्रत्नावाविर्भावादीषत्परि. ३ जयनशीलं. ४ C कर्मस्थायो (तोषाख्याना लोकोक्तौ जैनाम्तु कोशेषु)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्दश्यनध्याये तत्र सप्तहस्तप्रमाणा एकादश प्रसादा दिनोदये प्रारभ्य दिनान्ते कलशारोपपर्यन्ताःकारयित्वा नृपाय दर्शितास्तया समग्रसामग्र्या नृपः प्रमुदितचित्तो[1] निजप्रासादकलापबन्धे संजायमाने निजप्रासादेऽनलसः कलशमधिरोप्य निर्णीते ध्वजाधिरोपलग्ने तया प्रतिज्ञया श्रीभोजं दूतमुखेन निमन्त्रयामास। ततः स्वप्रतिज्ञाभङ्गभीरुर्मालवमण्डलप्रभुस्तथा प्रयातुमप्रभुश्च श्रीभोजस्तूष्णीमासीत्। अथ प्रासादध्वजाधिरोपानन्तरं श्रीकर्णस्तावद्भिरेव नृपैः समं प्रस्थितः श्रीभोजमभिषेणयितुं तदाच[2] श्रीभोजराज्यार्द्धं प्रतिश्रुत्य श्रीमालवकमण्डलपार्ष्णिघाताय श्रीकर्णः श्रीभीममाजूहवत्। अथ ताभ्यां नरेन्द्राभ्यां मन्त्रेणाक्रान्तो व्याल इव भोजभूपालो विगलितदर्पविषो बभूव। तदा चाकस्मिके संजाते भोजवपुरपाटवेऽपाह्रियमाणेषु[3] सर्वेष्वपि घाटमार्गेषु निजनियुक्तमानुषैः सर्वथा निषिध्यमाने परपुरुषप्रवेशे श्रीभीमः कर्णाभ्यर्णवर्त्तिनं निजसन्धिविग्रहिकं डामरं भोजवृत्तान्तज्ञानाय

---

१ C चित्तो भोजप्रसादे कलापबन्धे ज्ञायमाने २ अभिषेणयन् तस्मिन्नवसरे ३ तस्मिन्नृपभ्य वपुरपाटवेऽन्हूयमाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वपुरुषेण पप्रच्छ तेनापि स पुरुषो गाथामध्याप्य प्रहितः श्रीभीमसभामुपागतः ॥

*अम्बयफलं सुपक्कं बिण्टं सिढिलं समुब्भडो पवणो।
साहा मिल्हणसीला न याणिमो कज्जपरिणामो[2] ॥१

अनया गाथया श्रीभीमे तथास्थिते श्रीभोजः सन्निहितपरलोकपथप्रयाणः कृततदुचितधर्मकृत्यो[3] मम पञ्चत्वानन्तरं मत्करौ विमानाद्बहिर्विधेयावित्यादिश्य दिवं[4] गतः ॥

*कसु करु रे पुत्र कलत्र धी कमु करु रे करसणवाडी।
एकला आइवो एकला जाइवो हाथपग बे झाडी १

इति भोजवाक्यं वेश्यया कथितं लोकानां प्रति तद्वृत्तान्तविदा कर्णेन दुर्गभङ्गपूर्वं समग्रायां भोजलक्ष्म्यामुपात्तायां श्रीभीमेन डामर आदिष्टो य-

---

*आम्रफलं सुपक्वं वृन्तं शिथिलं समुद्भटः पवनः शाखा म्लानशीला न जानीमः कार्यपरिणामम् ॥ १ ॥

* किं करोमि रे पुत्र कलत्र किं करोमि कृत्स्नवाटीं सकलपरिजनोपकरणादिमित्यर्थः । एकाकी आगम्यते एकाकी गम्यते हस्तपादं द्वयं चार्पित्वा (खंखेरीने इति भाषा.)

१. B C बद्धतसाहा मल्हणसीला. २. परिणामें.
३ कृत्यो राज्यस्यानुशास्तिं समस्तराजलोकस्य वितीर्य ।
४C दिवमुपेयिवान्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छ्रीकर्णात्त्वया मत्यरिकलितं निजं शिरो वोपनेतव्यमितिराजादेशविधित्सुर्द्वात्रिंशता पत्तिभिः सह गुरूदरे प्रविश्य मध्याह्नकाले प्रसुप्तं श्रीकर्णं छान्द्यं जग्राह। अथ तेन राज्ञ एकस्मिन्विभागे नीलकण्ठचिन्तामणिगणाधिपप्रमुखदेवतावसरे निर्णीते परस्मिन्नुत्तरार्द्धे समस्तराज्यवस्तूनि स्वेछयैकमर्द्धमादत्स्वेत्यभिहिते षोडशप्रहरांस्तथा स्थित्वा पुनः श्रीभीमराजादेशाद्देवतावसरमादाय श्रीभीमायोपायनीचकार ॥ अथैतत्प्रबन्धसंग्रहकाव्ययुग्मं यथा ॥

पञ्चाशद्धस्तमाने सुरभवनयुगे तुल्यलग्नक्षणे प्राक् प्रारब्धे यस्य शीघ्रं भवति हि कलशारोपणं तत्र राज्ञा।

अन्येन च्छत्रचालव्यजनविरहितेनाभ्युपेतव्यमेवं संवादे भोजराजो व्ययविमुखमतिः कर्णदेवेन जिग्ये॥ १ ॥

भोजे राज्ञि दिवं गतेतिबलिना कर्णेन धारापुरी-
भङ्गं सूत्रयतोपरुध्य नृपतिर्भीमः सहायीकृतः।
तद्भृत्येन च डामरेण जगृहे बन्दीकृतात्कर्णतो

---

१ राज्यार्द्धं. २ D शिव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हैमी मण्डपिका गणाधिपयुतः श्रीनीलकण्ठेश्वरः॥ २

अथ श्रीकर्णस्याग्रे इदं काव्यमुक्तं कर्पूरकविना मुखे हारावाप्तिरित्यादि.। अपशब्दकथनाद्राज्ञा तस्य कवेः किंचिन्न प्रदत्तं ।

कुक्षेः कोटर एव कैटिभरिपुर्धत्ते त्रिलोकीमिमा-
मन्तर्भूरिभरं बिभर्त्ति तमपि प्रीतो भुजङ्गाधिपः ।
श्रीकण्ठस्य स कण्ठसूत्रमभवद्देव त्वया तं हृदा
बिभ्राणेन परेषु विक्रमकथा श्रीकर्ण निर्नाशिता१

श्रीनाचिराजकविनोक्तमेतद्राज्ञा प्रदत्तम् ।

दत्ता कोटी सुवर्णस्य मत्ताश्च दश दन्तिनः ।
दत्तं श्रीकर्णदेवेन नाचिराजकवेर्मदात् ॥ २ ॥

भार्यया हक्कितेन कर्पूरकविना समागच्छतो नाचिराजकवेरग्रे मार्गे इदं काव्यं भणितं । यत्

कन्ये कासि न वेत्सि मामपि कवे कर्पूर किं भारती
सत्यं किं विधुरासि वत्स मुषिता केनाम्ब दुर्वेधसा।
किं नीतं तव मुञ्जभोजनयनद्वन्द्वं कथं वर्त्तसे
दीर्घायुर्भजतेन्धयाष्टिपदवीं श्रीनाचिराजः कविः १

श्रीनाचिराजकविना संतुष्टेन यद्राज्ञा प्रदत्तं तत्सर्वमपि कर्पूरकवये प्रदत्तं ।

इत्यादि भोजस्य नानाविधाः प्रबन्धा अवशे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षा यथाश्रुतं मन्तव्याः ॥

देव त्वत्करनीरदे दशादीशि प्रारब्धपुण्योन्नतौ
चञ्चत्काञ्चनकङ्कणद्युतितडित्स्वर्णामृतं वर्षति।
वृद्धा कीर्त्तितरङ्गिणी समभवत्प्रीता गुणग्रामभूः
पूर्णं चार्थिसरः शशाम विदुषां दारिद्र्यदावानलः १
त्यागैः कल्पद्रुम इव भुवि त्रासिताशेषदौस्थ्यः
साक्षाद्वाचस्पतिरिव जनान्दृब्धनानाप्रबन्धः।
राधावेधेऽर्जुन इव चिरात्तस्य कीर्त्योत्कचित्तै-
राहूतः श्रागमरनिकरैः स्वर्ययौ भोजराजः ॥ ३ ॥

इति श्रीमेरुतुङ्गाचार्यविरचिते प्रबन्धचिन्तामणौ श्रीभोजश्रीभीमभूपयोर्नानावदातवर्णनो नाम द्वितीयः प्रकाशः ॥

A C D पुस्तकेषु न B प्रान्तभागे लिखितानि काव्यानि यथा ॥

धाराधरस्त्वदसिरेव नरेन्द्र चित्रं
वर्षन्ति वैरिवनिताजनलोचनानि।
कोशेन सन्ततमसंगतिराहवेऽस्य
दारिद्र्यमभ्युदयति प्रतिपार्थिवानाम् ॥ १ ॥
कूर्मः पातालगङ्गापयसि विहरतां तत्तटीरूढमुस्ता-
मादत्तामादिपोत्री शिथिलयतु फणामण्डलं कुण्डलीन्द्रः।
दिङ्मातङ्गा मृणालीकवलनकलनां कुर्वतां पर्वतेन्द्राः
सर्वे स्वैरं चरन्तु त्वयि वहति विभो भोज देवीं धरित्रीम् ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अये लाजा उच्चैः पथि वचनमाकर्ण्य गृहिणी
शिशोः कर्णौ यास्मात्सुपिहितवती दीनवदना ।
मयि क्षीणोपाये यदकृत दृशावश्रुबहुले
तदन्तः शल्यं मे त्वमसि पुनरुद्धर्तुमुचितः ॥ ३ ॥
आमोदैर्मरुतो मृगाः किसलयोल्लासैस्त्वचा तापसाः
पुष्पैः षट्चरणाः फलैः शकुनयो घर्मार्दिताश्छायया ।
स्कन्धैर्गन्धगजास्त्वयैव विहिताः सर्वे कृतार्थास्ततः
त्वं विश्वोपकृतिक्षमोऽसि भवता भग्नापदोऽन्ये द्रुमाः ॥ ४ ॥
हठादाकृष्टानां कतिपयपदानां रचयिता
जनः स्पर्द्धालुश्चेदहह कविना वश्यवचसा ।
भवेदद्य श्वो वा किमिह बहुना पापिनि कलौ
घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः ॥ ५ ॥
मुक्ताभूषणमिन्दुबिम्बमजनि व्याकीर्णतारं नभः
स्मारं चापमपेतचापलमभूदिन्दीवरे मुद्रिते ।
व्यालीनं कलकण्ठमन्दरणितं मन्दानिलैः स्पन्दितं
निष्पन्दस्तबका च चम्पकलता साभून्न जाने ततः ॥ ६ ॥
खिन्नं मण्डलमैन्दवं विलुलितस्रग्भारनद्धं तमः
प्रागेव प्रथमानकैतकशिखालीलायितं सुस्मितम् ।
शान्तं कुण्डलताण्डवं कुवलयद्वन्द्वं तिरो मीलितं
पीतं विद्रुमसीत्कृतं नहि ततो जाने किमासीदिति ॥ ७ ॥
अहो मे सौभाग्यं मम च भवभूतेश्च भणितिं
तुलायामारोप्य प्रतिफलति तस्यां लघिमनि ।
गिरां देवी सद्यः श्रुतिकलितकल्हारकलिका-
मधूलीमाधुर्यैः क्षिपति परिपूर्त्यै भगवती ॥ ८ ॥
लक्ष्मीक्रीडातडागो रतिधवलगृहं दर्पणो दिग्वधूनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुष्पं श्यामालतायास्त्रिभुवनजयिनो मन्मथस्यातपत्रम् ।
पिण्डीभूतं हरस्य स्मितममरधुनीपुण्डरीकं मृगाङ्को
ज्यात्स्नापीयूषवापी जयति सितवृषस्तारकागोधनस्य ॥ ९ ॥
महाराज श्रीमन् जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते
कपर्दी कैलासं करिवरमभौमं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना ॥ १० ॥
नीरक्षीरं गृहीत्वा निखिलखगगतिं याति नालीकजन्मा
तक्रं धृत्वा तु सर्वानटति जलनिधीश्चक्रपाणिर्मुकुन्दः ।
सर्वानुत्तुङ्गशैलान् दहति पशुपतिर्भालनेत्रेण पश्यन्
व्याप्तत्वत्कीर्त्तिकान्तौ त्रिजगति नृपते भोजराज क्षितीन्द्र ॥ ११ ॥
विद्वद्राजशिखामणे तुलयितुं धाता त्वदीयं यशः
कैलासं च निरीक्ष्य तत्र लघुतां निक्षिप्तवान् पूर्त्तये ।
उक्षाणं तदुपर्युमासहचरं तन्मूर्द्ध्नि गङ्गाजलं
तस्याग्रे फणिपुङ्गवं तदुपरि स्फारं सुधादीधितिम् ॥ १२ ॥
स्वर्गाद्रोपाल कुत्र व्रजसि सुरमुने भूतले कामधेनो—
र्वत्सस्यानेतुकामस्तृणचयमधुना मुग्धदुग्धं न तस्याः ।
श्रुत्वा श्रीभोजराजप्रचुरवितरणं व्रीडशुष्कस्तनी सा
व्यर्थो हि स्यात्प्रयासस्तदपि तदरिभिश्चर्वितं सर्वमूर्व्याम् ॥ १३ ॥
अस्य श्रीभोजराजस्य हृयमेव सुदुर्लभम् ।
शत्रूणां शृङ्खलैर्लीहं ताम्रं शासनपत्रकैः ॥ १४ ॥
निजानपि गजान् भोजं ददानं प्रेक्ष्य पार्वती ।
गजेन्द्रवदनं पुत्रं रक्षत्यद्य पुनः पुनः ॥ १५ ॥
घटो जन्मस्थानं मृगपरिजनो भूर्जवसनं
वने वासः कन्दादिकमशनमेवंविधगुणः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगस्त्यः पाथोधिं यदकृत कराम्भोजकुहरे
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ १६ ॥
रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगा
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः० ॥१७॥
विजेतव्या लङ्का चरणतरणीयो जलनिधि—
र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्याजौ रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः० ॥ १८ ॥
धनुः पौष्पं मौर्वी मधुकरमयी चञ्चलदृशां
दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः ।
स्वयं चैकोऽनङ्गः सकलभुवनं व्याकुलयति
क्रियासिद्धि० ॥ १९ ॥
अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं शिवस्याहृते
देवेत्थं जगतीतले पुरहराभावे समुन्मीलति ।
गङ्गासागरमम्बरं शशिकला नागाधिपः क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनम् ॥ २० ॥
शुक्तिद्वयपुटे भोज यशोऽब्धौ तव रोदसी ।
मन्ये तदुद्भवं मुक्ताफलं शीतांशुमण्डलम् ॥ २१ ॥
अभूत्प्राचीं पिङ्गा रसपतिरिव प्राप्य कनकं
गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
क्षणात्क्षीणास्तारा नृपत इवानुद्यमपरा
न राजन्ते दीपा द्रविणरहितानामिव गृहाः ॥ २२ ॥
समुन्नतघनस्तनस्तवकचुम्बितम्बफल—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वणन्मधुरवीणया विबुधलोकलोलभ्रुवा ।
त्वदीयमुपगीयते हरकिरीटकोटिस्फुर-
च्छुधाकरकरकन्दलीकिरणपूरगौरं यशः ॥२३॥
बल्लालक्षोणीपाल त्वदहितनगरे संचरन्ती किराती
कीर्णान्यादाय रत्नान्युरुतरखदिराङ्गारशङ्काकुलाङ्गी ।
क्षिप्त्वा श्रीखण्डखण्डं तदुपरि मुकुलीभूतनेत्रा धमन्ती
श्वासामोदानुपातैर्मधुकरनिकरैर्धूमशङ्कां बिभर्त्ति ॥ २४ ॥
स्नाता तिष्ठति कुन्तलेश्वरसुता वारोङ्गराजस्वसु-
र्धूतैरात्रिरियं जिता कमलया देव्या प्रसाद्याधुना ।
इत्यन्तःपुरसुन्दरीजनगणे न्यायाधिकं ध्यायता
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थिता नाडिकाः ॥ २५ ॥
वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्टं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोनिधिरादरा-
ददह महतां निःसीमानश्चरित्रविभूतयः ॥ २६ ॥
दृष्टे श्रीभोजराजेन्द्रे गलन्ति त्रीणि तत्क्षणात् ।
शत्रोः शस्त्रं कवेः कण्ठे नीवीबन्धो मृगीदृशाम् ॥
कविषु वादपु भोगिषु योगिषु
द्रविणदेषु सतामुपकारिषु ।
धनिषु धन्विषु धर्मपरेषु च
क्षितितले नहि भोजसमो नृपः ॥ २७ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धराजप्रबन्धः

अथ कदाचिद्गूर्जरदेशे अवग्रहनिगृहीतायां वृष्टौ राजदेयविभागनिर्वाहाक्षमो देशलोकः तान्नियुक्तैर्व्यापारिभिः[1]श्रीपत्तने समानीय भीमभूपाय न्यवेद्यत। ततः कदाचिदहर्मुखे श्रीमूलराजकुमारस्तत्र चङ्क्रममाणो नृपपत्तिभिः सस्यनिदानीभूतसंबन्धे व्याकुलीक्रियमाणं सकललोकमालोक्य पारिपार्श्विकेभ्योऽधिगतवृत्तान्तः कृपया किंचिदश्रुमिश्रलोचनो *वाहवाल्यां[2] तदतुल्ययाँ[3] कलया नृपं परितोष्य वरं वृणीष्वेति नृपादेशमासाद्य भाण्डागार एव वरोयमस्तु इति विज्ञपयामास। राज्ञा किमिति न याचसे इत्युक्तः प्राप्तिप्रमाणाभावादित्युदीरयन् भृशं निर्बन्धपराद्धराधिपात्तेषां कुटुम्बिकानां दानीमोचनवरं ययाचे। ततो हर्षबाष्पाविललोचनेन राज्ञा तत्तथेति प्रतिपद्य भूयोप्यर्थयेत्यभिहितः। क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः

१C निगृहीतवर्षेण विशोपकदण्डाहिंदेशग्रामकौटुम्बिकेषु राजदेयविभागनिर्वाहाक्षमेषु तान्नियुक्तैर्व्यापारिभिः सकलोपि स ज्ञातवित्तो देशलोकः २ वाहवाल्यां A वाहाल्यां. *अश्ववालनपरिभ्रामणादिक्रियायां वा तत्स्थल्यां ३ B अतुलया.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः।
दुःपूरोदरपूरणाय पिबति श्रोतःपतिं वाडवो
जीमूतस्तु निदाघसंभृत जगत्संतापविच्छित्तये ॥ १

इति काव्यार्थबलेन निगृहीतप्रभूतलोभस्ततो भूयः किमप्यभ्यर्थ्यमानोऽपि मानोन्नततया स्वस्थानमगमत्। ततश्च कौटुम्बिकलोकैः स्तूयमानस्तृतीयेऽहनि स श्रीमूलराजः स्वर्लोकं जगाम। तच्छोकाम्बुधौ स राजलोको राजा स च पूर्वमोचितलोकश्च निमग्नश्चिरेण चतुरैर्विविधबोधबलादपरुष्टशोकशङ्कुश्चक्रे। अथ द्वितीयवर्षे कर्षुकलोकैर्वर्षाबलान्निःपन्नेषु समस्तसस्येषु व्यतीततद्वर्षयो राजदेयभागविभागे प्रदिश्यमाने राज्ञि चानाददाने सति तैरुत्तरसभा मेलिता। तत्र सभ्यानां लक्षणमेवं ॥

न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम्।
धर्मः स नो यत्र न चास्ति सत्यं
सत्यं न तद्यत्कुतकानुविद्धम् ॥ १ ॥

---

१ D सूक्तार्थ. २ प्रार्थयमानो मानोन्नततया स्वसौधमध्यास्य बन्धमोचितैस्तैर्लोकैः सदैव तदुपास्यमानः स्वसौधगतैश्च स्तूयमानस्तृतीयेऽहनि तदीयसन्तोषदृशा श्रीमूलराजः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति निर्णयात्सभ्यैर्गतवर्षतद्वर्षयोर्दानीं राजा याहितः। ततस्तेन द्रव्येण कोशद्रव्येण च श्रीमूलराजकुमारश्रेयसे नव्यस्त्रिपुरुषप्रासादः श्रीभीमेन कारितः। अनेन श्रीपत्तने श्रीभीमेश्वरदेवभट्टारिकाभीरुआणीप्रासादौ कारितौ॥ सं० १०७७ प्रारभ्य वर्ष ४२ मास १० दिन ९ राज्यं कृतं॥ श्री उदयमतिनाम्न्या तद्राज्ञ्या श्रीपत्तने सहस्रलिङ्गसरोवरादप्यतिशायिनी नव्या वापी कारिता॥अथ सं. ११२० चैत्रवदि ७ सोमे हस्तनक्षत्रे मीनलग्ने श्री कर्णदेवस्य राज्याभिषेकः संजातः॥ इतश्च शुभकेशिनामा कर्णाटराट् तुरगापहृतोऽटव्यां नीतः कुत्रापि पत्रलवृक्षछायां सेवमानः प्रत्यासन्नदावपावके कृतज्ञतया विश्रामोपकारकारिणं तमेव तरुमजिहासुस्तेनैव सह तस्मिन्दहने प्राणानाहुतीचकार। ततस्तत्सूनुर्जयकेशिनामा तद्राज्ये सचिवैरभिषिक्तः क्रमेण तत्सुता मयणल्लदेवी समजनि। सा च शिवभक्तैः सोमेश्वरनामानि गृहीतमात्र एवेति पूर्वभवमस्मार्षीत्। यदहं प्राग्भवे ब्राह्मणी द्वा-

१ D दानीं नृपतेः पार्श्वाद्वाहित्वा आपूर्यमाणकोश. २ पूर्वं वर्षे. ५२ सं० ११२८ B सं० १०८० पूर्वं व० ४२ अथ सं. ११२०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दशमासोपवासान्कृत्वा प्रत्येकं द्वादशवस्त्राणि तदुद्यापने दत्वा श्रीसोमेश्वरनमस्याकृते प्रस्थिता बाहुलोडनगरमागता तत्करं दातुमक्षमायतो गन्तुमलभमाना तन्निर्वेदादहमागामिनि जन्मनि अस्य करस्य मोचयित्री भूयासमिति कृतनिदाना विपद्यात्र कुले जातेतिपूर्वभवस्मृतिः। अथ बाहुलोडकरमोचनाय सा गूर्जरेश्वरं प्रवरं वरं कामयमाना तं वृत्तान्तं पित्रे निवेदयामास। अथ जयकेशीराजा तं व्यतिकरं ज्ञात्वा तेन श्रीकर्णः स्वप्रधानैःस्वसुताया मयणल्लदेव्या अङ्गीकारं याच्यते स्म। अथ श्रीकर्णे तस्याः कुरूपताश्रवणादुदासीने[1] सति तस्मिन्नेव निर्बन्धपरां तां मयणल्लदेवीं पिता स्वयंवरां प्राहिणोत्। अथ श्रीकर्णनृपो गुप्तवृत्त्या स्वयमेव तां कुत्सितरूपां निरूप्य[2] सर्वथा निरादर एव जातः। ततोष्टभिः[3] सहचरीभिः सह नृपतिहत्याकृते मयणल्लदेवीं प्राणान्यरिजिहीर्षुं मत्वा श्रीकर्णजनन्या देयमतिराज्ञ्या तासां विपदं द्रष्टुमक्षमया ताभिः सह प्राणसंकल्पश्चक्रे ॥ यतः ॥

---

१ B श्रीकर्णः प्रधानपुरुषैर्मयणल्लदेव्याः कुरूपतां निशम्य मन्दादरे सति. २ D विलोक्य. ३ A दिक्कन्याभिरिव मूर्त्तिमतीभिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वापदि तथा महान्तो न यान्ति खेदं यथा परापत्सु।
अचला निजोपहातिषु प्रकम्पते भूः परव्यसने॥ १

इति महोपप्लवमुपस्थितमवगम्य मातृभक्त्या तां परिणीय श्रीकर्णः पश्चाद्दृष्टिमात्रेणापि न संभावयामास ॥ अन्यदा कस्यामप्यधमयोषिति साभिलाषं नृपं मुञ्जालमन्त्री कञ्चुकिना विज्ञाय तद्वेषधारिणीं कृत्वा मयणल्लदेवीमृतुस्नातां रहसि प्राहिणोत्। तामेव स्त्रियं जानता नृपतिना सप्रेमभुज्यमानायास्तस्या आधानं समजनि। तदा च तया संकेतज्ञापनाय नृपकरान्नामाङ्कितमङ्गुलीयकं निजाङ्गुल्यां न्यधायि। अथ प्रातस्तद्दुर्विलसिताट्प्राणपरित्यागोद्यतो नृपतिः स्मार्त्तांस्तत्प्रायश्चित्तं पप्रच्छ। तैस्तप्ततास्रमयपुत्तलिकालिङ्गनमिति[२] निवेदिते प्रायश्चित्ताय तथैव चिकीर्षवे स मन्त्री यथावदवदत् ॥ सुलग्ने तस्य जातस्य सूनोर्नृपतिर्जयसिंह इति नाम निर्ममे। स बालस्त्रिवार्षिकः कुमारैः सवयोभिः सह रममाणः सिंहासन

१० इति न्यायात्तदाग्रहादेवानिच्छुनापि सर्वथा श्रीकर्णेन सा परिणिन्ये। तदनन्तरं दृग्मात्रेण सर्वथा तामसंभावयन् कस्यां

२ उद्यताय नृपतये स्मार्त्तैस्तप्ततास्रमयपुत्तलिकालिङ्गनमिति प्रायश्चित्ते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मलंचक्रे । निमित्तिकैस्तस्मिनेवाभ्युदयिके[1] लग्ने निवेदिते राजा तदैव तस्य सूनो राज्याभिषेकं चकार ॥ सं० ११५० वर्षे पौषवद ३ शनौ श्रवणनक्षत्रे वृषलग्ने श्रीसिद्धराजस्य पट्टाभिषेकः । स्वयं तु, आशापल्लीनिवासिनमाशाभिधानं भिल्लमभिषेणयन् भैरवदेव्याः शकुने जाते तत्रकोछरबाभिधानदेव्याः प्रासादं च कारयित्वा षट्लक्षाधिपं भिल्लं विजित्य तत्र जयन्तीं देवीं प्रासादे स्थापयित्वा तथा कर्णेश्वरदेवतायतनं कर्णसागरतडागालंकृतं चकार । कर्णावतीपुरं निवेश्य स्वयं तत्र राज्यं चक्रे । श्रीपत्तने तेन राज्ञा श्रीकर्णमेरुः प्रासादः कारितः ॥ सं० ११२० चैत्रसुदि ७ प्रारभ्य सं० ११५० पौषवदि २ यावत् वर्ष २९ मास ८ दिन २१ अनेन राज्ञा राज्यं कृतं । अथ दिवं गते श्रीकर्णे श्रीमदुदयमतिदेव्या भ्राता मदनपालोऽसमञ्जसवृत्त्याऽवर्त्तत । तेन लीलाभिधानो राजवैद्यो दैवतवरलब्धप्रसादः सकलनागरिकैस्तत्कलाचमत्कृतचित्तैः[2] काञ्चनदानपूजयाऽभ्यर्च्यमानः कदाचिन्नि-

---

१ B D तदव्यवहाराविरुद्धं विमृशता नृपेण पृष्टैर्नैमित्तिकैस्तस्मिन्नेवाभ्युदयिके २ C तत्कलाहृतहृदयैः

जसौधे समानीतः कृतकै[1] शरीरामये नाडीदर्शनाप्यध्यासज्ञतां निवेदयन्निदमूचे। तदेव नास्तीति। ततस्त्वं मया रोगप्रतीकाराय नाकारितः किं तु पथ्यदानेन बुभुक्षाप्रतीकारार्थमेव। ततो द्वात्रिंशत्सहस्राण्युपनयेत्युक्का तेन बन्दीकृतस्तत्तथेति[2] निर्मायेत्यभिग्रहमग्रहीत्। यदतः परं प्रतीकारनिमित्तं नृपतेः सौधमपहाय नान्यत्र गन्तव्यमिति। ततः परमातुराणां प्रश्रवणालोकनान्निदानचिकित्सितं कुर्वाणः केनापि मायाविना कृतकामयाचिकित्सितकौशलं बुभुत्सुना वृषभप्रश्रवणे दर्शिते सम्यक् तदवगम्य शिरोधूननपूर्वकं वृषभः स बहुखादनेन गोण्डितं[3] इत्यस्मै सत्वरमेव तैलनाली दीयतां नोचेद्विपत्स्यते इति तच्चित्ते चमत्कारमारोपयामास। अन्यदा राज्ञा निजग्रीवाबाधाप्रतीकारं पृष्टः। पलद्वयप्रमाणमृगमदपङ्कलेपेन शिरोर्त्तिरुपशाम्यतीति व्याहृते तथाकृते ग्रीवा सज्जीभूता। ततो नृपसुखासनवाहिना पामरेण नरेण शिरोबाधाप्रतीकारं पृष्टः। वृद्धकरीरमूलरसेन तन्मृत्तिकासहितेन लेपं

१ समानीय कृत्रिमे २ B D इत्यादिष्टस्तत्तथेति ३ गोण्डितः [रुग्णः]

विधेहीत्यभिदधे। ततो राज्ञा किमेतदिति पृष्टे[1] देशकालौ बलं शरीरप्रकृतिं च विमृश्यायुर्वेदविदा चिकित्सा क्रियत इति विज्ञपयतिस्म॥ अन्यदा धूर्तैः कैश्चिदेकसंमत्या पृथक्[2] युगलीभूय तत्प्रथमयुगलिकया विपणिमार्गे[3] किमद्य यूयं वपुष्यपटव इति पृष्टैः द्वितीययुगलिकया श्रीमुञ्जालस्वामिप्रासादसोपाने पृष्टः तृतीययुगलिकया तु राजद्वारे[4] चतुर्थयुगलिकया द्वारतोरणे[5] तथैव ततो भूयो भूयः पृच्छोत्पन्नेन शङ्कादूषणेन तत्कालोत्पन्नमाहेन्द्रज्वरस्त्रयोदशदिने विपदे स वैद्य इति वैद्यलीलाप्रबन्धः।

अथ सान्तूमन्त्रिण उपायाद्राजपाटिकाव्याजेन श्रीकर्णाङ्गजेनान्यायकारी मदनपालो व्यापादितः॥ अथ कश्चिन्मरुमण्डलवास्तव्यः श्रीमालदेश्य उदाभिधानो वणिक् प्रावृट्काले प्राज्याज्यक्रयाय निशीथे व्रजन् कर्मकरैरेकस्मा-

---

[1] BD भूयो राज्ञा विप्रलब्धः [2] विज्ञप्य गृहं गतः [3] विपणिमार्गे पृष्टः [3] द्वारतोरणे [4] आकस्मिकं वपुरपाटवं पृष्टः [5] श्री मुञ्जालस्वामिप्रासादे चाप्टच्छ्यमानः शङ्काविषदोषेणैव मृतः [6] अथ सान्तूनामा मन्त्री अन्यायकारिणं तं मदनपालं कालमिव जिघांसुः कदाचित्कर्णाङ्गजं गजेधिरोप्य राजपाटिकाव्याजेन तद्गृहे नीत्वा पत्तिभिस्तं व्यापादयामास

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्केदारादपरस्मिन् जलैः पूर्यमाणे[1] तान्केयूयमिति[2] पप्रच्छ । तैर्वयममुकस्य कामुका इत्युक्ते ममापि क्वापि सन्तीति पृच्छन्, तैः कर्णावत्यां सन्तीत्यभिहिते स सकुटुम्बस्तत्र गतः वायटीयजिनायतने विधिवद्देवान्नमस्कुर्वन्कयापि लाछिनाम्न्या छिम्पिकया श्राविकया साधर्मिकत्वाद्ववन्दे । तया भवान् कस्यातिथिरित्युदीरितः, वैदेशिकोहमिति भवत्या एवातिथिरिति वदन् तया सह नीत्वा कस्यापि वणिजो गृहे कारितान्नपाकेन भोजयित्वा निजतनके क्वापि गृहे निवासितः । कालक्रमेण संपन्नसंपदिष्टिकाचितं गृहं चिकीर्षुः खातावसरे निरवधिं सेवधिमधिगम्य तामेव स्त्रियमाहूय समर्पयन् तया निषिद्धः। तत्प्रभावेण ततः प्रभृति स उदयनमन्त्रीति नाम्ना पप्रथे।*तेन कर्णावत्यामतीतानागतवर्त्तमानचतुर्विंशतिजिनसमलंकृतः श्रीउदनविहारः कारितः। तस्यापरमातृकाश्चत्वारः सुताः वा-

---

* D यतः

कृतप्रयत्नानपि नैव कांश्चन स्वयं शयानानपि सेवते परान् ।
द्वयेपि नास्ति द्वितयेपि विद्यते श्रियः प्रचारो न विचारगोचरः॥ १

१ B C पोषमाणे. २ अपरस्मिन्पूर्यमाणेम्भोभिः के यूयमिति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हडदेवआम्बडबोहडसोलाकनामानोऽभूवन् ।
अथान्यस्मिन्नवसरे सान्तूनामा महामात्यः करेणुस्कन्धारूढो राजपाटिकायां व्रजन् व्यावृत्तः स्वकारितसान्तूवसहिकायां देवनमश्चिकीर्षया तत्र प्रविशन् वारवेश्यास्कन्धन्यस्तहस्तं कमपि चैत्यवासिनं सितवसनं ददर्श । ततो गजादवरुह्य कृतोत्तरासङ्गः पञ्चाङ्गप्रणामेन तं नमश्चकार । तत्र क्षणं स्थित्वा भूयस्तं प्रणम्य प्रतस्थे। ततः स लज्जयाऽधोवदनः पातालं प्रविविक्षुरिव तत्कालं सर्वमेव परिहृत्य मलधारिश्रीहेमसूरीणां समीपे उपसंपदमादाय संवेगरससंपूर्णः श्रीशत्रुंजये गत्वा द्वादशवर्षाणि तपस्तेपे। किंच तेनान्ये समानाः प्रतिबोधिताः मुनिश्चिन्तयति ।

रे रे चित्त कथं भ्रातः प्रधावसि पिशाचवत् ।
अभिन्नं पश्य चात्मानं रागत्यागात्सुखी भव ॥ १
संसारमृगतृष्णासु मनो धावसि किं वृथा ।
सुधामयमिदं ब्रह्मसरः किं नावगाहसे ॥ २ ॥

एकदाचित्स मन्त्री श्रीशत्रुंजये देवपादानां नमस्कर-

---

१ C आस्थडदेवआम्बडदेवबाहडसोल्लाः D सोलदेवभट. १
२ D गौतममिव नमश्चक्रे. ३ इति ध्यायन्स मुनिः कायोत्सर्गे तस्थौ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णायोपगतो दृष्टपूर्वमिव मुनिं तं प्रणम्य तच्चरित्रविचित्रितमनास्तं गुरुंकुलादि पप्रच्छ। तत्त्वतो भवानेव गुरुरिति तेनोक्ते कर्णौ पिधाय पाणिभ्यामेवं मादिशेत्यज्ञातवृत्त्यैवं विज्ञपयंस्तेन मन्त्र्यूचे ॥

जो जेण सुद्धधम्मम्मि ठाविउ संजएण गिहिणा वा।
सो चेव तस्स जायइ धम्मगुरू धम्मदाणाउ ॥१॥

इति तस्मै मूलवृत्तान्तं निवेद्य तस्य दृढधर्मतां निर्ममे ॥

इति मन्त्रिसान्तूदृढधर्मताप्रबन्धः ॥

अथानन्तरं श्रीमयणल्लदेव्या जातिस्मरणात्पूर्वभववृन्तान्ते श्रीसिद्धराजस्य निवेदिते श्रीमयणल्ल देवी श्रीसोमनाथयोग्यां सपादकोटिमूल्यां हेममयीं पूजामादाय यात्रायां प्रस्थिता। बाहुलोडनगरं प्राप्ता पञ्चकुलेन कदर्थ्यमानेषु कार्पटिकेषु[2] राजदेयविभागस्याप्राप्त्या सबाष्पं पश्चान्निर्वृत्यमानेषु मयणल्लदेवी हृदयादर्शसंक्रान्ततद्वार्ता[3] स्वयमेव पश्चाद्व्याघुटन्ती अन्तरान्तरायभूतेन श्रीसिद्धराजेन विज्ञप्ता स्वामिन्यलममुना संभ्रमेण कुतो हेतोः पश्चान्निवर्त्यते इति राज्ञोक्ते यदैव सर्वथाऽयं करमोक्षो भवति तदैवा-

१ B C तद्गुरु. २ (यात्रिकेषु) ३ D तद्वाप्पवारा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हं श्रीसोमेश्वरं प्रणमामि अशनं गृह्णामि नान्यथेति[1] श्रुत्वा राज्ञा पञ्चकुलमाकार्य तत्पट्टकस्याकुड्मलप्रतिलक्षानुत्पद्यमानान्विमृश्य तं पट्टकं विदार्य मातुः श्रेयसे करं मुक्त्वा करे जलचुलकं मुञ्चति स्म। ततः श्रीसोमेश्वरं गत्वा तया सुवर्णपूजया देवमभ्यर्च्य तुलापुरुषदानादीनि दानानि दत्त्वा

संग्रहैकपरः प्राप समुद्रोपि रसातलम्।
दाता तु जलदः पश्य भुवनोपरि गर्जति ॥ १ ॥
सेनाङ्गपरिवाराद्यं सर्वमेव विनश्यति।
दानेन जनितानन्दे कीर्तिरेकैव तिष्ठति ॥ २ ॥
दातुर्नार्थिसमो बन्धुर्भारमादाय यः परात्।
लक्ष्मीरूपादविगमं निस्तारयति तं खलु ॥ ३ ॥

अतो महादानैर्मत्सदृशी कापि नाभून्न भवितेति दर्पाध्मातशिरा निर्भरं सुप्ता। तपस्विवेषधारिणा तेनैव देवेन जगदे। इहैव मदीयदेवकुलमध्ये[2] काचित्कार्पटिकनितम्बिनी यात्रायै आयातास्ति तस्याः सुकृतं याचनीयं त्वयेत्थमादिश्य तिरोहिते तस्मिन्राजपुरुषैरालोक्य समानीता। तस्मिन्पुण्ये याचितेऽप्यददाना कथमपि यात्रायां किं व्ययीकृतमिति

१ D नान्यथा किंचातः परमशननीरयोर्नियमश्च. २ देवायतने.

पृष्टा सती सा प्राह । अहं भिक्षावृत्त्या योजनशतान्तरमतिक्रम्य ह्यस्तनदिवसे कृततीर्थोपवासा पारणकदिने कस्यापि सुकृतिनः पिण्याकमासाद्य तत्खण्डेन श्रीसोमेश्वरमभ्यर्च्य तदंशमतिथये दत्त्वा स्वयं पारणकमकार्षं । भवती पुण्यवती यस्याः पितृभ्रातरौ पतिसुतौ च राजानः। या त्वं बाहुलोडकरं मोचयित्वा सपादकोटिमूल्यया पूजया श्रीसोमेश्वरं पूजितवती सा कथं मदीयपुण्यैलब्धेच्छासि[3] यदि न कुप्यासि तदा किंचिद्वच्मि । तत्त्वतस्तव पुण्यान्मदीयं पुण्यं महीतले महीयः । यतः ॥

संपत्तौ नियमः शक्तौ सहनं यौवने व्रतम् ।
दारिद्र्ये दानमत्यल्यमपि लाभाय भूयसे ॥ १ ॥

इति युक्तेन वाक्येन तस्या गर्वं निराचकार[4] ॥ सिद्धराजस्तु समुद्रोपकण्ठवर्ती एकेन चारणेन ॥ को जाणइ तुह[5] नाह चीत तु हालेइं[6] चक्कवइलउ। लंकहले[7]वाहमग्गु निहालई करणउत्तु[8] ॥ १

* को जानाति तव चित्तं हेनाथ चक्रवर्त्तित्वं लब्धं अतः परं लङ्काफलं लब्धुं वाहमार्गं निभालयति किं कर्णपुत्रः ॥ १ ॥

१ C J) यात्रायां. २ C कृशेपि पुण्ये कथंलुब्धासि. ३ J) अगण्यपुण्यमर्जयन्ती सा. ४ B CD) सा गर्वं विससर्ज. C ५ कौ ६ हालंतु. ७ काले. ८ लहु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादिस्तूयमानोऽभूत् ॥

एवं तत्र यात्रायां व्यावृत्ते राज्ञि छलान्वेषिणा यशोवर्मणा मालवकभूपेन गूर्जरदेशे उपद्रूयमाणे सान्तूसचिवेन त्वं कथं निवर्त्तसे इति प्रोक्तः स राजाह । यदि त्वं स्वस्वामिनः सोमेश्वरदेवयात्रायाः पुण्यं ददासीत्पुदीरितस्तच्चरणौ प्रक्षाल्य तत्करतले तत्पुण्यदाननिदानं[1] जलचुलुकं निक्षिप्य तं राजानं निवर्त्तयामास ततः श्रीसिद्धराजस्तद्वृत्तान्तोपगमनेन क्रुद्धस्[2]तं मन्त्र्येवमवादीत्। स्वामिन् यन्मया दत्तं तव सुकृतं याति ततस्तस्य सुकृतमन्येषामपि पुण्यवतां सुकृतं मया भवते प्रदत्तमेव । येन केनाप्युपायेन परचक्रं स्वदेशे प्रविशद्रक्षणीय[3]मेवेति वदता तेन नृपतिरनुनीतः। ततस्तेनैवामर्षेण मालवमण्डलं प्रतिष्टासुं[4]ः साचिवान् शिल्पिनश्च सहस्रलिङ्गधर्मस्थानकर्मस्थाये[5] नियोज्य त्वरितगत्या तस्मिन्निष्पद्यमाने नृपतिः प्रयाणकमकरोत्। तत्र स्वजयकारपूर्वकं द्वादशवार्षिके विग्रहे संजायमानेऽद्य मया धाराभङ्ग[6]-

---

१ D अनिदानं. २ D क्रुद्धो नृपः पराङ्मुखोऽजनि । एकदा राजानं. ३ निवारणीयं. ४ प्रति यियासुः ५ (धर्मस्थानस्य कार्याधिकारे.) ६ कथंचिद्धारादुर्गभङ्गं कर्त्तुमप्रभूष्णुरद्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्तरं भोक्तव्यमिति सचिवैः पत्तिभिः परमारराजपुत्रैः पञ्चशतीभिर्विपद्यमानैः राज्ञः प्रतिज्ञां दिनान्तेपि पूरयितुमक्षमैः कथंचित्तस्यां कणिकामयधाराभङ्गेन पूरितायां राजा पश्चाद्व्याघुटितुमिच्छुर्मुञ्जालसचिवं ज्ञापयामास। तेनापि त्रिकचतुष्कचत्वरप्रासादेषु निजपुरुषान्नियोज्य धारादुर्गभङ्गवार्त्तायां क्रियमाणायां तद्वासिना केनापि पुरुषेण प्रतोल्यां[1] यदि परबलं ढौकते तदैव दुर्गभङ्गो नान्यथेति तद्वाचमाकर्ण्य स विज्ञप्तः सचिवस्तं व्यतिकरं राज्ञे गुप्तविज्ञप्तिकया निवेदयामास । राज्ञापि तद्वृत्तान्तवेदिना तत्र सैन्ये ढौकिते दुर्गमन्तर्दुर्गमविमृश्य[2] यशःपटहनाम्नि बलवद्दन्तावलेऽधिरूढसामलनाम्नारोहकेण पश्चाद्भागेन त्रिपोलिं[3]कपाटद्व. ये आहन्यमाने लोहमयार्गलायां भज्यमानायां बलाधिकतयान्तस्त्रुटिताद्गजात्कर्णाङ्कुजमुत्तार्य स्वयं यावदवरोहति तावत्स गजः पृथिव्यां पपात । सुभटतया विपद्य वडसरग्रामे स्वयशोधवल एव यशोधवलनामा[4] विनायकरूपेणावततार ॥

---

१ D दक्षिणप्रतोल्या. २ दुर्गमं दुर्गमन्तर्विमृश्य. ३ A त्रिपोल.
४ C यशोधलो नाम.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धेस्तनशैलतटीपरिणतिदलितद्वितीयदन्त इव।
बिभ्राणो रदमेकं गजवदनः सृजतु वः श्रेयः ॥१॥

इति तदीया स्तुतिः ॥ इत्थं दुर्गभङ्गे सूत्रिते सति समराधिरूढं यशोवर्माणं षड्भिर्गुणैराबध्य तत्र निजामाज्ञां जगन्मान्यां दापयित्वा यशोवर्मरूपया प्रत्यक्षयशःपताकया रोचिष्णुः श्रीपत्तनं प्राप। प्रतिदिनं सर्वदेशीनेष्वाशिर्वाददानायाहूतेषु यथावसरमाकारिता जैनाचार्याः श्रीहेमचन्द्रमुख्याः श्रीसिद्धराजमासाद्य नृपेण दुकूलदानादिभिरार्वाजतोस्तैः सर्वैरप्यप्रतिमप्रतिभाभिरामैर्द्विधापि पुस्कृतो नृपायेत्याशिषं श्रीहेमचन्द्रः पपाठ ॥

*भूमिं कामगवि स्वगोमयरसैरासिंच रत्नाकरा
मुक्तास्वस्तिकमातनुध्वमुडुप त्वं पूर्णकुम्भी[1]भव।
धत्वा कल्पतरोर्दलानि सरलैर्दिग्वारणास्तोरणा–
न्याधत्त स्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिपः१

अस्मिन्काव्ये निःप्रपञ्चे प्रपश्यमाने तद्वचनचातुरीचमत्कृतचेता नृपस्तं प्रशंसन्, कैश्चिदसहिष्णुभिरस्मच्छास्त्राध्ययनबलादेतेषां विद्वत्तेत्यभिहिते

* (हैम प्राकृत व्याकरणेप्ययमस्ति) १ C कुम्भो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राज्ञा पृष्टाः श्रीहेमचन्द्राचार्याः। पुरा[1] श्रीजिनेन

१ D कश्चिदसहिष्णुभिर्न मेने ॥ हेमचन्द्रनामा शिष्यः कदाचिन्नवगुञ्जितशिरा जलविहरणाय व्रजन् गजभयात्सौधभित्तिस्थितो गवाक्षस्थेनालिंगपुरोहितेन सारिणा पराभूतः[1] गुरवो विज्ञप्तास्तैरुक्तो मिथ्या दुःकृतं देहि। तद्दुःखेन निःसटतोऽन्यगच्छीयदेवचन्द्रपद्माकराभ्यां सह श्रीकाश्मीरं प्रति। मार्गे नडोलाग्रामे सप्तमोपवासे श्रीसरस्वती प्रसन्ना जाता निजमूर्तिर्दर्शिता मित्रयोर्निवेदिते। श्लोकसप्तशत्या ग्रामो वर्णितः। मित्रद्वयस्य कार्यसिद्धिहेतोः स्तम्भतीर्थे प्रविशन्तः केनापि देशान्तरिणाकार्यविद्या[2] समर्पिता। इत्युक्तं च। मम मरणसमये मम शवोपरि त्रिभिर्नाभिमण्डले मन्त्रः स्मरणीयः शवो वरं दास्यति। एवं कृते श्मशाने मध्यरात्रौ शवेनोत्थाप्य वरो दत्तः। श्रीहेमचन्द्रेण राजप्रबोधो याचितः। देवचन्द्रेण हस्तसिद्धेराकृष्टिविद्या। पद्माकरेण पाण्डित्यं। अत्रान्तरे कृतकृत्यहेमचन्द्रो वलितः। कालभैरवीयमध्ये चण्डिकाप्रासादे विश्रान्तस्तत्र लघुभैरवानन्दः शिष्यपञ्चशतीवृतः समेत्य, रेरे चण्डे चण्डे प्रचण्डे मह्यं मोदकान् देहीति भणित्वा सुवर्णमयकर्परमग्रे मुक्तं देव्या मोदकैर्भृतं। तेन सर्वेषां तेऽर्पिताः। हेमचन्द्रस्यापि हे शिष्य त्वमपि गृहाणेत्युक्ते। तेन तस्यापि करौ स्तम्भयित्वोक्तं। यद्यस्ति सत्त्वं तदा त्वं भक्षयेथाः। एवमुक्ते चरणयोः पतितः। ततः पत्तने आयातं श्रीजयसिंहदेवः सन्मुखमेत्य समानीय हेमचन्द्रं गजाधिरूढं प्रवेश्य च पुरोहिततिरस्कृतं सूरिं, राज्ञा गुरव उपरोध्य हेमचन्द्रस्य पदस्थापना कारिता ॥ श्रीहेमचन्द्रसूरयोऽष्टम्यां चतुर्दश्यां च श्रीजयदेवभुवनं प्रयान्ति। पौषधागारे श्रीस्थूलिभद्रचरितं वाचयन्तः पुरोहितेन राज्ञोग्रे उपहसिताः, महाराज कोयमसत्प्रलापः सर्वर-

(१ सर्वथा बलवताऽत एव तिरस्कृतः) (२ देवाकर्षणविद्या.)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीमन्महावीरेणेन्द्रस्य पुरतः शैशवे यद्व्याख्यातं तज्जैनव्याकरणमधीयामहे वयमिति तद्वाक्यानन्तरमिमां पुराणवार्त्तामपहायास्माकमेव सन्निहितं नृपं व्याकरणकर्त्तारं कमपि ब्रूतेति तस्मिंशुनवाक्यादनु ते प्राहुः। यदि श्रीसिद्धराजः सहायीभवति तदा कतिपयैरेव दिनैः पञ्चाङ्गमपि नूतनं व्याकरणं रचयामः॥ अथ नृपेण प्रतिपन्नमिदं निर्वहणीयमित्यभिधाय तद्विसृष्टाः सूरयः स्वं स्थानं ययुः। ततो यशोवर्मराज्ञः करे निःप्रतीकारां क्षुरीं

सभोजने पूर्वपरिचितवेश्यागृहे कामनिग्रहः। परं किं क्रियते भवद्दुर्लभाः। राज्ञोक्तं। आचार्या अत्र समेष्यन्ति तदा वक्तव्यं परोक्षे न। सूरिष्वागतेषु राज्ञोक्तं। किं२ वाचयन्तो वर्तध्वे यूयं। सूरिभिः समग्रमपि संक्षेपतः स्थूलिभद्रचरितं कथितं। आलिंगेनोक्तं। महाराज,

विश्वामित्रपराशरप्रभृतयो ये चाम्बुपत्राशिन—
स्तेपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः।
आहारं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवा—
स्तेषामिन्द्रियनिग्रहः कथमहो दम्भः समालोक्यताम्॥ १

गुरुभिरुक्तं। सिंहो बलीयो द्विरद[1] इत्यादि॰

आलिंगेनोक्तं। अस्माकमेव शास्त्राणि पठित्वास्माकमेव पतयः संजाताः।

गुरुभिरुक्तं। जैनेन्द्रव्याकरणं किं भवदीयं यत्पुरा

(१ सिंहादयश्चिरकाले श्वानस्तु न तथाऽत एव न मैथुने केवलमाहारः कारणं)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समर्प्य तदग्रासने वयं गजाधिरूढाः पुरमध्ये प्रवेशं करिष्याम इति राज्ञः प्रतिश्रवमाकर्ण्य मुञ्जालमन्त्रिणा प्रधानवृत्तिं मुञ्चता किमिति राज्ञा निर्बन्धपृष्टेन

मा स्म सन्धिं विजानन्तु मा स्म जानन्तु विग्रहम्।
आख्यातं यदि शृण्वन्ति भूपास्तेनैव पण्डिताः॥१॥

इति नीतिशास्त्रोपदेशात्स्वबुद्धयैव स्वामिना प्रतिज्ञातोयमर्थः सर्वथायतौ न हित इत्युक्तं। ततो वरमसून्परिहरामि न तु विश्वविदितं प्रतिश्रवमिति[2] नृपेणोक्ते मन्त्री दारुमयीं क्षुरिकां[3] पाण्डुवर्णसर्जरसेन पिहितां पृष्ठासनस्थस्य यशोवर्मणः करे समर्प्य तदग्रासनस्थो नृपतिः श्रीसिद्धराजः परमोत्सवेन श्रीमदणहिल्लपुरं प्रविवेश। प्रावेशिकमङ्गलानन्तरं[4] नृपेण स्मारिते व्याकरणवृत्तान्ते बहुभ्यो देशेभ्यस्तद्वेदिभिः पण्डितैः सह सर्वाणि व्याकरणानि समानीय श्रीहेमाचार्यैः श्रीसिद्धहेमाभिधानं पञ्चाङ्गमपि व्याकरणं सपादलक्षग्रन्थप्रमाणं संवत्सरेण रचयांचक्रे। राजवाह्यकुम्भिकुम्भे

१ [पण्डितपक्षे राजपक्षे च प्रमिद्धोर्थः] २ C विश्रुतं प्रतिश्रुतं ३ C D छुरिका. ४ B C व्याकुलतानन्तरं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्पुस्तकमारोप्य सितातपवारणे ध्रियमाणे चामरव्याहिणीचामरयुग्मवीज्यमानं नृपमन्दिरमानीय प्राज्यवर्षपूजापूर्वं कोशागारे न्यधीयत । ततो राजाज्ञयान्यानि व्याकरणान्यपहाय तस्मिन्नेव व्याकरणे सर्वत्राधीयमाने केनापि मत्सरिणा भवदन्वयवर्णना विरहितं व्याकरणमित्युक्ते श्रीहेमाचार्यः क्रुद्धं राजानं राजमानुषादवगम्य द्वात्रिंशच्छ्लोकान्नूतनान्निर्माय द्वात्रिंशत्सूत्रितपादेषु तान्संबन्धं दधानानेव लेखयित्वा प्रातर्नृपसभायां वाच्यमाने व्याकरणे चौलुक्यवंशोपश्लोककेन श्लोकान्वाचयन्नृपं संतोषयामास ॥ यथा ॥

हरिरिव बलिबन्धकरस्त्रिशक्तियुक्तः पिनाकपाणिरिव।
कमलाश्रयश्च विधिरिव जयति श्रीमूलराजनृपः १

इत्यादि[2]॥ तथा च श्रीसिद्धराजदिग्विजयवर्णने द्व्याश्रयनामा ग्रन्थः कृतः ॥

भ्रातः संवृणु पाणिनिं प्रलपितं कातन्त्रकन्था वृथा
मा कार्षीः कटु शाकटायन वचः क्षुद्रेण चान्द्रेण किम् ।
कः कण्ठाभरणादिभिर्बठरयत्यात्मानमन्यैरपि[3]

१D संबद्धान् २चौलुक्यवंशोपश्लोकान् द्वात्रिंशत्सूत्रपादान्तेषु द्वात्रिंशत् श्लोकानवलोक्य प्रमुदितो राजा व्याकरणं विस्तरयामास. (३ मूर्खयति)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रूयन्ते यदि तावदर्थमधुराः श्रीहेमचन्द्रोक्तयः ॥१॥
अथ श्रीसिद्धराजेन पत्तने यशोवर्मराज्ञारूढपुरुषप्रभृतीन्सर्वानपि राजप्रासादान्सहस्रलिङ्गप्रभृतीनि च धर्मस्थानानि दर्शयित्वा प्रतिवर्षं देवदायपदे कोटिद्रव्यव्ययं निवेद्यैतत्सुन्दरमसुन्दरं वेति यशोवर्मा पृष्ट इत्यवादीत्। अहं ह्यष्टादशलक्षप्रमाणमालवदेशाधिपस्त्वत्तः पराभवपात्रं कथं भवेयं, परं महाकालदेवस्य दत्तपूर्वत्वाद्देवद्रव्यं मालवकः। तद्बुज्ञानास्तत्प्रभावादुदितास्तामिता वर्त्तामहे। भवदीयान्वयराजानोऽप्येतावद्देवद्रव्यव्ययनिर्वाहाक्षमा लुप्तसर्वदेवदायपदाविपदां पदं भविष्यन्ति। अथ सिद्धराजः कदापि सिद्धपुरे रुद्रमहाकालप्रासादं कारयितुकामः कमपि स्थपतिं स्वसंनिधौ स्थापयित्वा प्रासादप्रारम्भलग्ने तदीयकलासिकां लक्षद्रव्येणोत्तमर्णगृहीतां मोचयामास। तां वंशशलाकामयीमालोक्य किमेतदिति राजा पप्रच्छ। ततो मया प्रभोरौदार्यपरीक्षानिमित्तमेतत्कृतमिति स्थपतिरुक्तवान्। ततस्तद्द्रव्यमनिच्छतेऽपि नृपतिनार्पितं। ततः क्रमेण

१ C वर्द्धापयित्वा. २ देवद्रव्यव्ययमनिर्वहन्तो. ३ मूलनाशं विनङ्क्ष्यन्ति. ४ तद्द्रव्यप्रत्यर्पणापूर्वं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रयोविंशतिहस्तप्रमाणे परिपूर्णे प्रासादेऽश्वपतिगजपतिनरपतिप्रभृतीनामुत्तमभूपतीनां मूर्त्तीः कारयित्वा तत्पुरो योजिताञ्जलिं स्वां मूर्त्तिं निर्माप्य देशभङ्गेऽपि प्रासादस्याभङ्गं याचितवान्। तस्य प्रासादस्य ध्वजारोपप्रस्तावे सर्वेषामपि जैनप्रासादानां पताकावरोहं कारितवान्। यथा मालवकदेशे महाकालवैजयन्त्यां सत्यां जैनप्रासादेषु न ध्वजारोप इति। अन्यदा सिद्धराजस्य मालवकमण्डलं प्रति यियासतः केनापि व्यवहारिणा सहस्रलिङ्गकर्मस्थाये याच्यमाने विभागे तत्सर्वथाऽदत्ते च कृतप्रयाणस्य कतिपयदिनानन्तरं कोशाभावात्कर्मस्थायस्य विलम्बमवगम्य तेन व्यवहारिणा सुतस्य पार्श्वात्कस्यापि धनाधिपस्य वध्वास्ताडङ्कमपहार्य[1] तद्दण्डपदे द्रव्यलक्षत्रयं दत्तं तेन कर्मस्थायः स जात इति वार्त्तां शृण्वतो मालवके वर्षाकालं तस्थुषो राज्ञो वचनगोचरातीतः प्रमोदः संजातः। अथ प्रावृषेण्ये घने प्रगल्भवृष्ट्या क्षोणीमेकार्णवां कुर्वति वर्द्धापनिकाहेतोः प्रधानपुरुषैः प्रहितः मरुदेशीयपुरुषो नृपतिपुरतः

१ A D ताडङ्केन्यहारिते

सविस्तरं वर्षास्वरूपं व्यज्ञपयत्। तदा त्वागतेन-गूर्जरधूर्त्तेण नरेण सहस्वलिङ्गसरोभृतामिति स्वा-मिन् वर्द्धाप्यसे[1] इति तद्वाक्यानन्तरमेव सिक्क-पतितमार्जारस्येव मरुवृद्धस्य पश्यतः सर्वाङ्गलग्न माभरणं नृपतिर्गूर्जराय ददौ। अथ वर्षान्तरं प्रत्यावृत्तः क्षितिपतिः श्रीनगरमहास्थाने दत्तावासो[2] नगरप्रासादेषु ध्वजस्यालोके[3] के एते प्रासादा इति ब्राह्मणान्पप्रच्छ। तैर्जिनब्रह्मादीनां प्रासादस्वरूपे निवेदिते सामर्षो राजा मया गूर्जरमण्डले जैन-प्रासादानां पतकासु निषिद्धासु किं भवतामिह नगरे पताकावज्जिनायतनमित्यादिशंस्तैर्विज्ञपयांचक्रे। अवधार्यतां श्रीमन्महादेवेन। कृतयुगप्रारम्भे महा-स्थानमिदं स्थापयता श्रीऋषभदेवनाथश्रीब्रह्मप्रा-सादयोः सुकृतिभिरुद्धियमाणयोश्चत्वारो युगा व्य-तीताः। अन्यच्च श्रीशत्रुंजयमहागिरेर्नगरामिदमुपत्य-काभूमिः। यतो नगरपुराणे उक्तं॥

पञ्चाशदादौ किल मूलभूमे—
र्दशोर्ध्वभूमेरपि विस्तरोस्य।

---

१ A B C वर्द्धापयसे २ B मञ्चरचनाकृतसर्वावसरस्तत्र
३ C ध्वजव्रजमालोक्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्चत्वमष्टैव तु योजनानि
मानं वदन्तीह जिनेश्वराद्रेः॥ १

इति कृतयुगे आदिदेवश्रीऋषभस्तत्सूनुर्भरतस्तन्नाम्ना भरतखण्डमिदं प्रततिम्॥

*नाभेः सुतः स वृषभो मरुदेविसूनु-
र्यो वै चचार समदृग् मुनियोगचर्यामि।
तस्यार्हसत्यमृषयः पदमामनन्ति
स्वच्छः प्रशान्तकरणः समदृक् सुधीर्श्च॥ १॥

*अष्टमो मरुदेव्यां तु नाभेर्जात उरुक्रमः।
दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतम्॥ १॥

इत्यादिपुराणोक्तान्युदीर्य विशेषप्रत्ययाय श्रीवृषभदेवप्रासादकोशाच्छ्रीभरतभूपनामाङ्कितं पञ्चजनवाद्यं कांस्यतालमानीय नृपाय दर्शयन्तो जिनधर्मस्याद्यत्वं स्थापयामासुः। ततः खे-

---

* श्रीभागवतपुराणे स्कन्ध. २ अ. ७ श्लो. १० मुद्रिते असावृषभ आस सुदेविसुनुः। यत्पारमहंस्यमृषयः। इति पाठौ॥

* तत्रैव स्कन्धः १ अ. ३ श्लो. १३ अष्टमे मेरुदेव्यामिति पाठः।

१C इति. २ A B अथो ३ A B D आर्हतश्च ऋषयः ४ D सुधीः सः ५ अष्टमे ६ C D कृतः ७ यथावस्थिततदाद्यत्वस्थापनाय श्रीऋषभः ८ D द्विजा जैनधर्मस्याद्यधर्मत्वं स्थापयांचक्रुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दमेदुरमनसा राज्ञा हायनान्ते जैनप्रासादेषु ध्वजारोपः कारितः । अथ श्रीपत्तने प्राप्तो नृपः । प्रस्तावे सरोवरपेदेषु[1] वाच्यमानेषु[2] सापराधव्यवहारिसुतदण्डपदाल्लक्षत्रयं कर्मस्थायै[3] व्यवकलितमिति श्रुत्वा लक्षत्रयं तस्य गृहे प्रस्थापयामास । ततः स व्यवहारी, उपायनपाणिर्नृपोपान्तमुपेत्य किमेतदिति विज्ञपयन् राज्ञादिष्टः । यः कोटिध्वजो व्यवहारी स कथं ताडङ्कचौरस्त्वयाऽस्य धर्मस्थानस्य[4] धर्मविभागः प्रार्थितोपि यन्न लब्धस्ततः प्रपञ्चचतुरेण मृगमुखव्याघ्रेणान्तःशठेन प्रत्यक्षसरलेन त्वयेदं कर्म निर्मितम् ॥ यतः

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ १ ॥
मुखं पद्मदलाकारं वाचश्चन्दनशीतलाः ।
हृदयं कर्त्तरीभूतमेतद्धूर्त्तस्य लक्षणम् ॥ २ ॥
यस्यान्तर्गिरिशागारदीपिकाः प्रतिबिम्बिताः ।
शोभन्ते निशि पातालव्यालमौलिमणिश्रियैः ॥३॥

(१ आयव्ययावशिष्टाख्येषु) २ C D सरोवरकर्मस्थायत्रिपदेषु (३कार्यस्थाने कारखाना भाषायाम्. ४ श्मशानं ५मणीनां श्रीरिव श्रीर्यासां ताः।निशातुल्ये राज्ये शोभन्ते न तु दिवसतुल्ये मद्राज्ये इति भावः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि वाक्यैर्भृशं खण्डितः

एकदा श्रीसिद्धेन रामचन्द्रः पृष्टो । ग्रीष्मे दिवसाः कथं गुरुतराः । रामचन्द्रः प्राह ।

देव श्रीगिरिदुर्गमल्ल भवतो दिग्जैत्रयात्रोत्सवे
धावद्वीरतुरङ्गवल्गनखुरक्षुण्णक्षमामण्डली ।
वातोद्धूतरजोमिलत्सुरसरित्संजातपङ्कस्थली-
दूर्वाचुम्बनघश्चुरा रविहयास्तेनैव वृद्धं दिनम् ॥१॥
लब्धलक्षा विपक्षेषु विलक्षास्त्वयि मार्गणाः ।
तथापि तव सिद्धेन्द्र दातेत्युत्कन्धरं यशः ॥ २ ॥

अथ कदाचिद्राज्ञा ग्रथिलाचार्या जयमङ्गलसूरयः पुरवर्णनं पृष्टा ऊचुः ॥

एतस्यास्य पुरस्य पौरवनिताचातुर्यतानिर्जिता
मन्ये हन्त सरस्वती जडतया नीरं वहन्ती स्थिता ।
कीर्तिस्तम्भमिषोच्चदण्डरुचिरामुत्सृज्य बाहोर्बला-
त्तन्त्रीकां गुरुसिद्धभूपतिसरस्तुम्बां निजां कच्छपीम् ॥ १ ॥

अन्यच्च

महालयो महायात्रा महास्थानं महासरः ।
यत्कृतं सिद्धराजेन धरिण्यां तत्करोतु कः ॥ १ ॥

॥ अथ श्रीपालकविना सहस्रलिङ्गसरोवरस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रचितायां प्रशस्तिपट्टिकायामुत्कीर्णायाम् ।
तत्स्थकाव्यमिदम् ।
न मानसे माद्यति मानसं[1] मे
पम्पा न संपादयति प्रमोदम् ।
अच्छोदकाच्छोदकमत्र सारं
विराजते कीर्त्तितसिद्धि भर्तुः ॥ १ ॥

तत्प्रशस्तिशोधनाय सर्वदर्शनेष्वाहूयमानेषु श्रीहेमचन्द्राचार्यैः सर्वविद्वज्जनानुमते प्रशस्तिकाव्ये भवता वैदग्ध्यं किमपि न प्रकाश्यमित्युक्त्वा पण्डितरामचन्द्रोनुशिष्यस्तत्र[3] प्रहितः । ततः सर्वविद्वद्भिः शोध्यमानायां प्रशस्तौ नृपोपरोधाच्छ्रीपालकवेर्दक्ष्यदाक्षिण्याच्च सर्वेषु काव्येषु मन्यमानेषु ॥
कोशेनापि युतं दलैरुपचितं नोच्छेत्तुमेतत्क्षमं
स्वस्यापि[5] स्फुटकण्टव्यतिकरं पुंस्त्वं च धत्ते नहि।
एकोप्येष करोति कोशरहितो निष्कण्टकं भूतलं
मत्वैवं कमला विहाय कमलं यस्यासिमाशिश्रियत्[4]

विशेषणास्मिन्काव्ये प्रशस्यमाने श्रीसिद्धराजे-

(१ मानससरो मनसि न हर्षं करोति २ अच्छोदकनामकात्सरसो निर्मलोदकं) ३ B अनुशिष्यः (४ असिपक्षे कमलपक्षे च। सैन्यैः पत्रैश्च)
५ A D स्वस्थापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न पृष्टः श्रीरामचन्द्रश्चिन्त्यमेतदित्यवादीत् अथ तैरेव सर्वैरनुयुक्तः, एतस्मिन्काव्ये सैन्यवाचको दलशब्दः कमलशब्दस्य नित्यक्लीबत्वमिति दूषणद्वयं चिन्त्यं। ततः सर्वानपि पण्डितानुपरुध्य दलशब्दो राजसैन्यार्थे प्रमाणीकारितः[1] कमलशब्दस्य तु लिङ्गानुशासनसिद्धं नित्यक्लीबत्वं केन निर्णीयते[2] इति पुंस्त्वं च धते न वेत्यक्षरभेदः कारितस्तदा श्रीसिद्धराजस्य संजातदृष्टिदोषेण पं० रामचन्द्रस्य वसतौ प्रविशत एव लोचनमेकं स्फुटितम् ॥

अथ कदाचित् ॥

आयुक्तः प्राणदो लोके वियुक्तो मुनिवल्लभः ।
संयुक्तः सर्वथानिष्टः केवली[3] स्त्रीषु वल्लभः ॥ १

इति डाहलदेशीयनरपतियमलपत्रान्ते लिखितश्लोकव्याख्यानावसरे तूष्णींस्थितेषु पण्डिते[4]-

---

१ A B D प्रमाणीकृतः २ A निर्नीयते ३ A C श्रमणाप्रियः। प्रयुक्तः सर्वविद्विष्टः केवलः D ४ सन्धिविग्राहिकैरानीतयमलपत्रेषु श्लोकमेनं लिखितं निशम्य किमेतदिति एष्टास्ते प्राहुः । तवैकैकप्रधाना भूयांसो विद्वांसस्तत्पार्श्वादुबोधोऽयं श्लोको व्याख्येय इति तद्वाचमाकर्ण्य सर्वैरपि विद्वद्भिरज्ञाततदर्थैर्विमृशद्भिर्नृपेण एष्टा हेमाचार्या हारशब्दमध्याहार्य व्याचख्युः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षु श्रीहेमचन्द्राचार्यै राज्ञा पृष्टैर्हारशब्दमध्याहार्य व्याख्यातः। अन्यदा सपादलक्षक्षितिपतिना।

*पइली ताव न अणुहरइ गोरीमुहकमलस्स।

इति समस्या दोधकार्द्धे प्रहिते तैः कविभिरपूर्यमाणे।

*अदिठी किमु उम्मीयइ पडिपयली[2] चन्दस्स॥१॥

इति श्रीहेमचन्द्रनामा मुनीन्द्रस्तां पूरयामास॥

अन्यदा श्रीसिद्धराजो नवघणाभिधानमाभीरराणकं निगृहीतुकामःपुरैकादशवारं निजसैन्यैः पराजिते सति श्रीवर्द्धमानादिषु पुरेषु प्राकारं[3] निर्माप्य स्वयमेव प्रयाणकमकरोत्। तद्भागिनेयदत्ते संकेते सँतिवप्रपरावर्त्तकालेयं द्रव्यव्यापादित एव करणीयो नवघनो न पुनरस्त्रादिभिरिति परिग्रहदत्तान्तरस्थः सः विशालाच्छालाद्बहिराकृष्य द्रव्यवासणैरेवं ताडयि-

---

(१ आहारः विहारः संहारः हारः)

* प्रतिपच्चन्द्रज्योत्स्ना तावन्नानुसरति [illegible]मुखकमलं॥

* अदृष्टा किमून्मीयेत प्रतिप्रतिपज्ज्योत्स्ना चन्द्रस्य, ॥१॥

(प्रथमकलाऽदर्शनादेव प्रतिप्रच्छब्देन द्वितीया लक्ष्यते)

२ A B ओलीतावनु अहरइ अदिठी किमवन्नियइ D किमवन्नीयइ तडिपयली पडिपइली. ३ प्राकारप्रकारं निरूप्य. ४ A तद्भागिनेयेन ५ A B इति याचिते राज्ञा जयसिंहदेवेन स शालात् (६ भाण्डैरेव)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वा व्यापादितः । अयं द्रव्यव्यापादित एव कृत इति वचनविज्ञापनात् परिग्रहो[2] बोधितः ।

अथ तद्राज्ञ्याः शोकपतिताया वाक्यानि ॥

*सइरू नहीं स राणइं[3] कुलाईउ नकुलाइं[4] इ ।
सइ सउ षङ्गारिहिं प्राणकइ वइसानरि होमीइं[5]॥१

*राणा सव्वे वाणिया जेसलु वड्डउ सेठि ।
काहूं वणिजडु माण्डीयउ अम्मीणां[6] गढहेठि ॥२॥

*तइं गडूआ गिरनार काहूं मणि मत्सरु धरिउ।
मारीतां षङ्गार एक्कासिहरु न ढालिउं ॥३

---

* हे सख्यः नायं स राणकः न च कुलानि किं तु नकुलान्येव सत्यः सर्वाः खेङ्गेरो नहि किंतु अङ्गारस्तत्र वैश्वानरे प्राणान् आहुतीकुर्मः १ ।

* राणकाः सर्वे वणिजः यथा जेसलाख्यो महान् श्रेष्ठी अहो कथं वाणाज्यं मण्डितं अस्माकं दुर्गाधः अस्मदर्थं भाण्डवाज्यमारब्धं किं स्वामिनेत्युत्प्रेक्षा २ ।

* हे गिरिनार हे रैवतक यूयं गुरवः कथं तदा, यदा मनसि मत्सरं धरन्तः एवं न चेत्तर्हि मृतेपि खेङ्गारे एकशिखरमपि नाधो ढौकितं मृते स्वामिन्युन्नताशिरस्त्वं न शोभते इत्युपालम्भः ॥ ३ ॥

१ B तं व्यापादयामास २ C इति वचनबलात्तद्भागिनेयपरिग्रहः ३ सयरू नहि स राण ४ न कुलाई न कुलाई ५ सईं सउ षंगारिहिं पाण किनवइसारि होमिया ६ अम्मीणां.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जेसल मोडि मवाह वलिवलि विरूप[1] भावियइ ।
नइ जिम नवा प्रवाह नवघण विणु आवइ नहि[2]४
*वाढी तो वढवाणँ वीसारतां न वीसरइ ।
सोनाँसमा पराण भोगावह तइं भोगवीइँ॥ ५

इत्यादीनि बहूनि वाक्यानि यथावसरं मन्तव्यानि ॥ ततो महं० जाम्बान्वयस्य सज्जनदण्डाधिपतेः श्रीसिद्धराजेन योग्यतया सुराष्ट्रँविषये व्यापारो नियुक्तः । तेन स्वामिनमविज्ञाप्य वर्षत्रयोद्ग्राहितेन श्रीमदुज्जयन्ते श्रीनेमीश्वरस्य काष्टमयं प्रासादमपनीय नूतनः शैलमयः प्रासादः कारितः । चतुर्थे वर्षे सामन्तचतुष्टयं प्रस्थाप्य सज्जनदण्डाधिपतिं श्रीपत्तने समानीय राज्ञा वर्षत्रयोद्ग्राहितद्रव्यं याचि-

---

* जेसलाख्यं यच्छैलाख्यं वा मम मया मुक्तं वा देशस्थानं पुनः पूर्नविरूपं भाव्यते । पक्षे यः शैलं मर्दयित्वाप्यागतः प्रवाहो यत्र सा नदी नवघनं नवीनमेघं पक्षे राजानं विना नवीना पूर्णशोभावहा नास्ति किं तु विरूपा यथा ॥ ४ ॥ !

* वृश्चितोपि वर्द्धितोऽत एव तव नाम वर्द्धमानग्राम इति सत्यं एतद्विस्मारितमपि न विस्मरिष्यति कथं तदेवाह यतः सुवर्णवत्प्रियाः प्राणाः भोगावर्त्तनदेन भुक्ताः ततस्तवापि सत्यं नाम ॥ ५ ॥ !

१ C वरुण २ नवयण विण आवै नही ३ B वाटी तवउं वढमाण ४ सूना ५ C भोगावह पइं भोगिव्या ६ D सघनदण्ड. ७ सुराष्ट्रा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तः । तद्देशव्यवहारिणां पार्श्वात्तावद्द्रव्यमुपढौक्योज्जयन्तप्रासादजीर्णोद्धारपुण्यमुद्गाहितद्रव्यं वा द्वयोरेकमवधारयतु देवः । इति तेनोक्ते श्रीसिद्धराजस्तद्बुद्धिकौशल्यचमत्कृतस्तीर्थोद्धारपुण्यमेवोररीचकार । स पुनस्तस्य देशस्याधिकारमधिगम्य शत्रुंजयोज्जयन्ततीर्थयोर्द्वादशयोजनयोर्यावद्धुक्कूलमर्यं[1] महाध्वजं ददौ ॥

इति रैवतकोद्धारप्रबन्धः ॥

अथ भूयः सोमेश्वरयात्रायाः प्रत्यावृत्तः श्रीसिद्धाधिपो रैवतोपत्यकायां दत्तावासस्तदैवस्तत्कीर्त्तनं दिदृक्षुः मत्सरोत्सेकपरैर्द्विजन्मभिः सजलाधारलिङ्गाकारोयं गिरिरित्पत्र पादस्पर्शी नार्हतीति कृतकवचनैर्निषिद्धस्तत्र पूजां प्रस्थाप्य स्वयं शत्रुंजयमहातीर्थसन्निधौ स्कन्धावारं न्यधात् । तत्र पूर्वोक्तैर्जातिपिशुनैः कृपाणिकापाणिभिरकृपैस्तीर्थमार्गे निरुद्धे सति श्रीसिद्धाधिपो रजनीमुखे कृतकार्पटिकवेषः[3] स्कन्धनिहितविहङ्गिकोभयपक्षन्यस्तगङ्गोदकस्तन्मध्येभूत्वाऽपरिज्ञातस्वरूप एव गिरिमधि-[4]

---

१ A B द्वादशयोजनायामं २ स्वं ३ D प्राकृतवेषः ४ उभयतो बद्धशिक्यः पर्याहार्यो भारो यत्र गर्गरिकादौ ता विहङ्गिकेत्युच्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुह्य गङ्गोदकेन श्रीयुगादिदेवं स्नपयन् पर्वतसमीपवर्त्तिग्रामद्वादशकशासनं श्रीदेवाचार्याय विश्राणयामास। तीर्थदर्शनाच्चोन्मुद्रितलोचन इवामृताभिषिक्त इव जातः। अत्र पर्वते सङ्कीर्णवनसरित्पूरसंकुले इहैव विन्ध्यं करिष्यामीत्यवन्ध्यप्रतिज्ञो, हस्तियूथनिष्पत्तये विहस्तमनसं[1] मनोरथेनापि तीर्थविध्वंसपातकिनं धिग्मामिति श्रीदेवपादानां पुरतो राजलोकविदितं स्वं निनिन्द। सानन्दो गिरेरवततार॥ अथ श्रीदेवसूरिचरितं व्याख्यास्यामः॥

तस्मिन्नवसरे कुमुदचन्द्रनामा दिगम्बरस्तेषु देशेषु चतुरशीतिवादैर्[2] वादिनो निर्जित्य कर्णाटदेशाद्गूर्जरदेशं जेतुकामः कर्णावतीं प्राप। तत्र भट्टारकश्रीदेवसूरीणां चातुर्मासके स्थितानां श्रीअरिष्टनेमिप्रासादे धर्मशास्त्रव्याख्याक्षणे वचनचातुरीमनुच्छिष्टामाकर्ण्य तत्पण्डितैस्तद्वृत्तान्ते निवेदिते कुमुदचन्द्रस्तेषामुपाश्रये सतृणमुदकं प्रक्षेपितवान्। अथ तैर्महर्षिभिः पण्डितैः खण्डनतर्कादिप्रमाणप्रवीणैस्तस्मिन्नर्थेऽनाकर्णिततयाऽवज्ञाते सति श्रीदेवा-

१ C विन्ध्यवनं रचयिष्यामीति. २ (व्याकुलचित्तं ३ शान्त्याचार्यकृतोत्तराध्ययनवृत्तौ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चार्यजामिं तपोधनां चेटकैराधिष्ठितां विधाय नृत्यजलानयनादिभिर्विविधाभिर्विडम्बनाभिर्विडम्ब्य तेषु चेटकेष्वपहृतेषु[1] तान् भृशं पराभवान्निर्भर्त्सनपरानपवार्य[2] श्रीदेवसूरिभिरुक्तं वादविद्याविनोदाय भवता पत्तने गन्तव्यं । तत्र राजसभायां भवता सह वादं करिष्याम इत्यादिष्टे स कृतकृत्यमनाः स आज्ञावासनः श्रीपत्तनपरिसरं प्राप्तः । श्रीसिद्धराजेन मातामहगुरुरिति प्रत्युद्गमादिना सत्कृतस्तत्रावासान्दत्वा तस्थौ । श्रीसिद्धराजेन वादनिष्णाततां दृष्टाः श्रीहेमाचार्यश्चतसृषु विद्यासु परं प्रावीण्यं बिभ्राणं जैनमुनिगजयूथाधिपं सिताम्बरशासनवज्रप्राकारं नृपसभाशृङ्गारहारं कर्णावतीस्थितं श्रीदेवाचार्यं वादविद्याविदं वादीभकण्ठीरवं प्राहुः। अथ राज्ञा तदाव्हानाय प्रेषितविज्ञप्तिकायां श्रीसंघलेखेन सममागतायां श्रीदेवसूरयः पत्तनं प्राप्य नृपोपरोधाद्वाग्देवीमाराधयामासुः । तया तु वादिवेतालीयश्रीशान्तिसूरिविरचितोत्तराध्ययनवृहद्वृत्तौ दिगम्बरवादस्थले चतुरशीतिविकल्पजालोपन्यासे भवद्भिः

१ C उपाहृतेषु. (२ निवार्य)

प्रतन्यमाने दिग्वाससो मुखे मुद्रापयिष्यन्तीत्यादेशानन्तरं गुप्तवृत्त्या कुमुचन्द्रसन्निधौ पण्डितान्प्रस्थाप्य कस्मिन् शास्त्रे विशेषकौशलमिति ज्ञापिते। देवादेशयं किं करोमि सहसा लङ्कामिहैवानये
जम्बूद्वीपमितो नयेयमथवा वारांनिधिं शोषये।
हेलोत्पाटिततुङ्गपर्वतशिरोग्रावभ्रिनेत्राचल[3*]—
क्षेपक्षोभविवर्द्धमानसलिलं बध्नामि वा वारिधिम्[4]१

इति तदुक्तिश्रवणात्सिद्धान्तकुशलतां तस्यास्पीयसीमवगम्य जितं मन्यमानाभ्यां श्रीदेवचार्यश्रीहेमचन्द्राभ्यां प्रमुदितं। अथ देवसूरिप्रभो रत्नप्रभाभिधानः प्रथमशिष्यः क्षपामुखे गुप्तवेषतया कुमुदचन्द्रस्य गुरूदरे गतः। तेन कस्त्वमित्यभिहिते अहं देवः। देवः कः। अहं। अहं कः। त्वं। त्वं कः। श्वा। श्वा कः। त्वं॥ कः अहं देव इति तयोरुक्तिप्रत्युक्तिबन्धे चक्रभ्रमं भ्रमति, आत्मानं देवं दिगम्बरं श्वानं च संस्थाप्य यथागतं जगाम॥ तेन चक्रदोषप्रादुष्करणेन विषादनिषादसंपर्कात्। हंहो श्वेतपटाः किमेष विकटाटोपोक्तिसंटङ्कितैः

१ D देवाज्ञापय. २ C अथानये किं ३ विन्ध्यमन्दरहिमस्वर्णत्रिकूटाचल. *[त्रिनेत्रस्य शिवस्याचलो हिमवान्] ४ D वारांनिधि

संसारावटकोटरेऽतिविकटे मुग्धो जनः पात्यते ।
तत्त्वातत्त्वविचारणासु यदि वो हेवाकलेशस्तदा
सत्यं कौमुदचन्द्रमाङ्घ्रियुगलं[२] रात्रिंदिवं ध्यायत॥१॥

इमां तदुचितां कवितां निर्माप्य समादाय कुमुदचन्द्रः श्रीदेवसूरीन्प्रति प्राहिणोत् ।
तदनु तच्चरणपरमाणुर्बुद्धिवैभवावगणितचाणाक्यः पण्डितमाणिक्यः ।

कः कण्ठीरवकण्ठकेसरसटाभारं स्पृशत्यङ्घ्रिणा
कः कुन्तेन शितेन नेत्रकुहरे कण्डूयनं काङ्क्षति ।
कः सन्नह्यति पन्नगेश्वरशिरोरत्नावतंसश्रिये
यः श्वेताम्बरशासनस्य कुरुते वन्द्यस्य निन्दामिमाम् ॥ १ ॥

अथ रत्नाकरपण्डितः ॥

*नग्नैर्निरुद्धा युवतीजनस्य
यन्मुक्तिरत्र प्रकटं हि तत्त्वम् ।
तत्किं वृथा कर्कशतर्ककेलौ
तवाभिलाषोयमनर्थमूलः ॥ २ ॥

---

१ (यथा केनापि स्वयं नग्नेन बलान्निरुद्धायै तरुण्यै कर्कश क्रीडाभिलाषः क्रियतेसत्यं सोऽनर्थमूल इति समासोक्त्यलङ्कारः अभ्यासलेशः) २D आंह्रि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति कुमुदचन्द्रं प्रति सोपहासं प्राहिणोत् ॥ अथ श्रीमयणल्लदेवी कुमुदचन्द्रपक्षिपातिनी, अभ्यासवर्त्तिनः सभ्यांस्तज्जयाय नित्यमुपरोधयन्तीति श्रुत्वा श्रीहेमचन्द्राचार्येण वादस्थले दिगम्बराः स्त्रीकृतं सुकृतमप्रमाणीकरिष्यन्ति सिताम्बरास्तं स्थापयिष्यन्तीति तेषामेव पार्श्वात्तद्वृत्तान्ते निवेदिते राज्ञी व्यवहाराद्बहिर्मुखे दिगम्बरे पक्षपातमुज्झां चकार। अथ भाषोत्तरलेखनाय सुखासनसमासीनः कुमुदचन्द्रः पण्डितरत्नप्रभश्चरणचारेणाऽक्षपटले[2] समागतौ। तदधिकृतैः ॥

*केवलिह्रूउं न भुञ्जइ चीवरसहिअस्स नत्थि–
निव्वाणं

इत्थी ह्रूया न सिज्झइ ई मयमेयं कुमुदचन्दस्स[1]

कुमुदचन्द्र इति भाषां लेखयामास। अथ। सिताम्बराणामुत्तरम् ॥

---

* केवली भूतो न भुञ्जाति वस्त्रसहितस्य नास्ति मोक्षः।
स्त्री भूता न सिद्धयति मतमेतत्कुमुदचन्द्रस्य ॥ १

१ C लेखनाय सुखासनसमासीनः कुमुदचन्द्रः पण्डितरत्नप्रभश्चरणचारेण आक्षिपटले समागतौ तदधिकृतैः। केवलीत्यादि०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलि हूउवि भुञ्जइ चीवरसहिअस्स अत्थि निव्वाणं
इत्थी हूयावि सिज्झइ मयमेयं देवसूरीणं॥१॥

इति भाषोत्तरलेखनानन्तरं निर्णीतवादस्थलवासरे श्रीसिद्धराजे समाजमागतवति, षट्दर्शनप्रमाणवेदिषु सभ्येषु समुपस्थितेषु कुमुदचन्द्रवादी पुरो वाद्यमानजयडिण्डिमो ध्रियमाणसितातपत्रः सुखासनसमासीनः पुरो वंशाग्रलम्बमानपत्रावलम्बः सिद्धराजसभायां नृपप्रसादीकृतसिंहासने निषसाद। प्रभुश्रीदेवसूरयश्च श्रीहेमचन्द्रमुनीन्द्रसहिताः सभासिंहासनमेकमेवालंचक्रुः। अथ कुमुदचन्द्रवादी स्वयं ज्यायान् किंचिद्व्यतिक्रान्तशैशवं श्रीहेमचन्द्रं प्रति पीतं तक्रं भवतेत्यभिहिते श्रीहेमचन्द्रस्तं प्रति जरातरलितमते किमेवमसमञ्जसं ब्रूषे श्वेतं तक्रं पीता हरिद्रेति वाक्येनाधःकृत.। युवयोः को वादीति पृच्छन्, श्रीदेवसूरिभिस्तन्निराकरणायायं भवतः प्रतिवादीत्यभिहिते कुमुदचन्द्रः प्राह। मम वृद्धस्यानेन

---

* केवली भूतोपि भुञ्जाति वस्त्रसहितस्याप्यस्ति निर्वाणं।
स्त्री भूतापि सिद्धयति मतमेतद्देवसूरीणां॥ १

१ D तत्तिरस्करणाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिशुना सह को वाद इति तदुक्तिमाकर्ण्याहमेव ज्यायान् भवानेव शिशुः योद्यापि कटीदवरकमपि नादत्से निवसनं च। इत्थं राज्ञा तयोर्वितण्डायां निषिद्धायामित्थं पणबन्धो मिथः समजनि पराजितैः श्वेताम्बरैर्दिगम्बरत्वमङ्गीकार्यं। दिगम्बरैस्तु देशत्याग इति निर्णीते पणबन्धादनु स्वदेशकलङ्कभीरुभिर्देवाचार्यैः सर्वानुवादपरिहारपरैर्देशानुवादपरायणैः कुमुदचन्द्रं प्रति प्रथमं भवान्कक्षीकरोतु पक्षमित्यभिहिते ॥

खद्योतद्युतिमातनोति सविता जीर्णोर्णनाभालय-
च्छायां[2]माश्रयते शशी मशकतामायान्ति यत्राद्रयः।
इत्थं वर्णयतो नभस्तव यशो जातं स्मृतेर्गोचरं
तत्तस्मिन्[3]भ्रमरायते नरपते वाचस्ततो मुद्रिताः ॥१॥

इति नृपं प्रत्याशिषं ददौ। वाचस्ततो मुद्रिता इति तदीयापशब्देन सभ्यास्तं स्वहस्तबन्धनमिति विमृशन्तो मुमुदिरे ॥ अथ देवाचार्याः ॥

* नारीणां विदधाति निर्वृतिपदं श्वेताम्बरप्रोल्लस-

---

१ AC दोरकं निवसनं २ BC उर्णनाभालयच्छायां ३ C यस्मिन्

* नारीणां स्त्रीणां जिनशासनपक्षे। अरीणां शत्रूणां नेति राज्यपक्षे निर्वृति सुखं मोक्षं च। नयपथो नीतिमार्गस्तस्य विस्ताररचनास्थानं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्कीर्तिस्फातिमनोहरं नयपथप्रस्तारभङ्गीगृहम् । यस्मिन्के वलिनो न निर्जितपरोत्सेकाः सदा दन्तिनो राज्यं तज्जिनशासनं च भवतश्चौलुक्य जीयाच्चिरम् ॥ १ ॥

नृपं प्रतीमामाशिषं ददौ॥ अथ वादी कुमुदचन्द्रः केवलिभुक्तिस्त्रीनिर्वाणचीरनिराकरणपक्षोपन्यासं पारापतविहङ्गमसदृशया स्खलितगिरा[3] प्रारभमाणः सभ्यैरन्तर्विहसद्भिः प्रत्यक्षप्रशंसापरैः पुरस्क्रियमाणः[4]कियदुपन्यासप्रान्ते उच्यतामित्युक्तो देवाचार्यः प्रलयकालोन्मीलितप्रचण्डपवनक्षुभितताम्भोधिनिचितवीचिसमीचीभिर्वाग्भिर्बृहदुत्तराध्ययनवृत्तेश्चतुरशीतिविकल्पजालोपन्यासे प्रक्रान्ते भास्वत्प्रतिभाप्रसरपरिम्लानायमानकुमुदः कुमुदचन्द्रः संभ्रमभ्रान्तचेतास्तद्वचनान्यवधारयितुमक्षमो भूय-

---

अन्यत्र नैगमादिसप्तनयानां॰ विनिर्जितः परेषां शत्रूणां च उत्सेक ऊर्ध्वत्यमहंकारश्च यैः। के पुरुषाः प्रशस्तबलवन्तो न अपि तु सर्वे दन्तिनो गजा अन्यत्र केवलिनः केवलज्ञानवन्तो नादन्तीति नो किं त्वदन्ति भुञ्जन्त्येव सदा छद्मस्थसाधुवदित्यर्थः ॥ १

१ A C विनिर्जित. २ A B भवतोः ३ C उपमया स स्खलितस्खलितगिरा ४ B पुरस्क्रियमाणैः (५ तरङ्गोज्ज्वलाभिः) ६ A उपन्यासप्रक्रमे भ्रश्यत्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तमेवोपन्यासं समभ्यर्थितवान् । सिद्धराजसभ्येषु निषेधपरेष्वपि । अप्रमेयप्रमेयलहरीभिस्तं प्रमाणाम्भोधौ मज्जयितुं प्रारब्धे षाडशे दिने आकस्मिके देवाचार्यस्य कण्ठावग्रहे मान्त्रिकैः श्रीयशोभद्रसूरिभिरंतुल्यकुरुकुल्लादेवीप्रसादलब्धवरैस्तत्कण्ठपीठात्क्षणाल्लक्षपणककृतकार्मणानुभावात्केशचण्डुकः पातयांचक्रे। तच्चित्रनिरीक्षणाच्चतुरैः श्रीयशोभद्रसूरिभिः श्लाघ्यमानः कुमुदचन्द्रश्चामन्दं निन्द्यमानः प्रमोदविषादौ दधाते। अथ श्रीदेवसूरिभिरुपन्यासोपक्रमे कोटाकोटिरिति शब्दे प्रोच्यमाने तच्छब्दव्युत्पत्तिं कुमुदचन्द्रे पृच्छति कण्ठपीठे लुठिताष्टव्याकरणः पण्डितः काकलः टापटीपसूत्रनिष्पन्नं शाकटायनव्याकरणोदितं कोटाकोटिः कोटीकोटिः कोटिकोटिरिति सिद्धं शब्दत्रयनिर्णयं प्राह ॥ अथ प्रथममेव वाचस्ततो मुद्रिता इति स्वयं पठितामिति स्वयमपशब्दप्रभावात्तदा तु प्रादुर्भूतमुखमुद्रः श्रीदेवाचार्येण निर्जितोहमिति स्वयमुच्चरन् श्रीसिद्धराजेन पराजितव्यवहारादऽपद्वारेणापसार्यमाणः संभवत्पराभवाविर्भावादुद्विस्फोटं[3] प्राप्य विषेदे ॥

१C वीरसूरिभिश्च. २ कार्मुकानुभावाद्वाहिः केशकण्डुकः ३D ऊर्ध्वस्फोटं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तरं तु श्रीसिद्धराजः प्रमोदमेदुरमनाः देवाचार्यप्रभावप्रभावनाचिकीर्मूर्द्ध्नि धारितासितातपत्रचतुष्टयः प्रकीर्णकप्रकरवीज्यमानः स्वयं दत्तहस्तावलम्बः पूर्यमाणेषु यमलशङ्खेषु रोदःकुक्षिंभरिविप्रमं बिभ्रति निःस्वाननिस्वनैः स्फूर्जद्वर्यतूर्यपूर्यमाणदिगन्तराले धाहडनाम्नोपासकेन लक्षत्रयप्रमितद्रव्यव्ययकृतार्थीकृतार्थिसार्थे वादिचक्रवर्तिनः पादावधार्यतामिति स्तुतिव्रातैरमन्दानन्दकन्दकन्दलनकारिणि मङ्गले मुहुर्मुहुरुच्यमाने श्रीदेवाचार्यान् धाहडेनैं तेनैव कारितप्रासादे श्रीमन्महावीरनमस्करणपूर्वं वसतौ प्रावेशयत्। तत्पारितोषके नृपतिः सूरिभ्योऽनिच्छन्नपि छालाप्रभृति ग्रामद्वादशकं ददौ ॥ तदुपश्लोकेन श्लोका एवं ॥

वस्त्रप्रतिष्ठाचार्याय नमः श्रीदेवसूरये ।
यत्प्रसादमिवाख्याति सुखप्रश्नेषु दर्शनम् ॥ १ ॥

इति श्रीप्रद्युम्नाचार्यः ॥

यदि नाम कुमुदचन्द्रं नाजेष्यद्देवसूरिरहिमरुचिः ।
कटिपरिधानमधास्यत्कतमः श्वेताम्बरो जगति ॥१

---

१ C प्रभावनां चिकीर्षुः २ D पूर्यमाणेषु दिगन्तरालेषु ३ D ऊर्जतूर्य. ४ A चाहड. ५ A B चाहडेन ६ A D प्रावेशयन् ७ दर्शनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति हेमाचार्यः ॥

भेजेऽवकीर्णितां*नग्नः कीर्तिकन्थामुपार्जयन्[1] ।
तां देवसूरिराच्छिद्य तं निग्रन्थं[2] पुनर्व्यधात् ॥१॥
इति श्रीउदयप्रभदेवः ॥

*वादविद्यावतोऽद्यापि लेखशालामनुज्झतां
देवसूरिप्रभोः साम्यं कथं स्यादेवसूरिणा ॥ १ ॥
इति श्रीमुनिदेवाचार्यः ॥

नग्नो यत्प्रतिभाघर्मात्[3]कीर्तियोगपटं त्यजन् ।
ह्रियेवात्याजि भारत्या देवसूरिर्मुदेऽस्तु वः ॥ १ ॥
सत्रागारमशेषकेवलभृतां भुक्तिं तथा स्थापय-
न्नारीणामपि मोक्षतीर्थमभवत्तद्युक्तियुक्तोत्तरैः ।
यः श्वेताम्बरशासनस्य विजिते नग्ने प्रतिष्ठागुरु-
स्तद्देवाद्गुरुतोऽप्यमेयमहिमा श्रीदेवसूरिप्रभुः[7] ॥२॥

---

*[क्षतव्रततां, अवकीर्णी क्षतव्रत इत्यमरः]

* मुनिदेवसूरिकृते शान्तिनाथचरित्रे श्लोकबद्धेऽप्ययं श्लोकः १२। देवसूरिणा बृहस्पतिना लेखनशालास्थितेनाद्यापीति विरोधः परिहारस्तु लेखानां देवानां शाला स्थानं स्वर्गमिति शाला स्थाने सभायां चेतिविश्वः

१ A कण्ठामुपार्ज्य यः २ C D निर्ग्रन्थं ३ A Bविदः ४ B अमुञ्चता ५ A धर्मात् ६ C स्पर्द्धावान् गुरुतो D लग्नप्रतिष्ठागुरु-श्रीदेवाद्गुरुतः ७श्रीदेवसूरिः प्रभुः B श्रीदेवसूरिप्रभोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति मेरुतुङ्गसूरिणां द्वयामिति देवसूरीणां प्रबन्धः॥

॥ अथ श्रीपत्तनवास्तव्य उच्छिन्नवंशकः आभडनामा वणिक्पुत्रः[1] कांस्यकारकहट्टे घर्घरकघर्षणं कुर्वंस्तत्र पञ्च विशोपकानर्जयित्वा दिनव्ययं कुर्वाणो द्विसन्ध्यमपि श्रीहेमसूरीणां चरणमूले प्रतिक्रमन्[2] प्रकृतिचतुरतयाऽधीतागस्त्यबौद्धमतादिरत्नपरीक्षाग्रन्थो रत्नपरीक्षकाणां सान्निध्यात्परीक्षादक्षः कदाचिच्छ्रीहेमचन्द्रसन्निधौ धनाभावात्परिग्रहप्रमाणनियमान्संकुचितान् गृह्णन् सामुद्रिकवेदिभिः प्रभुभिरायतौ तद्भाग्यवैभवप्रसरं विमृशद्भिस्तस्य लक्षत्रयद्रम्माणां परिग्रहमानं कारयद्भिः सह संतुष्टतया व्यवहरन्, कस्मिन्नप्यवसरे क्वापि ग्रामे यियासुरन्तराले ऽजाव्रजं व्रजन्तमालोक्यैकस्या अजायाः कण्ठे पाषणखण्डे रत्नपरीक्षकतया रत्नजातीयं परीक्ष्य तल्लोभात्तां मूल्येन क्रीत्वा मणिकारपार्श्वात्तमुत्तेजितं निर्माप्य सिद्धराजमुकुटघटनाप्रस्तावे लक्ष्यमूल्यद्रव्येण तं नृपायैव ददौ। तेन नीवीधनेन मञ्जिष्ठास्थानकानि[4] कदाचिदागतानि क्रीत्वा तद्विक्रयावसरे

(१ श्रीमालज्ञातीयः २ (ख) पञ्च लोष्टिकानीति पाठः तत्सम्मूल्ययोग्यनाणकविशेषान्) ३ B D प्रतिक्रामन् [४ मञ्जिष्ठागोणीः]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सांयात्रिकैर्जलचोरभयात्तदन्तर्निहिताः काञ्चनकम्बिकाः पश्यन् सर्वेभ्यः स्थानकेभ्यस्ताः संजग्राह । तदनन्तरं सर्वनगरमुख्यः श्रीसिद्धराजमान्यो जिनशासनप्रभावकः श्रावकः प्रतिदिनं प्रतिवर्षं यदृच्छया जैनमुनिभ्योऽन्नवस्त्रादि ददानो गुप्तवृत्त्या नव्यानि धर्मस्थानानि जीर्णानि च प्रशस्तिरहितानि स्वदेशेषु विदेशेषु च समुद्धार॥

वल्लीछन्नद्रुम इव मत्स्नाच्छादितसमस्तबीजमिव ।
प्रायः प्रच्छन्नकृतं सुकृतं शतशाखतामेति ॥ १ ॥

इति साह[२] आभडप्रबन्धः ॥

अथान्यस्मिन्नवसरे श्रीसिद्धराजः संसारसागरं तितीर्षुः प्रत्येकं सर्वदेशेषु सर्वदर्शनेषु देवतत्त्वधर्मतत्त्वपात्रतत्त्व जिज्ञासया पृच्छमानेषु निजस्तुतिपरनिन्दापरेषु सन्देहदोलाधिरुढमानसः श्रीहेमाचार्यमाकार्य विचार्यकार्यं पप्रच्छ । आचार्यैस्तु चतुर्दशविद्यास्थानरहस्यं विमृश्येति पौराणिकनिर्णयो वक्तुमारेभे । यत्पुरा कश्चिद्व्यवहारी पूर्वं परिणीतां पत्नीं परित्यज्य संग्रहणीसात्कृतसर्वस्वैः[३] सदैव पूर्वपत्न्या पतिवशीकरणाय तद्वेदिभ्यः का-

१ A C छछीछन्न. २ A वसाह C D वसा (३ वेश्याधीनकृतसर्वावित्तः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्मणकर्मणि पृच्छ्यमाने कश्चिद्गौडदेशीयो रहिम-
नियन्त्रितं तव पतिं करोमीत्युक्त्वा किंचिदाचिन्त्य-
वीर्यं भेषजमुपानीय भोजनान्तर्देयमिति भाषमाणः
स गतः । कियद्दिनान्ते समागते क्षयाहनि तस्मिं-
स्तथा कृते स प्रत्यक्षवृषभतां प्राप। स चतस्मती-
कारमनवबुध्यमाना विश्वविश्वाक्रोशान्सहमाना
निजं दुश्चरितं शोचन्ती कदाचिन्मध्यंदिने । दिने-
श्वरकठोरतरकरनिकरप्रसरतप्यमानापि शाडल-
भूमिषु तं पतिं वृषभरूपं चारयन्ती कस्यापि तरो-
र्मूले विश्रान्ता निर्भरं विलपन्ती, आलापं मभस्य-
कस्माच्छुश्राव । तदा तत्रागतो विमानाधिरूढः
पशुपतिर्भवान्या तद्दुःखकारणं पृष्टो यथावस्थितं नि-
वेद्य तस्यैव तरोश्छायायां पुंस्त्वनिबन्धनमौषधं त-
न्निर्बन्धादादिश्य तिरोदधे। सा तदनु तदीयां छायां
रेखाङ्कितां निर्माय तन्मध्यवर्त्तिन ऊषधाङ्कुरानुच्छेद्य
वृषभवदने क्षिपन्ती तेनाप्यज्ञातस्वरूपेणौषधाङ्कु-
रेण वदनन्यस्तेन स वृषभो मानुष्यतां प्राप । यथा
तदज्ञातस्वरूपोपि भेषजाङ्कुरः समीहितकार्यसिद्धिं
चकार तथा कलियुगे मोहात्तदपि तिरोहितं पात्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिज्ञानं सभक्तिकं सर्वदर्शनाराधनेनाऽविदितस्वरूपमपि मुक्तिप्रदं भवतीति निर्णयः। इति हेमचन्द्राचार्यैः। सर्वदर्शनसन्मानेऽनिवेदिते सति श्रीसिद्धराजः सर्वधर्माराधनां चकार ॥

इति सर्वदर्शनमान्यताप्रबन्धः ॥

॥अथान्यदा निशि कर्णमेरुप्रासादे नृपतिर्नाटकं विलोकयन् केनापि चणकविक्रयकारिणा वणिग्मात्रेण स्कन्धेन स्कन्धन्यस्तहस्तेन तल्लीलायितेन चित्रयिमाणमानसः स भूयो भूयस्तद्दीयमानं सकर्पूरवीटकं परितोषिते गृह्णन् नाटकविसर्जनावसरेनुचरैस्तद्गेहादि सम्यगवगम्य सौधमासाद्य सुष्वाप। प्रत्यूषे भूपः कृतप्राभातिककृत्यः सर्वावसरेऽलंकृतसभामण्डपस्तं चणकविक्रयकारिणं विपणिनमाकार्य निशि स्कन्धन्यस्तहस्तभारेण ग्रीवा बाधते इत्यभिहिते तत्कालोत्पन्नमतिर्विज्ञपयामास। देव आसमुद्रान्तभूभारे स्कन्धाधिरुढे यदि स्वामिनः न बाधते स्कन्धस्तदा तृणमात्रस्य निर्जीवस्य मम पण्याजीवस्य, भारेण स्वामिनः का स्कन्धबाधेति तदीयौचित्यविज्ञपनेन प्रमोदावान्नृपः पारितोषिकं ददौ ॥

---

१ A B संमते. २ D भारेण का.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति चणकविक्रयिवणिजः प्रबन्धः ॥

अथान्यास्यां निशि नृपः कर्णमेरुप्रासादात्प्रेक्षणं प्रेक्ष्य प्रत्यावृत्तः कस्यापि व्यवहारिणो हर्म्ये बहून्दीपानालोक्य किमेतदिति पृष्टः स लक्षदीपांस्तान्विज्ञपयामास। असौ धन्य इति।

स्वसौधमध्यमध्यास्य व्यतीतक्षणदाक्षणः

स धन्यमानी[1] तं सदः संमानीयेत्यादिदेश। एतेषां सदा प्रदीपानां प्रज्वालनेन भवतः सदा प्रदीपनं तद्भवदीयवित्तस्य कियन्तो लक्षा इत्यभिहितः स विद्यमानांश्चतुरशीतिलक्षान्निवेदयामास। तदनुकम्याकम्पमानमानसः स्वकोशात्षोडशलक्षान्प्रसादीकृत्य तत्सौधे कोटिध्वजमध्यारोपयामास ॥ इति षोडशलक्षप्रबन्धः ॥

अथान्यस्मिन्नवसरे राज्ञा कदाचिद्वालाकदेशे दुर्गभूमौ सिंहपुरमिति ब्राह्मणानामग्रहारः स्थापितस्तच्छासने षडुत्तरशतं ग्रामाः। अथ श्रीसिद्धराजः कदाचित्सिंहनादैर्भीतैर्विप्रैर्देशमध्यनिवासं याचितः साभ्रमतीतीरवर्तिनमाशाम्बिलीग्रामं[2] तेभ्यो ददौ। तेषां च सिंहपुरादन्यान्यादाय गच्छता-

१ A म धन्यमानी. २ A B आशाम्बली.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मागच्छतां च दानंमोक्षं चकार । अथ राज्ञा सिद्धराजेन मालवकं प्रति कृतप्रयाणेन वाराहीग्रामपरिसरमाश्रित्य तदीयान् पट्टकिलानाहूय तच्चातुर्यपरीक्षाकृते निजां प्रधानां राजवाहनसेजवालीं स्थपनिकार्थं समर्पयत । अथ नृपतौ पुरतः प्रयाते तैः सर्वैरपि संभूय तदङ्गानि प्रत्येकं विदार्य यथावाञ्छितं स्वस्वसौधे निदधिरे। अथ यदा प्रत्यावृत्तो नृपस्तां स्थापनिकां तेभ्यो याचमानस्तद्धौकितभिन्नानि तदङ्गानि पश्यन् सविस्मयं किमेतदित्यादिशंस्तैर्विज्ञपयांचक्रे। स्वामिन्नेकः कोप्यऽस्य वस्तुनो गोपनविधौ न प्रभूष्णुर्मलिम्लुचादिभ्यः कदाचिदपाये संजायमाने सति कः प्रभोरुत्तरकर्तेति विमृश्यैतदस्माभिर्व्यवसितं तदा राजा सविस्मयस्मेरमनास्तेषां ब्रूच इति बिरुदं ददौ ॥

इति वाराहीयाब्रूचप्रबन्धः ।

---

१ D दाण. २C पाट्टि. (३ यानविशेषं ४ संस्कारविशेषार्थं रोगान देवा इति भाषायां) C स्थापनिकार्थं (न्यासार्थं वा) ५ A समर्पिता. ६ C यथोचितं ७ B स्थपनिकां (न्यासं थापण इति भाषायां) ८ D मलिम्लुचानलादीनां कदाचिदपाये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ[1] कदाचिच्छ्रीजयसिंहदेवो नृपतिर्मालवकं विजित्य प्रत्यावृत्तः। उज्झा[2]ग्रामे निवेशितस्कन्धावारस्तैर्ग्रामीणैः प्रतिपन्नमातुलै[3]र्दुग्धपरिपूर्णप्रवाहादिभिरुचितैः परितोष्यमाणस्तस्यामेव निशि गुप्तवृत्त्या तद्दुःखसुखजिज्ञासुः कस्यापि ग्रामीणस्य गृहे गतः। गोदोहादिव्याकुलतायामपि तेन कस्त्वमिति पृष्टः, श्रीसोमेश्वरस्य कार्पटिकोहं महाराष्ट्रदेशवास्तव्य इति तस्मै न्यवेदयत्। तेन च नृपतेः पार्श्वे महाराष्ट्रदेशस्य तन्महाराजस्य च गुणदोषवृत्तान्ते पृच्छमाने स नृपतेस्तस्य षण्णवतिराजगुणान्प्रशंसंस्तत्पार्श्वे गूर्जराधीश्वरगुणदोषान्पृच्छन्। श्रीसिद्धराजस्य प्रजापालनपाण्डित्यं सेवकेष्वतुल्यवात्सल्यत्वं चेत्यादीन्गुणान्वर्णयंस्तेन कृत्रिमदोषे उत्पाद्यमाने सोऽस्माकं मन्दभाग्यतया नृपतेरपुत्रतालक्षण एव दोष इत्यधूनि मुञ्जन्नृपतिं निःकैतववृत्त्या परितोषयामास। अथ प्रभात-

---

१D अथ कदाचित्सिद्धराजः सिंहभीतीर्विप्रेदेशमध्यनिवासं याचितः साभ्रमतीतीरं तेभ्यो ददौ तेषां च सिंहपुराद्धान्यान्यादाय गच्छतां दाणमोक्षं चकार ॥ २ C कुण्डा D झञ्झा, ३ A मौतुलैः ४A B आषाढादिभिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काले संभूय सर्वेऽपि मिलिता नृपदर्शनोत्कण्ठिताः सौधमध्यास्य प्रभोः प्रणामानन्तरं तदतुल्यपल्यङ्के निविष्टाः, आसनदाननियोगिभिः प्रदत्तेपि पृथगासने तत्सौकुमार्यं करस्पर्शेन विचिन्त्य वयमिह सुखसुखेन निषण्णास्तिष्ठाम इति नृपे स्मितमुखाम्भोजे तस्थुः ॥

इति उज्झावास्तव्यग्रामीणानां प्रबन्धः॥

अथ कदाचिज्झालोज्ञातीयमाह्वनामा क्षत्रियः श्रीसिद्धराजसेवार्थं सभां गच्छन् प्रत्यहं पाराँचीद्वयं भूमौ निहत्योपविशति।उद्धरन्द्वयमुत्तिष्ठति तस्य च भोजने घृतपरिपूर्णः कुतुपँ एक एव व्यये याति-तस्य तु घृताभ्यक्तदाढिकानिर्माजने घृतषोडशांशो ऽवशिष्यते। कदाचिद्वपुरपाटवे पथ्यावर्सरे पञ्चमानकप्रमितयवागूपथ्यप्रान्ते आयुर्वेदविदाऽमृतोदकमर्द्धाहारे किमिति न पीतमुत्पुपालब्धः। यतः॥

पिबेद्वटसहस्रं तु यावन्नाभ्युँदितो रविः।
उदिते तु सहस्रांशौ बिन्दुरेको घटायते ॥ १

---

१ C कुण्डा. २ D गाला. ३ पाषाणभेदकः शस्त्रविशेषः पराई भाषायां ४ C उत्तिष्टंस्तद्वयमुद्धराति A B D ५ कुम्भः ६ A B व्याध्यवसरे ७C अस्तामितः ८ अस्तं याते ९ C D बिन्दुर्घटशतायते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रजन्याः पाश्चात्यघटिकाचतुष्टये सूर्यस्यानुदयावधि यन्नयः पीयते जलयोगः क्रियते तद्वज्रोदकं तदमृतोदकं सूर्योदये समुत्पन्ने निरन्नैः प्रातर्यदुदकं पीयते तद्विषं ततः बिन्दुरेको घटशतायते। भोजनार्द्धे यज्जलं पीयते तदमृतं भोजनान्ते तत्कालपीतं पयः छत्रं छत्रोदकमिति भण्यते। तेन प्रोक्तं पुनः, पूर्वभुक्तमर्द्धाहारं परिकल्प्य संप्रति पयः पीत्वा पुनरर्द्धाहारं करिष्यामीत्युपक्रममाणस्तेनैव वैद्येन निषिद्धः। नृपतिना निरायुधकारणं पृष्टः, समयोचितं मे प्रहरणमिति विज्ञपयन्नऽन्यदा मज्जनावसरे हस्तिपप्रेर्यमाणं हस्तिनमालोक्य सन्निहितश्वानेनं शुण्डादण्डे निहत्य मर्मस्थाननिपीडितस्य गजस्य पुच्छभागं स गृह्णन् तदीयातुलेन बलेनान्तस्त्रुटितस्य करटिन उत्तारिते हस्तिपके[५] भूपतितः सोऽसुभिर्व्ययुज्यत। स तु गूर्जरदेशभूपाले पलायिते समायातम्लेछान्समरे स्वेच्छयोच्छेदयन् यत्र दिवं प्राप्तस्तत्र श्रीपत्तने माङ्कूस्थण्डिलमिति प्रसिद्धिः॥

॥ इति माङ्कूझालाप्रबन्धः॥

१A C छत्रं छत्रोदकं २ C ततोसौ ३ A पूर्वान्नं. (४ कुक्कुरस्तु शुनिः श्वान इति वाचस्पतिः) ५C उत्तारिते भूपतौ D) उत्तारिते नृपतौ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा म्लेच्छप्रधानेषु[1] समायतेषु मध्यदेशागतान्वेषकारकानाकूय[2] रहस्यं किंचिदादिश्य विससर्ज नृपः। अथापरस्मिन्सायाह्ने च समागते[3] प्रलयकाल प्रचण्डपवनप्रादुर्भावे नृपः सुधर्मसंधर्माणमास्थानीमास्थाय यावदवलोकते तावदन्तरिक्षादवतरन्तं मस्तकन्यस्तकाञ्चनेष्टिकायुगेन काञ्चनशोभां बिभ्राणं पलादयुगलमालोक्य भयभ्रान्ते समाजलोके नृपचरणपीठे तदुपायनं विमुच्य भूपीठलुठनात्पूर्वं प्रणिपत्येति विज्ञपयामास । यदद्य देवार्चनावसरे लङ्कानगर्यां महाराजाधिराजः श्रीविभीषणो राजस्थापनाचार्यस्य रघुकुलतिलकस्य श्रीरामस्याभिरामगुणग्रामाभिरामस्य स्मरन् ज्ञानमयेन चक्षुषा संप्रति चालुक्यकुलतिलकं श्रीसिद्धराजावतारेऽवतीर्णं स्वयं स्वीयं स्वामिनमवधार्योत्कण्ठोत्कटायमानेमानसोऽहं तत्र प्रणामकरणायागच्छामीति किंवा प्रभुर्मामत्रागमनेनानुगृहीष्यतीति विज्ञपयन्नौ प्राहितवान् । तन्निर्णयं श्रीमुखेन समा-

१ A म्लेच्छेशेषु. २ B आकूय D रहः स किंचिदाकूय ३ B C D अवसरे (४ इन्द्रसभा.) ५ D अकुण्ठोत्कण्ठाघटमान. ६ A B C नमः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिशतु देवः। ताभ्यामित्यभिहिते नृपतिः किंचिदन्तर्विचिन्त्य स तावेवं समादिशत्[1]। यद्वयमेव प्रफुल्लायल्लकेलहरीप्रेर्यमाणाः स्वसमये स्वयमेव विभीषणमिलनाय समेष्याम इत्युदीर्य निजकण्ठशृङ्गारिणमेकावलीहारं प्रतिप्राभृतं प्रसादीकृतं। प्रभुणाहमयमपि [2]प्रेष्यप्रेषणावसरे न विस्मरणीय इति विशेषविज्ञप्तिं विधायान्तरिक्षमार्गेण तद्राक्षसद्वन्द्वं तिरोधत्ते। तदैव ते म्लेच्छप्रधानपुरुषा भयभ्रान्ताः स्वपौरुषमुत्सृज्य नृपपुरत आहूता भक्तिभारभासुराणि वचांसि ब्रुवाणास्तद्राजाय समुचितमुपायनमुपनीय श्रीसिद्धराजेन व्यसृज्यंत[4]॥

इति म्लेछागमनिषेधप्रबन्धः॥

अथानन्तरं कोल्लापुरेनगरराजस्य सभायां बन्दिनः श्रीसिद्धराजस्य कीर्तिं वितन्वन्तः, तदा तथ्यं सिद्धराजं वयं मन्यामहे यदा प्रत्यक्षमप्यस्माकं कमपि चमत्कारं सिद्धराजो दर्शयतीत्येतद्ब्रुवाणेन तेन राज्ञा ते पराकृतास्तत्स्वरूपं नृपतेर्विज्ञपयामासुः। अथ स्वामिनि सभायां निभालयति तत्तत्त्ववेदिना के-

---

१ सत्यमेवमादिदिश २ [उत्कण्ठातिशयाश्चर्यं) ३ A B आएच्छतामवसरे प्रभुणाहमन्यस्मिन्नपि. ४ D व्यसृज्यन्त. ५ A कौल्लाकपुर.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नापि नियोगिनाञ्जलिबन्धपूर्वकं निजाभिप्राये प्रादुः-
क्रियमाणे राज्ञा स रहसि तत्कारणं पृष्टो नृपतेरा-
शयं विज्ञपयन् द्रव्यलक्षत्रयसाध्योऽयमर्थ इति वा-
क्यविशेषमाह । तदैव दैवज्ञनिर्दिष्टे मुहूर्त्ते स नृ-
पाल्लक्षत्रयमुपलभ्य वणिगाकारो भूत्वा सर्व-
भाण्डानि संगृह्य सिद्धशङ्केव रत्नखचितं सुवर्णपा-
दुकायुगलमतुलं योगदण्डं च मणिमयकुण्डलयुगलं
च । तद्विधयोगपिशुनं योगपट्टं च चण्डांशुरोचिश्च-
न्द्रातपं सह नीत्वा पथानमुल्लङ्घ्य कतिपयैरहोभि-
स्तत्पुरे दत्तावासः। आसन्नायां दीपोत्सवनिशि तन्न-
गरराज्ञोऽवरोधे महालक्ष्मीदेव्याः पूजार्थं तत्प्रासाद-
मुपेयुषि स कृतकसिद्धरूपस्तेन वेषेणालंकृतः, के-
नापि सदभ्यस्तोप्ततनेन बर्बरेणानुगम्यमानो दे-
व्याः पीठेऽकस्मात्प्रादुरासीत् । देव्या रत्नमय-
सुवर्णकर्पूरमयीं सपर्यां विरचयंस्तदवरोधाय तद्वि-
धानि बीटकानि ददानः श्रीसिद्धराजनामाङ्कितं
सिद्धवेषं पूजाव्याजात्तत्र नियोज्यात्पतनवशाद्व र्बर-
स्कन्धमधिरुह्य यथागतमगात् । निशावसाने सम-
येऽवरोधैस्तं विरोधिनृपवृत्तान्तं ज्ञापितः सन् भयभ्रा-
न्तो नृपः स्वप्रधानपुरुषैस्तत्प्राभृतं सिद्धाधिपतये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राहिणोत् । अथ तेन नियोगिना भाण्डादिक्रयविक्रयं संक्षिप्य । ममागमनावधि नैतेषां प्रधानानां दर्शनं देयमिति वेगवता पुरुषेण विज्ञपयामास । तदनु झगिति कतिपयैर्दिनैस्तत्र समुपेतः । तत्स्वरूपं विज्ञप्तो नृपतिस्तेषां प्रधानानां तदुचितामावर्जनां चकार॥

इति कोल्हापुरराजप्रबन्धः ॥

श्रीसिद्धराजेन मालवमण्डलाद्यशोवर्मा नृपतिर्निबध्यानीतः। अवसरे क्रियमाणेन सीलनाभिधानकौतुकिना "बेडायां समुद्रो मग्न इति" तत्पृष्ठगायनेनापशब्दं ब्रूषे इति तर्जितो बेडासमानायां गूर्जरधरित्र्यां मालवकसमुद्रो मग्न इति विरोधालङ्कारमर्थापत्त्या परिहरन्प्रभोर्हेममयीं जिह्वां प्राप ॥

इति कौतुकीसीलणप्रबन्धः ॥

कदाचित्सिद्धराजस्य वाग्मी कश्चित्सान्धिविग्रहिको जयचन्द्रनाम्ना काशीपुरीश्वरेण श्रीमदणहिल्लपुरस्य प्रासादप्रपानिपानादिस्वरूपाणि पृच्छतेति दूषणमुक्तः। यत्सहस्रालिङ्गसरोवरवारि शिवनिर्माल्यं तदऽस्पृशतया तत्सवका अतो लोकद्वयाविरोधिनस्तत्रत्यलोकः कथमुदितोदितप्रभावःस्यादिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धाधिपेन सहस्रलिङ्गसरः कारयताऽनुचितमिदमाचरितमिति तस्य नृपतेर्वचसान्तः कुपितः स नृपं पप्रच्छ। अस्यां वाणारस्यां कुतस्त्यं पयः पीयते?नृपेण त्रिपथगाजलमित्युदीरिते किं नाम सुरसरिन्नीरं शिवनिर्माल्यं न यतः शिवोत्तमाङ्गमेव गङ्गानिवासभूमिः॥

इति जयचन्द्रराजेन गूर्जरप्रधानस्योक्तिप्रबन्धः।

कस्मिन्नप्यवसरे कर्णाटविषयादागतेन सान्धिविग्रहिकेण श्रीमयणल्लदेव्या पितुर्जयकेशिराजस्य कुशलोदन्ते पृष्टेश्रुमिश्रलोचनेनेति सा विज्ञपयामास। स्वामिनि सुगृहीतनामां जयकेशिमहीन्द्रोऽशनावसरे पञ्जरात्क्रीडाशुकमाकारयन्, तेन मार्जार इत्युच्चरिते नृपः परितो विलोक्य निजभोजनान्धोऽधो भागवर्त्तिनमोतुमपश्यन् यदि तव बिडालेन विनाशः स्यात्तदाहं त्वया सहगमनं करवाणीति प्रतिज्ञाते स यावत्पञ्जरादुड्डीय तस्मिन्काञ्चनभाजने निषीदति तावदकस्मात्तेन वृकदंशेन तं विनाशितमालोक्य परित्यक्ताशनकवलः। उक्तियुक्तिवेदि-

(१ प्रभाते यन्नाम स्मर्तुं योग्यमस्ति सः)

२ C D निजभोजनभाजनाधोभागवर्तिनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ना राजवर्गेण निषिध्यमानोपि ॥

राज्यं यातु श्रियो यान्तु यान्तु प्राणा अपि क्षणात्।
या मया स्वयमेवोक्ता वाचा मा यातु शाश्वती॥१॥

इतीष्टदैवतमिव[2] तामेव गिरं जपंस्तेनैव शुकेन सह दारुनिचितां चितां विवेश ।

इति वाक्याकर्णनाच्छोकाम्भोधिमग्नां श्रीमयणल्लदेवीं विशेषधर्मोपदेशहस्तावलम्बनेन विद्वज्जनः समभ्युद्धधार । अथ सा पितुः श्रेयसे श्रीसोमेश्वरपत्तने यात्रां गता सती त्रिवेदिनं[3] कमपि ब्राह्मणमाकार्य तदञ्जलौ जलन्यासावसरे यदि भवत्रयपातकं लासि तदा ददामि[4] नान्यथेति तद्वचनाविशेषपरितोषभाक् गजाश्वकाञ्चनादिभिर्युतं[5] पापघटमाददौ । स च तत्सर्वं विप्रेभ्यो ददानः किमिति देव्या पृष्टः प्राह । प्राक्तनपुण्यादस्मिन् जन्मनि नृपप्रिया नृपतिजननी भूत्वा लोकोत्तरैरेभिर्दानैः सुकृतैर्भावी भवोपि श्रेयस्कर इति विमृश्य भवत्रयपातकं मया जगृहे । भवत्या पापघटदाने उपक्रान्ते कश्चिदधमद्विजोपि पापघटं नीत्वा स्वं भवतीं च

१ A B याच्ञया २ C देवतां. ३ A त्रिवेदीवेदिनं ४ B C ददामि तदाददासि ५ D दानैर्युतं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवाम्भोधौ मज्जयिष्यतीति मया तु संन्यस्तसमस्तवित्तेन वित्तमेतदादाय पुनर्ददता लब्धादृष्टगुणं पुण्यं लब्धमिति । श्रेयः स जगृहे ॥

॥ इति पापघटस्य प्रबन्धः ॥

॥ अथ कदाचिन्मालवकमण्डलं विगृह्य स्वदेशनिवेशं प्रति चलितः श्रीसिद्धाधिपोऽन्तरालेऽप्रतिमल्लैर्भिल्लै रुद्धमध्वानमवधार्य तस्मिन्वृत्तान्तेज्ञाते सति मन्त्री सान्तूनामा प्रतिग्रामं प्रतिनगरं घोटकंमुद्ग्राह्य प्रतिवृषं पर्याणानि[2] विन्यस्य मेलितातिदलबलेन[3] भिल्लान्वित्रास्य श्रीसिद्धराजं सुखेन समानीतवान् ॥

इति सान्तूमन्त्रिप्रबन्धो बुद्धिवैभवप्रबन्धोवा ॥

अथ कस्यांचिन्निशि द्वावकुण्ठावेव वण्ठौ श्रीसिद्धराजस्य चरणसंवाहनव्याप्तौ[4] तं निद्रामुद्रितलोचनं विचिन्त्य तदाद्यो निग्रहानुग्रहसमर्थं श्रीसिद्धराजं सेवकजनकल्पवृक्षं सर्वराजगुणनिलयं प्रशशंस । अपरस्त्वस्यापि भूपतेः प्राज्यराज्यप्रदं प्राक्तनं कर्मैव श्लाघितवानेवमाकर्णितेन तेन राज्ञा त-

(१ अश्वजातिमात्रं. २ पल्याणानि.) ३ C बलस्तद्बलेन
४ D) संवाहना. (पादमर्दनव्यापारे सति)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मिन्वृत्तान्ते तत्कर्मणः प्रशंसां विफलीकर्तुं स्वप्रशंसाकारिणः प्रेष्यस्यापरस्मिन्नहन्यऽनिवेदिततत्त्वस्य प्रसादलेखमार्पयत् । यदस्मै वण्ठाय तुरङ्गमशतस्य सामन्तता देयेत्यालिख्यं तं महामात्यश्रीसान्तूपार्श्वे प्राहिणोत् । अथ स यावच्चन्द्रशालाया निःश्रेण्यामवरोहति तावत्प्रस्खलितपदः पृथिव्यां पतदीषदङ्गभङ्गमङ्गीकृतवान् । तत्पृष्ठानुगामिनाऽपरेण वण्ठेन किमेतदिति पृष्टे तेन स्वस्वरूपे निवेदिते स मञ्चकन्यस्तो गृहं गत्वा तमपरस्मै[२] समर्पितवान् । तत्प्रमाणेन महामात्यस्तस्मै शततुरङ्गमसामन्ततां ददौ । अथ तयोर्यथावद्वृत्तान्तेऽवधारिते नृपतिः कर्मैव बलीय इति तत्प्रभृति मेने यथा ॥

*नैवाकृतिः फलति नैव कुलं न शीलं
विद्या न चापि मनुजेषु कृता न सेवा ।
पुण्यानि[४] पूर्वतपसा किल संचितानि

---

* वल्लभदेवकृतसुभाषितावल्यांश्लो. ३१०० भदन्त अश्वघोषस्य ॥
विद्या सहस्रगुणिता न च वाग्विशुद्धिः।
कर्माणि पूर्वशुभसंचयसंचितानीति पाठभेदः

१ C आलेख्य २ A प्रसादलेखं ३ A D तपोपि न च यत्नकृतापि सेवा ४ B D भाग्यानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ १ ॥
इति वण्ठकर्मप्राधान्यप्रबन्धः ॥
*सो जयउ कूडच्छरडो[1] तिहुयणमज्झम्मि[2] जेसल-
नरिन्दो ।
छित्तूण रायवंसं[3] इक्कं छत्तं कयं जेण ॥ १ ॥
मात्रयाप्यधिकं किंचिन्न सहन्ते जिगीषवः ।
इतीव त्वं धरानाथ धारानाथमपाकृथाः ॥ २ ॥
मानं मुञ्च सरस्वति त्रिपथगे सौभाग्यभङ्गीस्त्यज
रे कालिन्दि तवाफला कुटिलता रेवे रयस्त्यज्यताम्।
श्रीसिद्धेशकृपाणिपाटितरिपुस्कन्धोच्छलच्छोणित-
स्रोतोजातनदीनवीनवनितारक्तोम्बुधिर्वर्त्तते ॥ ३ ॥
श्रीमज्जैत्रमृगारिदेवनृपते सत्यं प्रयाणोत्सवे
पानीयाशयशोषणैः करटतो[7] वीरव्रणाँकाङ्क्षया ।
स्वीयस्वीयपतेर्विनाशसमयं संचिन्त्य चिन्तातुरा
मत्सी रोदिति मक्षिका च हसति ध्यायन्ति वा-
मं[8] स्त्रियः ॥४॥

---

* स जयतु कूटोच्छेदकः त्रिभुवनमध्ये जयसिंहनरेन्द्रः । छित्त्वा राजवंशं एकं छत्रं कृतं येन एकच्छत्रं राज्यं कृतमित्यर्थः॥ १ ॥

D नरडो. २ B मज्झम्मि. ३ D रायवंसे. [४ भङ्गी. रचनाः] ५ C कृपाण. (६ गन्धहस्तिगण्डस्थलात्) ७ B वीरव्रत. (८ वामाङ्ग-स्फुरणं) B वामभ्रुवः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सपादलक्षः सह भूरिलक्षै[1]—
रानाकभूपाय नताय दत्तः ।
दृप्ते यशोवर्मणि मालवोपि[2]
त्वया न सेहे द्विषि सिद्धराज ॥ ५
इत्याद्या बहुशः स्तुतयः प्रबन्धाश्च तदीयाः॥
संवं० ११५० वर्षे उपविष्टो जयसिंहदेवस्तथानेन राज्ञा वर्ष ४९ राज्यं कृतं ॥

[ङः]

इति मेरुतुङ्गाचार्यकृते प्रबन्धचिन्तामणौ श्रीकर्ण-श्रीसिद्धराजयोर्विविधचरित्रनानावदातवर्णनो नाम तृतीयः प्रकाशः ॥

---

१ D तूरि. (२ मालवः लक्ष्मीलेश इतिश्लेषः)

२ इत्याद्या बहवस्तदीयाः स्तुतयः प्रबन्धाश्च ॥

१ A संवत् ११९० पूर्वं श्रीसिद्धराजश्रीजयसिंहदेवेन वर्षाणि ५९ राज्यं कृतं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुमारपालप्रबन्धः

अथ परमार्हतश्रीकुमारपालप्रबन्धः प्रारभ्यते ॥

॥ श्रीमदणाहिलपुरपत्तने वृहति श्रीभीमदेवे साम्राज्यं पालयति श्रीभीमेश्वरस्य पुरे चउलादेवीनाम्नी[1] पण्याङ्गना पत्तने प्रसिद्धं गुणपात्रं रूपपात्रं च कुलयोषितोप्यतिशायिनी प्राज्यमर्यादां नृपतिर्विमृश्य तस्यास्तद्वृत्तपरीक्षानिमित्तं सपादलक्ष्यमूल्यां क्षुरिकां निजानुचरैस्तस्यै ग्रहणके दापयामास । औत्सुक्यात्तस्यामेव निशि बहिरावासे प्रस्थानलग्नमसाधयत् । नृपो वर्षद्वयं यावन्मालवकमण्डले विग्रहाग्रहात्तस्थौ[2] । सा चउलादेवी तद्वित्तग्रहणकप्रामाण्येन तद्वर्षद्वयं परिवृतसर्वपुरुषाशीललीलयैव तस्थौ । निस्सीमपराक्रमो भीमः कृती स्वैस्थानमागतो जनपरंपरया तस्यास्तां प्रवृत्तिमवगम्य तामन्तःपुरे न्यधात् । तदङ्गजो हरिपालस्तत्सुतस्त्रिभुवनपालस्तत्पुत्रः कुमारपालदेवः । स तु विदितधर्मोपि कृपापरः परनारीसहोदरश्च स तु सामुद्रिकवेदिभिर्भवदनन्तरमयं नृपो भवि-

१ C चउलादेवीनामा २ C चातीव तस्याः ३ D विग्रहाय ४ B सा तु चउला ५ A तृतीयवर्षे ६ हरिपालदेवः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्यतीति सिद्धनृपो विज्ञप्तस्तस्मिन्हीनजातावित्य-
सहिष्णुस्तय विनाशावसरमन्वेषयामास सततं ।
स कुमारपालस्तं वृत्तान्तमीषद्विज्ञाय तस्मान्नृपतेः
शङ्कुमानमानसः तापसवेषेण निर्मितनानाविधदे-
शान्तरभ्रमणःकियन्त्यपि वर्षाण्यतिवाह्य पुनः पत्त-
नमागतः । क्वापि मठे[1] तस्थौ । अथ श्रीकर्णदेवस्य
श्राद्धावसरे श्रद्धालुतया निमन्त्रितेषु सर्वेष्वपि
तपस्विषु श्रीसिद्धराजः प्रत्येकं तेषां तपस्विनां
स्वयं पादौ प्रक्षालयन् कुमारपालनाम्नस्तपस्विनः
कमलकोमलौ चरणौ करतलेन संस्पृश्य तद्ऊर्ध्वरे-
खादिभिर्लक्षणै राज्यार्होयमिति निश्चलया दृशा-
पश्यत् । तदिङ्गितैस्तं विरुद्धं विबुध्यमानस्तदैव-
वेषपरावर्त्तेन काकनाशं नष्टः । आलिङ्गनाम्नः कु-
लालस्यालये मत्यात्राणां पाके[2] रच्यमाने तदन्त-
र्निधाय तदानुपदिकेभ्यो रक्षितः स क्रमात्ततः
संचरन् तद्विलोकनाकुलितेन राजलोकेन त्रासितः
सन्निहितां दुर्गमां दुर्गभूमिमवलोक्य क्वापि क्षेत्रे
क्षेत्ररक्षकैः[3] क्रियमाणछिन्नकण्टकिशाखिशाखानिचये

---

१ C श्रीमदादिभूपतेरशठो मठे २ आपाके ३ ध्वा-
क्षरक्षकैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुपचीयमाने तं तदन्तर्निधाय तेषु स्वस्थानमागतेषु पदिकेन पदे तत्रानीते सर्वथा तत्रासंभावनया कुन्ताग्रेण भिद्यमानेपि तस्मिंस्तमनासाद्य व्यावृत्ते राजसैन्ये द्वितीयेऽहनि क्षेत्राधिकृतैस्ततः स्थानादुद्धृतः पुरतः क्वापि प्रातरान्तर्व्रजन् क्वापि तरुच्छाये विश्रान्तः सन् बिलान्मूषकं मुखेन रूप्यनाणकमाकर्षन्तं निभृतया दृशा विलोक्य यावदेकविंशसंख्यानि दृष्ट्वा पुनस्तेभ्य एकं गृहीत्वा बिलं प्रविष्टे पाश्चात्यानि तु सर्वाणि स गृहीत्वा यावन्निभृतीभवति तावत्स तान्यनवलोक्य तदर्त्यां विषेदे। स तच्छोकव्याकुलितमानसश्चिरं परितप्य पुरतो व्रजन्, कयापीभ्यवध्वा श्वशुरगृहात्पितृगृहं व्रजन्त्या, पथि पाथेयाभावाद्दिनत्रयं क्षुत्क्षामकुक्षिर्भ्रातृवात्सल्यात्कर्पूरपरिमलशालिशालिकरम्बेण[3] सुहितीचक्रे। तदनु स विविधानि देशान्तराणि परिभ्रमन्स्तम्भतीर्थे महं० श्रीउदयनपार्श्वे शम्बलं[4] याचितुमागतः। तं पौषधशालायामागतमाकर्ण्य तत्रागते तस्मिन्नुदयनेन पृष्टः श्रीहेमचन्द्राचार्यः

[१ दूरशून्याध्वनि २ दधियुक्तसक्तुना ३ सुतृप्तः कृतः ४ पाथेयं द्रव्यादि ५ जैनीयव्रतनियमविशेषाचरणस्थानं प्रसिद्धं]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राह । लोकोत्तराणि तदङ्गलक्षणानि वीक्ष्य सार्वभौमोऽयं नृपतिर्भावीत्यादिशत् । आजन्म दरिद्रोपद्रवंतया तां वाचं संदिग्धतया मन्यमानेन तेन क्षत्रिये नासंभाव्यमेतदिति विज्ञप्ते, सं.११९९ वर्षे कार्त्तिकवदि २ रवौ हस्तनक्षत्रे यदि भवतः पट्टाभिषेको न भवति तदाऽतःपरं निमित्तावलोकसंन्यास इति पत्रकमालिख्यैकं मन्त्रिणेऽपरं तस्मै समारोपयत् । अथ स क्षत्रियस्तत्कलाकौशलचमत्कृतमानसः यद्यदः सत्यं तदा भवानेव नृपतिः, अहं तु त्वच्चरणरेणुः स कुमारपाल इति प्रतिश्रवं श्रावयन् "किंनो नरकान्तराज्यलिप्सया" भवतु कृतज्ञेन भवता वाक्यमिदमप्यऽविस्मरता जिनशासनभक्तेन सततमेव भाव्यमिति तदनुज्ञास्तिं शिरःशेखरीकृत्याष्टच्छ्य च मन्त्रिणा सह गृहं प्राप्तः । स्नानपानाशनादिभिः सत्कृतः यथायाचितं पाथेयं समर्प्य प्रस्थापितो मालवकदेशं गतः । कुडङ्गेश्वरप्रासादे प्रशास्तिपट्टिकायां ॥

पुन्ने[2] वाससहस्से[3] सयम्मि वरिसाण नवनवइअहिए।
होही कुमरनरिन्दो तुह विक्कमराय सारित्थो ॥१॥

१ उपद्रुततया २ C D पुण्णे ३ A बारसहस्से

इमां गाथामालोक्य विस्मयापन्नमानसो गूर्जरनाथं सिद्धाधिपं परलोकगतमवगम्य ततः प्रत्यावृत्तो विलीनशम्बलोऽस्मिन्नगरे कस्यापि विपणिनो विपणादशनान्तरं पलायमानः श्रीमदणहिल्लपुरमुपेत्य निशि कान्दविकापणे धनाभावाद्भुक्तदशनो भगिनीपते राजश्रीकान्हडदेवस्य सदनमासाद्य राजमन्दिरादागतेन तेन पुरस्कृत्यान्तर्नीतः सद्भोजनादिभिः सुहितीभूतः सुष्वाप। प्रातस्तेन भावुकेन स्वसैन्यं सन्नह्य नृपसौधमानीयाऽभिषेकपरिक्षानिमित्तं प्रथममेकः कुमारः पट्टे निवेशितः। तमुत्तरीयाञ्चलेनाप्यनावृण्वन्तमालोक्य तदपरोनिवेशितस्तं योजितकरसंपुटं वीक्ष्य तस्मिन्नप्यप्रमाणीकृते श्रीकान्हडदेवानुज्ञातः कुमारपालः संवृतवसनः उद्धर्वं पवनं गृह्णन् सिंहासने उपविश्य कृपाणं पाणिना कम्पयन् पुरोधसा कृतमङ्गलःपञ्चाशद्वर्षदेश्यः सनिस्वानान्यनिस्वनं श्रीमता कान्हडदेवेन पञ्चाङ्गचुम्बितभूतलं

---

१ A तमेव बन्दीचकार सत्वाकुलमाक्रन्दन्मिलितनगरलोकैर्द्वयोरपि निधनं निश्चित्य मम कृतकमूर्च्छां भवानपनयतु इत्यभिहितस्तेमतिवैभवेन प्रत्युज्जीवितं मन्यस्तत्तथा कृत्वा तस्मादपायात्पलायमानः २ B व्यपेतोपायः ३ राजकुलश्री. ४ अञ्चलमप्यनावृण्वानं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमोऽकारि। स प्रौढतया देशान्तरपरिभ्रमणनैपुण्येन राज्यशास्तिं स्वयं कुर्वन् राजवृद्धानामरोचमानस्तैः संभूय व्यापादयितुं व्यवसितः। सान्धकारगोपुरेषु न्यस्तेषु घातुकेषु प्राक्तनशुभकर्मणा प्रेरितेन केनाण्याप्तेन ज्ञापितवृत्तान्तस्तं प्रवेशं विहाय द्वारान्तरेण वप्रं प्रविश्य तानि प्रधानान्यन्तकपुरीं प्राहिणोत्। स भावुकमण्डलेश्वरः शालकसंबन्धाद्राज्यस्थापनाचार्यत्वाच्च राज्ञो दुरवस्थामर्माणि जल्पति। पश्चाद्राज्ञोक्तं हे भावुक राजपटिकायां सर्वावसरे च प्राक्तनदुरवस्थामर्मनर्म[1] न भाषणीयं त्वयाऽतः परमेवं विधं सभासमक्षं नो वाच्यं विजने तु यदृच्छया वाच्यमिति राज्ञोपरुद्धः। उत्कटतयाऽवज्ञावशाच्च रे अनात्मज्ञ इदानीमेव पादौ त्यजसीति भाषमाणो मर्तुकामः ऊषधमिव तद्वचः पथ्यमपि न जग्राह। नृपस्तदाकारसंवरणेनाऽपन्हवं विधायाऽपरस्मिन्दिवसे नृपसंकेतितैर्मल्लैस्तदङ्गभङ्गं कृत्वा नेत्रयुगं समुद्धृत्य ततस्तं तदावासे प्रस्थापयामास॥

आदौ मयैवायमदीपि नूनं

---

१ दुरवस्थया समं मर्म

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न तद्दहेन्मामवहेलितोपि ।
इति भ्रमादङ्गुलिपर्वणापि
स्पृशेत[1] नो दीप इवावनीपः ॥१॥

इति विमृशद्भिः समन्ततः सामन्तैर्भयभ्रान्तचित्तैस्ततः प्रभृति स नृपतिः प्रतिपदं सिषेवे । तेन राज्ञा पूर्वोपकारकर्त्तुः श्रीमदुदयनस्याङ्गजः श्रीवाग्भटदेवनामा महामात्यश्चक्रे । आलिङ्गनामा ज्यायान्प्रधानः । महं० उदयनदेवस्य पुत्रो वाहडनामा कुमारः श्रीसिद्धराजस्य प्रतिपन्नपुत्रः श्रीकुमारपालदेवस्यावज्ञामेव मन्यमानः[2] सपादलक्षीयभूपतेः पत्तिभावं बभार । तेन श्रीकुमारपालभूपालेन सह विग्रहं चिकीर्षुणा तत्रत्यं सकलमपि सामन्तलोकं लञ्चोपचारदानैः[3] स्वायत्तीकृत्य दुर्वारस्कन्धावारोपेतं सपादलक्षक्षोणीपतिं सहादाय देशसीमान्तमागतः । अथ चौलुक्यचक्रवर्त्ती अभ्यमित्रीणतया स्कन्धावारसमीपे निजं चमूसमूहं निवेशयामास । निर्णीते समरवासरे निष्कण्टके क्रियमाणे सीमनि सज्जीक्रियमाणायां चतुरङ्गसेनायां चउलिङ्गनामा पट्टहस्तिनो हस्तिपकः कस्मिन्नप्यागसि नृपेणा-

१ D स्पृश्योपि २ C आज्ञामवमन्यमानः ३ B दानादिना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रुश्यमाणः क्रोधादङ्कुशं तत्याज । अथ सामलनामाऽमात्रगुणपात्रं महामात्रं पुष्कलवसुदानपूर्वकं तत्पदे नियोजितः सन् राज्ञा स्वकलहपञ्चानननामानमनेकपं प्रक्षरितं कृत्वा तदुपरि नृपासनं निवेश्य तत्र षट्त्रिंशदायुधानि नियोजयन्सकलकलाकलापसंपूर्णः कलापके चरणौ नियोज्य स्वयमारूढवान् तदासनस्थश्चौलुक्यभूपालोपि संग्रामाधिकृतपुरुषैरुत्थापनिकां कार्यमाणेषु बाहडकुमारभेदादाज्ञाभङ्गकारिषु, इति सैन्यविप्लवमाकलय्य तं निषादिनमादिदेश पुरो गन्तुं, सन्मुखसेनायां सपादलक्षक्षितिपतिमतङ्गजं छत्रचामरसंकेतादुपलक्ष्य विघटिते कटकबन्धे मयैवैकाकिना योद्धव्यमिति निर्णीय तेनाधोरणेन स्वसिन्धुरं तत्सन्निधौ नेतुमादिशन्नपि तमपि तथाऽकुर्वाणं विलोक्य त्वमपि विघटितोसीत्यादिशंस्तेन विज्ञपयांचक्रे । स्वामिन्कलहपञ्चाननो हस्ती सामलनामा हस्तिपकश्च द्वयं युगान्तेपि न विघटते[1] परं परस्मिन्कुम्भिकुम्भे बाहडनामाकु मारस्तारध्वनिराधिरूढोस्ति यस्य हक्कया हस्तिनोपि भज्यन्ते इत्युक्तोत्तरीया-

१ A विघटीयिष्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलयुगलेन सिन्धुरश्रवणौ पिधायं स निजं गजं प्रतिगजेन संघट्टयामास । अथ बाहडः पूर्वमात्मसात्कृतं चउलिनामानमारोहकं जानन् कृपाणपाणिर्निजगजात्कलहपञ्चाननकुम्भे पदं ददानः श्रीकुमारपालविनाशाशया, तेन नियन्त्रा पश्चात्कृते गजेस भूमौ पतितस्तलवर्गीयपदातिभिरधारि । तदनु चौलुक्यभूपतिना श्रीमदानाकनामा सपादलक्षनृपः शस्त्रसज्जो भवेत्पभिहितस्तन्मुखकमलं प्रति औचित्पाच्छिलीमुखं व्यापारयन् प्रधानक्षत्रियोसीति सोपहासश्लाघया तं वञ्चयित्वा नाराचेन निर्भिद्य कुम्भीन्द्रकुम्भे पातयित्वा जितं जितमिति ब्रुवाणः स्वयं पोतं भ्रमयांचकारेति सर्वेषां सामन्तानां सर्वानपि तुरङ्गमान् स नृपतिराक्रम्य जग्राह ॥

इति बाहडकुमारप्रबन्धः ॥

तदनु चौलुक्यराजेन कृतज्ञचक्रवर्त्तिना आलिङ्गकुलालाय सप्तशतीग्रामीमिता विचित्रविचित्रकूटपट्टिका ददे । ते तु निजान्वयेन लज्जमानाः अद्यापि सगरा इत्युच्यन्ते । यैः छिन्नकण्टकान्तरे प्रक्षिप्य क्षितिपो रक्षितस्तेङ्गरक्षपदे प्रतिष्ठिताः ॥

१ B युगलं सिन्धुरश्रवणयोराधिरोप्य २ वस्त्रं १ A B सागरा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ सोलाकनामा गन्धर्वोऽवसरे गीतकलया परितोषिताद्राज्ञः षोडशाधिकं द्रम्माणां शतं प्राप्य तेन सुखभक्षिकां विसाध्य बालकांस्तर्पयन् राज्ञा कुपितेन निर्वासितः। ततो[2] विदेशं गतस्तत्रत्य-भूपतेर्गीतकलया रञ्जितात्प्रसादप्राप्तं गजयुगलमानीयोपायनीकुर्वन् चौलुक्यभूपालेन संमानितः। कदाचित्कोपि वैदेशिकगन्धर्वो मुषितोस्मि मुषितोस्मीति तारं बुम्बारवं कुर्वाणः, केन मुषितोसीति राज्ञाभिहितो मम गीतकलया समीपागतेन, मया कौतुकाद्गलन्यस्तकनकशृङ्खलेन[3] मृगेण त्रस्पता मृगेन्द्रेणेति विज्ञपयामास। स तदनु भूपतिना समादिष्टः सोलाभिधानो गन्धर्वराडटवीमटन् स्फीतगीताकृष्टिविद्यया कनकशृङ्खलाङ्कितगलं[4] मृगं नगरान्तः समानीय तस्य भूपतेर्दर्शयामास। अथ तत्कलाकौशलचमत्कृतमानसः प्रभुः श्रीहेमाचार्यो गीत कलाया अवधिं पप्रच्छ। स शुष्कदारुणः पल्लवप्ररोह मवधिं विज्ञप्तवान्। तर्हि तत्कौतुकं ददर्शयेत्यादिष्टः

१ C तस्य चौलुक्यराज्ञः पट्टाभिषेकोनन्तरं स सोलाकनामा २C स करेणुमारुह्य वि० ३ B सामीप्यमुपेयुषा. कौतुकार्थितगलशृङ्खलेन ४९ D गलस्खेलत्कनकशृङ्खलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्बुदाद्रिरेवैरहकनामानं वृक्षमाक्षेपादानाय्य तच्छुष्कशाखायाः काष्ठं राजाङ्गणे कुमारमृत्तिकया कृप्तालवाले निवेश्य निजया नवगीतकलया सद्यः प्रोल्लसत्पल्लवं तं निवेदयन् सनृपतीन् भट्टारकश्रीहेमचन्द्रसूरीन् परितोषयामास ।

इति अच्छइकारसोलाकप्रबन्धः ॥

अथ कदाचित्सर्वावसरे स्थितचौलुक्यचक्रवर्त्ती कौङ्कणदेशीयमल्लिकार्जुनाभिधानस्य राज्ञो मागधेन राजापितामह इति बिरुदमभिधीयमानमाकर्ण्य तदसहिष्णुतया सभां निभालयन्नृपचित्तविदा मन्त्रिणाऽम्बडेन योजितकरसंपुटं दर्शयता चमत्कृतः, सभाविसर्जनानन्तरमञ्जलिबन्धस्य कारणं पृच्छन्नेवमूचे। यदस्यां सभायां स कोपि सुभटो विद्यते यं प्रस्थाप्य मिथ्याभिमानिनं चतुरङ्गनृपवन्नृपाभासं मल्लिकार्जुनं विनाशयाम इत्याशयविदा मया त्वदादेशक्षमेण चाञ्जलिबन्धश्चक्रे इति विज्ञप्तिसमनन्तरमेव तं नृपं प्रति प्रयाणाय दलमेकीकृत्य पश्चाङ्गप्रसादं दत्त्वा समस्तसामन्तैः समं विससर्ज । स चानवच्छिन्नैः प्रयाणैः कुङ्कुणदेशमधिगम्य

---

१ D C शाखाखण्डं २ C छइ [आश्चर्यकारक]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुर्वारवारिपूरां कलविणिनार्न्नीं सरितमुत्तरन् परस्मिन्कूले आवासेषु दीयमानेषु तं संग्रामसज्जं विमृदय स मल्लिकार्जुननृपतिः प्रहरंस्तत्सैन्यं त्रासयामास । अथ तेन पराजितः स सेनापतिः कृष्णवदनः कृष्णवसनः कृष्णच्छत्रालंकृतमौलिः कृष्णगुरूदरे निवसन्, चौलुक्यभूभुजा विलोक्य कस्यासौ सेनानिवेश इत्यादिष्टे कुङ्कुणात्प्रत्यावृत्तस्य पराजिताम्बडसेनापतेः सेनानिवेशोयामिति विज्ञप्ते तस्य त्रपया चमत्कृतचित्तः प्रसन्नया दृशा संभावयंस्तदपरैर्बलवद्भिः सामन्तैः समं मल्लिकार्जुनं जेतुं पुनः प्रहितः । स तु कौङ्कुणदेशं प्राप्य तां नदीमासाद्य पद्यावन्धे विरचिते तेनैव पथा सैन्यमुत्तार्य सावधानवृत्त्याऽसमसमरारम्भे हस्तिस्कन्धाधिरूढं वीरवृत्त्या मल्लिकार्जुनमेव निश्चलीकुर्वन् स आम्बडः सुभटो दन्तमुशलसोपानेन कुम्भिकुम्भस्थलमधिरूह्य माद्यदुद्दामरणरसः प्रथमं प्रहर , इष्टदैवतं स्मरेत्युच्चरन् धारालकरालकरवालप्रहारान्मल्लिकार्जुनं पृथ्वीतले पातयन् सामन्तेषु तन्नगरलुण्टनव्याप्तेषु केसरिकिशोरः करिणामिव लीलयैव जघान ।

---

१ C प्रसादललितया २ A पद्यानुक्रमे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्मस्तकं स्वर्णेन वेष्टयित्वा तस्मिन्देशे चौलुक्यचक्रवर्त्तिन आज्ञा दापयन् श्रीमदऽणहिल्लपुरं प्राप्य सभानिषण्णेषु द्वासप्ततिसामन्तेषु स्वामिनः श्रीकुमारपालनृपतेश्चरणौ कौङ्कणदेशीयनृपमल्लिकार्जुनशिरसा समं ववन्दे।

शृङ्गारकोडीसाडी[1] १ माणिकउ पछेडउ २ पापखउ हारु ३ संयोगसिद्धिसिप्रा ४ तथा हेमकुम्भा ३२ स्तथा मौक्तिकानां सेडउ ६ चतुर्दन्तहस्ति १ पात्राणि १२० कोडी[2] सार्द्ध १४ द्रव्यस्य दण्डः

श्रीआम्बडेनैतैर्वस्तुभिः सह तच्छिरःकमलेन पुपूजे राजा। तदवदातप्रीतेन राज्ञा श्रीमुखेन श्रीमदाम्बडाभिधानमहामण्डलेश्वरस्य राजपितामह इति बिरुदं ददे ॥ इति आम्बडप्रबन्धः ॥ (ख०)

अथ कदाचिदणहिल्लपुरे श्रीहेमचन्द्रसूरयो दत्तव्रतायाः[3] पाहिणिनाम्न्याः स्वमातुः परलोकावसरे कोटिनमस्कारपुण्ये दत्ते व्यापत्तेरनु तत्संस्कारमहोत्सवे क्रियमाणे त्रिपुरुषधर्मस्थानसंनिधौ तत्तपस्विभिः सहजमात्सर्याद्विमानभङ्गापमाने सूत्रिते तदुत्तरक्रियां निर्माय तेनैव मन्युना मालवक-

१ A तडा C मुडा २ C D कोटि. ३ C मेताया:

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संस्थितस्य कुमारपालनृपतेः स्कन्धावारमलंचक्रुः ।
*आपण पइ प्रभु होइअं[1] कइ प्रभु कीजइं हाथि।
कज्ज करिवा[2] माणुसह बीजउ मागु न आत्थिं[3] ॥१

इति वचनं तथ्यं[4] विभृशतः श्रीमदुदयनमन्त्रिणा नृपतेर्निवेदितागमनाः कृतज्ञमौलिमणितया परोपरोधात्सौधमानीताः । तद्राज्यप्राप्तिनिमित्तज्ञानं स्मारयन्नृपः भवद्भिः सदैव देवतार्चनावसरेऽभ्युपेतव्यमित्युपरोधयन्,

भुञ्जीमहि वयं[5] भैक्ष्यं जीर्णं वासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ १
इति सूरिभिरभिहिते नृपः ।
एकं मित्रं भूपतिर्वा यतिर्वा
एका भार्या सुन्दरी वा दरी वा ।
एकं शास्त्रं वेदमध्यात्मकं वा
एको देवः केशवो वा जिनो वा ॥१

इति महाकविप्रणीतत्र्यक्षरश्लोकसमारचनाय भ-

---

* स्वयं प्रभुः समर्थो भवेत् यदि कमपि प्रभुं क्रियते हस्ते मनुष्याणां कार्यं कर्तुमन्यो मार्गो नास्तीति हेमचन्द्रवाक्यम्

१ C D पइहोइय २ C काजकरे वा मणुसह ३ A मागत आथि. ४ C वचस्तत्त्वं ५ A वरं[६ B C D अन्यानि त्रिचरणानि नान्यत्र]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाद्भिः सह मैत्र्यमभिलषामीति व्याहरन्, अथाप्रतिषिद्धमनुमतमिति तस्य महर्षेः परीक्षितचित्तवृत्तिः श्रीमुखेन स नृपः स्खलनाकारिणां वेलिणां सर्वसमयकं ददौ। अथ तत्र गतायाते संजायमाने सूरेर्गुणग्रामस्तवं कुर्वत्युर्वीपतौ पुरोधा विराधादामेगः प्राह।

विश्वामित्रपराशरप्रभृतयो येऽन्येम्बुपत्राशिन—
स्तेपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः।
आहारं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवा—
स्तेषामिन्द्रियनिग्रहः कथमहो दम्भः समालोक्यताम् ॥ १ ॥

इति तद्वचनानन्तरं हेमचन्द्रः।

सिंहो बली द्विरदशूकरमांसभोजी
संवत्सरेण रतमेति किलैकवेलम्।
पारापतः खरशिलाकणभोजनोऽपि
कामी भवत्यनुदिनं वद कोऽत्र हेतुः ॥ १

तन्मुखमुद्राकारिणि प्रत्युत्तरेऽभिहिते सति, नृपप्रत्यक्षं केनापि मत्सरिणैते सिताम्बराः सूर्यमपि न मन्यन्ते[1] इत्यभिहिते

---

१ C भजन्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधाम[1] धामधामार्कं वयमेव हृदि स्थितम् ॥
यस्यास्तव्यसने ज्ञाते[2] त्यजामो भोजनं यतः ॥ १ ॥

इति प्रामाण्यनैपुण्याद्वयमेव सूर्यभक्ताः नैते "तन्मुखबाधे [3]जाते" कदाचिद्देवतावसरक्षणे सौधमागते मोहान्धकाराधिक्कारचन्द्रे श्रीहेमचन्द्रे यशश्चन्द्रगणिना रजोहरणेनासनपदं प्रमार्ज्य काम्बले तत्र निहिते, अज्ञाततत्त्वतया किमेतदिति नृपेण पृष्टः प्राह । कदाचिदिह कोपि जन्तुर्भवति तदाबाधापरिहारायाऽसौ प्रयत्नो, यदा प्रत्यक्षतया जन्तुर्नैरीक्ष्यते तदैवेदं युज्यते नापरथा वृथाप्रयासहेतुत्वादिति युक्तियुक्तां नृपोक्तिमाकर्ण्य तैः सूरिभिरभिदधे । गजतुरगाद्या चमूः किं प्रतिनृपतिरिपावुपस्थिते क्रियते उत पूर्वमेव यथायं राजव्यवहारस्तथा धर्मव्यवहारोपीति तद्गुणरञ्जितहृदा पूर्वप्रतिपन्ने राज्ये दीयमाने सर्वशास्त्रविरोधहेतुत्वात् । यदाह ॥

राजप्रतिग्रहदग्धानां ब्राह्मणानां युधिष्ठिर ।
दग्धानामिव बीजानां पुनर्जन्म न विद्यते ॥ १
इदं पुराणोक्तं । तथाच जैनागमः ॥

---

१ A C आधाम २ प्राप्ते ३ तत्त्वत इति तन्मुखबन्धे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सन्ति ही गिहिमत्ते य[1] रायपिण्डे किमिच्छए ।

इति तत्संबोधाच्चमत्कृतचित्तः श्रीपत्तनं प्राप । भूपोऽन्यदा मुनिं पप्रच्छ कयापि युक्त्याऽस्माकमपि यशःप्रसरः कल्पान्तस्थायी भवतीति तदीयां गिरं श्रुत्वा विक्रमार्क इव विश्वस्पानृण्यकरणात्, यद्वा सोमेश्वरस्य काष्ठमयं प्रासादं वारिधिशीकरनिकरैरासन्नाम्मैःशीर्णप्रायं युगान्तस्थायिकीर्त्तये समुद्धरेति चन्द्रातपनिभया श्रीहेमचन्द्रगिरोल्लसन्मुदम्मोधिर्नृपस्तमेव महर्षिं पितरं गुरुं दैवतं मन्यमानो विजानाति । निरन्तरं द्विजाननिन्दंस्ततः प्रासादोद्धाराय तदैव दैवज्ञनिवेदितसुलग्नस्तत्र पञ्चकुलं प्रस्थाप्य प्रासादप्रारम्भमचीकरत् । अन्यदा श्रीहेमचन्द्रस्य लोकोत्तरैर्गुणैः परिहृतदृढयो नृपो मन्त्रिश्रीउदयनमिति पप्रच्छ। एतादृशं पुरुषरत्नं समस्तवंशावतंसं देशे च समस्तगुणाकरे नगरे च कस्मिन्समुत्पन्नमिति नृपादेशादनु स मन्त्री जन्मप्रभृति तच्चरित्रं पवित्रमित्थमाह । अर्ह्वाष्टमनामनि देशे धुन्धुक्कनगरे श्रीमन्मोढवंशे चाचिगनामा व्यवहारी

* शक्ते हि गृहिमात्रे राजपिण्डं किमर्थमिच्छति मुनिरिति

१ A B सन्निगिहिमित्तेय २ C अन्त

सतीजनमताल्लिका जिनशासनदेवीव तत्सधर्मचारिणी शरीरिणीव श्रीः पाहिणीनाम्नी चामुण्डागोनशयोरा[1]द्याक्षरेणाङ्कितनामा तयोः पुत्रश्चाङ्गदेवोभूत् । स चाष्टवर्षदेश्यः श्रीदेवचन्द्राचार्येषु श्रीपत्तनात्तीर्थयात्राप्रस्थितेषु धुन्धुक्के श्रीमोढवसाहिकायां देवनमस्करणाय प्राप्तेषु सिंहासनस्थिततदीयनिषद्याया उपरि सवयोभिः समं रममाणः शिशुभिः सहसा निषतन् तदङ्गप्रत्यङ्गानां जगद्विलक्षणानि लक्षणानि प्रेक्ष्य । अयं यदि क्षत्रियकुले जातस्तदा सार्वभौमचक्रवर्ती यदि वणिक्विप्रकुले जातस्तदा महामात्यश्चेद्दर्शनं प्रतिपद्यते तदा युगप्रधान इव कलिकालेपि कृतयुगमवतारयति स आचार्य इति विचार्य तन्नगरव्यवहारिभिः समं तल्लिप्सया चाविगौकः प्राप्य तस्मिंश्चाविगे ग्रामान्तरभाजि तत्पत्न्या विवेकिन्या स्वागतादिभिः परितोषिताः श्रीमन्तस्त्वत्पुत्रं याचितुमिहागता इति व्याहरन्तोऽ[2]थ सा हर्षाश्रूणि मुञ्चती स्वं रत्नगर्भं मन्यमाना श्रीसंघस्तर्थिकृतां मान्यः स मत्सूनुं याचते इति हर्षास्पदेऽपि विषादः, एतस्य पिता नितान्तामिथ्यादृष्टिः ।

१ (गोत्रजायक्षयोः) २ C D श्रीसंघः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तादृशोपि सम्प्रति ग्रामे नास्ति। अथ तैर्व्यवहारिभिस्त्वया दीयतामित्युक्ते स्वदोषोत्तारणाय मात्रा दाक्षिण्यादमात्रगुणपात्रं पुत्रस्तेभ्यो गुरुभ्यो ददे। तदनन्तरं तया श्रीदेवचन्द्रसूरिरिति तदीयमभिधानमबोधि। तैर्गुरुभिः स शिशुः शिष्यो भविष्यसीति पृष्टः, ॐमित्युच्चरन् प्रतिनिवृत्तैस्तैः समं कर्णावत्यामाजगाम। उदयनमन्त्रिगृहे तत्सुतैः समं बालधारकैः पाल्यमानो यावदास्ते तावता ग्रामान्तरादागतश्चाविगस्तं वृत्तान्तं परिज्ञाय पुत्रदर्शनावधिसंन्यस्तसमस्ताहारस्तेषां गुरूणां नाम मत्वा कर्णावतीं प्राप। तद्वसतौ समागत्य कुपितः पितेषत्तान्प्रणनाम। गुरुभिः सुतानुसारेणोपलक्ष्य विचक्षणतया विविधाभिरावर्जनाभिरावार्जितः, तत्रानीतेनोदयनमन्त्रिणा धर्मबन्धुबुद्ध्या निजमन्दिरे नीत्वा ज्यायःसहोदरभक्त्या भोजयांचक्रे। तदनु चाङ्गदेवसुतं तदुत्सङ्गे निवेश्य पश्चागप्रसादसहितं दुकूलत्रयं प्रत्यक्षं लक्षत्रयं चोपनीय सभक्तिकमावर्जितः। तं प्रति चाविगः प्राह। क्षत्रियस्य मूल्ये अशीत्यधिकसहस्रं तुरगस्य मूल्ये पञ्चाशदधिकानि सप्तदशशतानि अकिंचित्करस्यापि वणिजो मूल्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवनवतिकलभाः एतावता नवनवतिलक्षाः । त्वं तु लक्षत्रयं समर्पयन्नौदार्यछद्मना कार्पण्यं प्रादुःकुरुषे।मत्सुतस्तावदनर्घ्यो भवदीया च भक्तिरनर्घ्यतमा तस्य मूल्ये सा भक्तिरस्तु शिवनिर्माल्यमिवास्पृश्यो मे द्रव्यसंचयः । इत्थं चाविगे सुतस्य स्वरूपमभिदधाने प्रमोदपूरितचित्तः स मन्त्री अकुण्ठोत्कण्ठतया तं परिरभ्य साधु साध्विति वदन् श्रीमानुदयनः प्राह । मम पुत्रतया समर्पितो योगिमर्कट इव सर्वेषां जनानां नमस्कारं कुर्वन् केवलमपमानपात्रं भविता, गुरूणां दत्तस्तु गुरुपदं प्राप्य बालेन्दुरिव त्रिभुवननमस्करणीयो जायतेऽतो यथोचितं विचार्य व्याहरेत्यादिष्टः । स भवद्विचार एव प्रमाणमिति वदन् गुरुपार्श्वे नीतः सुतं गुरुभ्योऽदीदपत् । तदनु सुतस्य प्रव्रज्याकरणोत्सवश्चाविगेन चक्रे । अथ कुम्भयोनिरिवा प्रतिमप्रतिभाभिरामतया समस्तवाङ्मयाम्भोधिमुष्टिंधयोऽभ्यस्तसमस्तविद्यास्थानो हेमचन्द्र इति गुरुदत्तनाम्ना प्रतीतः। सकलसिद्धान्तोपनिषन्निषण्णधीः षट्त्रिंशता सूरिगुणैरलंकृततनुर्गुरुभिः सूरिपदेऽभिषिक्तः ॥ इति मन्त्रिणोदयनेनोदितां हेमाचार्यजन्मप्रवृत्तिमाकर्ण्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नृपो मुमुदेतरां। अथ श्रीसोमनाथदेवस्य प्रासादारम्भे शिखरशिलानिवेशे संजाते सति पञ्चकुलप्रहितवर्द्धापनिकाविज्ञप्तिकां नृपः श्रीहेमचन्द्रस्य गुरोर्दर्शयन्, अयं प्रासादप्रारम्भः कथं निष्प्रत्यूहं प्रमाणभूमिमधिरोढेति पृथ्वीपरिवृढेनानुयुक्तः श्रीमान्किंचिदुचितं विचिन्त्य गुरुरूचिवान्। यदस्य धर्मकार्यस्यान्तरायपरिहाराय ध्वजारोपं यावदजिह्मब्रह्मसेवा, अथवा मद्यमांसनियमो द्वयोरेकतरं किमप्यङ्गीकरोतु नृप इत्यभिहिते तद्वचनमाकर्ण्य मद्यमांसनियममभिलषन्, श्रीनीलकण्ठोपरि विमुच्योदकं तं चाभिग्रहं जग्राह। संवत्सरद्वयेन तस्मिन्प्रासादे कलशध्वजाधिरोपं यावन्निवृत्ते तं नियमं मुमुक्षुर्गुरूनऽनुज्ञापयंस्तैरूचे। यद्यनेन निजकीर्त्तनेन सार्द्धमर्द्धचन्द्रचूडं प्रेक्षितुमर्हसि, तद्यात्रापर्यन्ते नियममोचनावसर इत्यभिधायोत्थिते श्रीहेमचन्द्रमुनीन्द्रे षट्त्रिंशद्गुणैरुन्मीलन्नीलीरागरक्तहृदयस्तमेकमेव संसदि प्रशशंस सः। निर्निमित्तवैरिपरिजनस्तत्तेजःपुञ्जमसाहिष्णुः

उज्ज्वलगुणमभ्युदितं क्षुद्रो द्रष्टुं न कथमपि क्षमते।
दग्ध्वा तनुमपि शलभो दीप्रं दीपार्चिषं हरति ॥१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति न्यायात्पृष्टिमांसादनदोषमप्यङ्गीकृत्य तदपवादानवादीत् । यदयममन्दछन्दानुवृत्तिपरः सेवाधर्मकुशलः केवलं प्रभोरभिमतमेव भाषते यद्येवं तदा प्रातरूपेतः श्रीसोमेश्वरयात्रार्थमत्यर्थमभ्यर्थ्यत ।राज्ञा तथाकृते सूरयः प्रोचुः । यद्बुभुक्षितस्य किं निमन्त्रणाग्रह उत्कण्ठितस्य किं केकारवश्रावणमिति लोकरूढेस्तपस्विनामधिकृततीर्थाधिकाराणां को नाम नृपतेरत्र निर्बन्धः । इत्थं गुरोरङ्गीकारे किं भवद्योग्यं सुखासनप्रभृति वाहनादि च लभ्यतामितीरिते वयं चरणचारेणैव संचरन्तः पुण्यमुपालमामहे परं वयमिदानीमाप्टच्छ्य मितैर्मितैः प्रयाणकैः श्रीशत्रुंजयोज्जयन्तादिमहातीर्थानि नमस्कृत्य भवतां श्रीपत्तनप्रवेशे मिलिष्याम इत्युदीर्य तत्तथैव कृतवन्तः । नृपतेः समग्रसामग्र्या कतिपयैः प्रयाणकैः श्रीपत्तनं प्राप्तस्य श्रीहेमचन्द्रमुनीन्द्रमिलनादतिप्रमुदितस्य सन्मुखागतेन गण्ड० श्रीबृहस्पतिनानुगम्यमानस्य महोत्सवेन पुरं प्रविश्य श्रीसोमेश्वरप्रासादसोपानेष्वाक्रान्तेषु भूपीठलुण्ठनादरादनन्तरं चिरतरातुल्यायल्लकानुमा-

[१ परोक्षनिन्दाकारी २ गण्डस्तु भाषायां भईडो तपोधनः]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेन गाढमुपगूढसोमेश्वरालिङ्गस्य, एते जिनादपरं न नमस्कुर्वन्तीति मिथ्यादृग्वचसा भ्रान्तचित्तस्य श्री-हेमचन्द्रं प्रति एवंविधा गीराविरासीत् । यदि युज्यते तवैतैरुपहारैर्मनोहारिभिः श्रीसोमेश्वरमर्च-यन्तु भवन्तः। तत्तथेति प्रतिपद्य क्षितिपकोशादा-गतेन कमनीयेनोद्गमनीयेनालंकृततनुर्नृपतिनि-र्देशाच्छ्रीबृहस्पतिना दत्तहस्तावलम्बः प्रासाद-देहलीमधिरुह्य किंचिद्विचिन्त्य प्रकाशं । अस्मि-न्प्रासादे कैलासनिवासी महादेवः साक्षादस्तीति रोमाञ्चकञ्चुकितां तनुं बिभ्राणो द्विगुणीक्रियता-मुपहार इत्यादिश्य शिवपुराणोक्तदीक्षाविधिना-ऽऽहाननावगुण्ठनमुद्रामन्त्रन्यासविसर्जनोपचार।दि-भिः पञ्चोपचारविधिभिः शिवमभ्यर्च्य तदन्ते

यत्र तत्र समये यथा तथा
योसि सोस्यभिधया यया तया ।
वीतदोषकुलुषः स चेद्भवा—
नेक एव भगवन्नमोस्तु ते ॥ १ ॥
भवबीजाङ्कुरजनना रागाद्याः क्षयमुपागता यस्य ।
ब्रह्मा वा विष्णुर्वा महेश्वरो वा नमस्तस्मै ॥ २ ॥

इत्यादिस्तुतिभिः सकलराजलोकान्विते राज्ञि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सविस्मयमवलोकमाने दण्डप्रणामपूर्वं स्तुत्वा श्री-हेमाचार्य उपरते सति स नृपः श्रीबृहस्पतिना ज्ञापितपूजाविधिः समधिकवासनया शिवार्चानन्तरं धर्मशिलायां तुलापुरुषगजदानादीनि महादानानि दत्त्वा कर्पूरारात्रिकमुत्तार्य समग्रं राजवर्गमपसार्य तद्गर्भगृहान्तः प्राविश्य, न महादेवसमो देवः न मम तुल्यो नृपतिः न भवत्सदृक्षो महर्षिरिति भाग्यवैभववशादत्र सिद्धे त्रिकसंयोगे बहुदर्शन-प्रमाणप्रतिष्ठासंदिग्धे देवतत्त्वे मुक्तिपदं दैवतम-स्मिंस्तीर्थे तथ्यगिरा निवेदयेत्पाभिहितः श्रीहेमा-चार्यः किंचिद्धिया निध्याय नृपं प्राह । अलं पु-राणदर्शनोक्तिभिः श्रीसोमेश्वरमेव तव प्रत्यक्षी-करोमि, यथा तन्मुखेन मुक्तिमार्गमवैषीति त-द्वाक्यात्किमेतादिति जाघटीतीति विस्मयापन्न-मानसे नृपे निश्चितमत्र तिरोहितमस्त्येव दैवत-मावांगुरूक्तयुक्त्या निश्चलावाराधकौ तदित्थं द्वन्द्वसि-द्धौ सुकरं दैवतप्रादुःकरणं,मया प्रणिधानं क्रियतेभ-वता कृष्णागुरूत्क्षेपश्च कार्यस्तदा स परिहार्यो यं य-दा व्यक्षः प्रत्यक्षीभूय निषेधयति देवं। अथोभाभ्याम-पि तथा क्रियमाणे धूमधूम्यान्धकारिते गर्भगृहे नि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्णेषु नक्षत्रमालादीपकेषु आकस्मिके प्रकाशे द्वादशात्ममहसीव प्रसरति, नृपो नयने संभ्रमादुन्मृज्य यावदालोकते तावज्जलाधारोपरि जात्यजाम्बूनदद्युतिं चर्मचक्षुषां दुरालोकमप्रतिमरूपमसंभाव्यस्वरूपं तपस्विनमद्राक्षीत्। तं पदाङ्गुष्ठप्रभृति तज्जटावधि करतलेन संस्पृश्य निश्चितदेवतावतारः पञ्चाङ्गचुम्बितावनितलं प्रणिपत्य भक्त्या भूमानिति विज्ञपयामास। जगदीश भवद्दर्शनात्कृतार्थे दृशौ आदेशप्रसादात्कृतार्थय श्रवणयुगलमिति विज्ञप्य तूष्णीं स्थिते मोहनिशादिनमुखात्तन्मुखादिति दिव्या गिराविरासीत्। राजन्नयं महर्षिः सर्वदेवतावतारः। अजिह्मपरब्रह्मावलोककरतलकलितमुक्ताफलवत्कालत्रयविज्ञातस्वरूपः। एतदुपदिष्टएवासंदिग्धो मुक्तिमार्ग इत्यादिश्य तिरोभूते भूतपतावुन्मनीभावं भजति भूपतौ, रेचितप्राणायामपवनः श्लथीकृतासनबन्धः श्रीहेमचन्द्रो याजनामिति वाचमुवाच। तावदिष्टदैवतसंकेतात्यक्तराज्याभिमानो "जीवप आदावधार्यतामिति" व्याहृतिपरे गुरौ विनयनम्रमौलिर्यत्कृत्यमादिशेति व्याजहार। अथ

(१ शिरः करद्वयं जानुद्वयं चेति पञ्चाङ्गम्, २ राजा ३ राजानं)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रैव नृपतेर्यावज्जीवं पिशितप्रसन्ननिषेधं दत्त्वा ततः प्रत्यावृत्तौ गुरुक्षमापती श्रीमदणहिल्लपुरं प्रापतुः। श्रीजिनवदननिर्गमपावनीभिः शुद्धसिद्धान्तगीर्भिः प्रतिबुद्धो नृपः परमार्हतबिरुदं भेजे। तदभ्यर्थितः प्रभुः त्रिषष्टिशलाकापुरुषचरितं विंशतिवीतरागस्तुतिभिरुपेतं पवित्रं योगशास्त्रं रचयांचकार। प्रभोरादेशाच्चाज्ञाकारिष्वष्टादशदेशेषु चतुर्दशवत्सरप्रमितां सर्वभूतेषु मारिं निवारितवान्। तेषु तेषु च देशेषु चत्वारिंशदधिकानि चतुर्दशशतानि विहाराणां कारयामास। सम्यक्त्वमूलानि द्वादशव्रतान्यङ्गीकुर्वन्नऽदत्तादानपरिहाररूपे तृतीयव्रते व्याख्यायमाने रुदतीवित्तदोषान् पापैकनिबन्धनान् ज्ञापितो नृपस्तदधिकृतं पञ्चकुलमाकार्य द्वासप्ततिलक्षप्रमाणं तदीयपट्टकं विपाट्य मुमोच। तस्मिन्मुक्ते ॥

न यन्मुक्तं पूर्वैं रघुनहुषनाभागभरत—
प्रभृत्युर्वीनाथैः कृतयुगकृतोत्पत्तिभिरपि।
विमुञ्चन्कारुण्यात्तदपि रुदतीवित्तमधुना
कुमारक्ष्मापाल त्वमसि महतां मस्तमकमणिः ॥१

(१मांसमदिरयोर्निषेधं २ एकः क्षमायाः पृथिव्या अन्यः क्षान्तेः पतिः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति विद्वद्भिः स्तूयमाने
अपुत्राणां धनं गृह्णन्पुत्रो भवति पार्थिवः ।
त्वं तु संतोषतो मुञ्चन्सत्यं राजपितामहः ॥ १ ॥

इति प्रभुरपि नृपतिमनुमोदयांचक्रे ॥ अथ सुराष्ट्रदेशीयं सुंवरनामानं[1] विग्रहीतुं श्रीमदुदयनमन्त्रिणं दलनायकीकृत्य[2] समस्तकटकबन्धेन समं । प्रस्थापयामास सोपि श्रीवर्द्धमानपुरं प्राप्य श्रीयुगादिदेवपादान्निनंसुः पुरः प्रयाणकाय समस्तमण्डलेश्वरान्नभ्यर्च्य स्वयं विमलगिरिमागतः विशुद्धश्रद्धया श्रीदेवपादानां पूजादि विधाय यावत्पुरतो विधिवच्चैत्यवन्दनां विधत्ते तावन्नक्षत्रमालाया दीपवर्तिं देदीप्यमानामादाय मूषकः काष्टमयप्रासादबिले प्राविशत् । देवाङ्गरक्षैस्त्याजितस्तदनु स मन्त्री समाधिभङ्गात्काष्ठमयदेवप्रासादविध्वंसभयाज्जीर्णोद्धारं चिकीर्षुः श्रीदेवपादानां पुरत एकभक्तादीनभिग्रहान्जग्राह । तदनु कृतप्रयाणः स्कन्धवारमुपेत्य तेन प्रत्यर्थिना समं समरे जायमाने परैः पराजिते नृपबले श्रीमदुदयनः समुत्तस्थौ । तदा तत्प्रहारजर्जरितदेह आवासं नीते

१ A C D संउसर २ सेनापतिं कृत्वा ३ शत्रुंजयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सकरुणं क्रन्दन् स्वजनैस्तत्कारणं पृष्टः सन्निहिते मृत्यौ श्रीशत्रुंजयशकुनिकाविहारयोर्जीर्णोद्धारवाञ्छया देवऋणं पृष्टिलग्नं मन्त्री प्राह। अथ तैर्भवन्नन्दनौ वाग्भटाम्रभटनामानौ गृहीताभिग्रहौ तीर्थद्वयमुद्धरिष्यत इत्यर्थे वयं प्रतिभुवः इति सदङ्गीकारात्पुलकिताङ्गः धन्यंमन्यः अन्त्याराधनकृते स मन्त्री कमपि चारित्रिणमन्वेषयामास। तस्मिन्ननुपलभ्यमाने कमपि वण्ठं तद्वेषमानीय निवेदिते मन्त्री तदङ्घ्री ललाटे परिस्पृशन् तत्समक्षं दशाधारा-धनां विधाय श्रीमानुदयनः परलोकं प्राप। वण्ठस्तु चन्दनतरोरिव तद्वासनापरिमलेन क्षुद्रद्रुमवद्वासितो ऽनशनप्रतिपत्तिपूर्वकं रैवतके जीवितान्तं चकार। अथाणहिल्लपुरं प्राप्तैस्तैः स्वजनैस्तं वृत्तान्तं ज्ञापितौ वाग्भटाम्रभटौ तानेवाभिग्रहान्गृहीत्वा जीर्णोद्धारमारभाते। वर्षद्वयेन श्रीशत्रुंजये प्रासादे निष्पन्ने उपेत्यागतमानुषेण वर्द्धापनिकायां वाच्यमानायां पुनरागतेन द्वितीयपुरुषेण प्रासादः स्फुटित इत्यूचे। ततस्तत्रपुप्रायां गिरं निशम्य श्रीकुमारपालभूपालमापृच्छ्य महं० कपर्दिने[1] श्रीकरणमुद्रां

१ C कपार्दिने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियोज्य तुरंगमाणां चतुर्भिः सहस्रैः सह श्रीशत्रुंजयोपत्यकां प्राप्य स्वनाम्ना वाग्भटपुरनगरं निवेशयामास। सभ्रमप्रासादे पवनः प्रविष्टो न निर्यातीति स्फुटनहेतुं शिल्पिभिर्निर्णीयोक्तं भ्रमहीने च प्रासादे निरन्वयतां[2] विमृश्याऽन्वयाभावे धर्मसंतानमेवास्तु[3] पूर्वोद्धारकारिणां श्रीभरतादीनां पङ्क्तौ नामास्तु, इति तेन मन्त्रिणा दीर्घदर्शिन्या बुद्ध्या विभाव्य भ्रमभित्त्योरन्तरालं शिलाभिर्निचितं विधाय वर्षत्रयेण निष्पन्नप्रासादे कलशदण्डप्रतिष्ठायां श्रीपत्तनसंघं निमन्त्रणापूर्वमिहानीय महता महेन सं० १२११[4] वर्षे ध्वजारोपं मन्त्री कारयामास। स शैलमयबिम्बस्य मम्माणीयखनीसक्तपरिकरमानीय निवेशितवान्। श्रीवाग्भटपुरे नृपतिर्पितुर्नाम्ना त्रिभुवनपालविहारे श्रीपार्श्वनाथं स्थापितवान्। तीर्थपूजाकृते च चतुर्विंशत्याशामान्नगरे परितो वप्रं देवलोकस्य ग्रासवासादि[5] दत्त्वा चैतत्सर्वं कारयामास। अस्य तीर्थोद्धारस्य व्वये

---

१ A बाहड. २ C निरन्वयतां च (३ भ्रमहीनं विहारं कारयितुः संज्ञानाभाव इति शिल्पशास्त्रोक्तत्वात्) ४ AB सं० ११६१ ॥ ५ B C श्रीवासादि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्टिर्लक्षयुता ६० कोटी व्ययिता यत्र मन्दिरे ।
स श्रीवाग्भटदेवोत्र वर्ण्यते विबुधैः कथम् ॥
इति श्रीशत्रुंजयोद्धारप्रबन्धः

॥ अथ विश्वैकसुभटेन श्रीआम्रकभटेन पितुः श्रेयसे भृगुपुरे श्रीशकुनिकविहारप्रासादप्रारम्भे खन्यमाने गर्त्तापूरे नर्मदासान्निध्यादकस्मान्निर्मलितायां भूमौ बाधितेषु कर्मकरेषु कृपापरवशतयात्मानमेवामन्दं निन्दन्सकलत्रपुत्रस्तत्र झम्पामदात्। तत्साह-

---

१ A सप्तषष्टि.

[२ वर्षैरुद्रार्कसंख्यैः स्वजनकवचसा विक्रमार्कात्प्रयातैर्यातैनाः सिद्धशैले जिनपतिभुवनं वाग्भटः प्रोद्दधार ॥
इति चा. कु. च. स. ७)

३ C छादित.

* तत्संबन्धश्लोकायम् ॥
तस्मिन् कृते काचिददृश्यरूपा
देवी जगादामृदुनादमेवम् ।
नारीनृरूपं मिथुनं यदीह
निहंसि तत्कार्यमिदं भवेत्ते ॥ ८
निपीय तां वाचमवाच्यरूपां
दध्यौ हृदीदं सचिवाधिराजः ।
मिथ्यादृशो देवजनंगमान्
धिगीदृशान् दुष्टजनान् सुरान् हा ॥ ९
जुहोमि जीवान् जिनधर्मविज्ञो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सातिशयात्तस्मिन्प्रत्यूहे निराकृते । शिलान्यासपूर्वं

ऽमीषां वचोभिः किमु निर्दयानाम् ।
विमानिताश्चैत्यममी विधातुं
दास्यन्ति मह्यामिह नो हि मह्यम् ॥ १०
हत्वात्मानं तादिह निखिलान्निर्जरांस्तोषयित्वा
कार्यं सिद्धं द्रुततरमिदं प्रापयाम्येष धर्म्यम् ।
नूनं प्राणाममनमनसोऽमी गमिष्यन्ति काला—
त्तस्मादेभिः स्थिरमतिचलैः पुण्यमत्रार्जयामि ॥ ११
गर्त्ते तस्मिन् यममुखसमे सानुकम्यः स झम्पां
निःकम्यान्तः सरभसमदाद्भार्यया सार्द्धमुच्चैः ।
हाहाकारं स्वरतरगिरा चक्रिरे तत्र लोकाः
प्रान्तं प्राप्ते सति नरवरे को न दुःखी भवेद्धा ॥ १२
समुद्यते साधु परार्थमेक—
मित्रे गते तत्र तदास्तदेशम् ।
सद्यक्रमाक्रन्दपरं रुरोद
तमोविलिप्तेव बभूव पृथ्वी ॥ १३
अथान्तरिक्षान्तरिता तमाह
सा व्यन्तरी सत्वगुणेन तुष्टा ।
वरं वृणु प्राणवधेऽवधेहि
मा साहसं विस्मयकारि विश्वे ॥१४
भवत्परीक्षार्थमकारि सर्व—
मेतन्मया मायितयात्र कर्म ।
त्वमेव देवासुरमानवानां
सत्वेन मन्ये विसनोषि चित्रम् ॥ १५
एवं वदन्ती च मुदं ददाना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समस्तप्रासादे निष्पन्ने कलशदण्डप्रतिष्ठावसरे नगरसंघान्निमन्त्रणपूर्वं तत्रानीय यथोचितमशनवस्त्राभरणादिसन्मानैः सन्मान्य सामन्तेषु यथागतं प्रहितेषु, आसन्ने लग्ने संजायमाने भट्टारकश्रीहेमचन्द्रसूरिपुरस्सरं सनृपतिं श्रीमदणहिल्लपुरसंघं तत्रानीयातुच्छवात्सल्यादिभिर्भूषणादिदानैः संतर्प्य ध्वजाधिरोपाय संचरन्नऽर्थिभिः स्वयं स्वं मन्दिरं मुषितं कारयित्वा श्रीसुव्रतप्रासादे ध्वजं महाध्वजोपेतमध्यारोप्य हर्षोत्कर्षात्तत्रानालस्यं लास्यं विधाय तदन्ते भूपतिनाऽभ्यर्थित आरात्रिकं गृह्णन् तुरङ्गं द्वारभट्टाय दत्त्वा राज्ञा स्वयं कृततिलकावसरे द्वासप्तत्या सामन्तैश्चामरपुष्पवर्षादिभिः कृतसाहाय्यस्तदाभ्यागताय बन्दिने कृतकङ्कणवितरणो बाहुभ्यां धृत्वा बलात्कारेण नृपेणावतार्यमाणारात्रिकमङ्गलप्रदीपः श्रीसुव्रतस्य च गुरोश्चरणौ प्रणम्य साधर्मिकवन्दनापूर्वं नृपतिं स स्वारात्रिकहेतुं

देवी तदा तं विदधेऽक्षताङ्गम् ।
स्यात्साहसं यस्य नरस्य शस्यं
तस्यात्र सेवां स्वयन्ति देवाः ॥ १६

इत्यादि चारित्रसुन्दरगणिकृतकुमारपालचरित्रसप्तमसर्गाद्बोध्यम् ॥

(१ मुष्टं २ गृह्णानः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पप्रच्छ । यथा द्यूतकारो द्यूतरसातिरेकाच्छिरःप्रभृतीन् पदार्थान् पणीकुरुते तथा भवानप्यतः परमर्थितस्त्यागरसातिरेकाच्छिरोपि तेभ्यो ददासीति नृपेणादिष्टे भवल्लोकोत्तरचरित्रेणापहृतहृदया विस्मृताजन्ममनुष्यस्तुतिनियमाः श्रीहैमाचार्याः ।

किं कृतेन न यत्र त्वं यत्र त्वं किमसौ कलिः ।
कलौ चेद्भवतो जन्म कलिरस्तु कृतेन किम् ॥ १ ॥

इत्थमाम्रभटमनुमोद्य गुरुक्षमापती यथागतं जग्मतुः ॥ अथ तत्रागतानां प्रभूणां श्रीमदाम्रभटस्याकस्मिकदेवीदोषात्पर्यन्तदशामागतस्याप्रच्छननिवृत्तिकायामुपागतायां सत्यां तत्कालमेव तस्य महात्मनः प्रासादशिखरे नृत्यतो मिथ्यादृशां देवीनां दोषः संजात इत्यवधार्य प्रदोषकाले यशश्चन्द्रतपोधनेन समं खेचरगत्योपलभ्य निमेषमात्रादलंकृतभृगुपुरपरिसरभुवः प्रभवः सैन्धवीमनुनेतुं कृतकायोत्सर्गास्तया जिव्हाकर्षणादवगणनास्पदं दीयमानौ उदूखलै शालितन्दुलान्प्रक्षिप्य यशश्चन्द्रगणिना प्रदीयमानेषु मुशलप्रहारेषु प्राक्प्रासादकम्पो द्वितीये

१ C अर्थिप्रत्यर्थितत्याग. २ B सूरेर्दरं विधातुं स्वां जिव्हां बहिरकरोत्. ३ C उलूखले

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रहारे देवीमूर्तिरेव स्वस्थानादुपेत्य वज्रपाणिप्रहारेभ्यो रक्ष रक्षेत्युच्चरन्ती प्रभोश्चरणयोर्निपपात। इत्थमनवद्यविद्याबलात्तन्मूलानां मिथ्यादृग्व्यन्तराणां[1] दोषं निगृह्य श्रीसुव्रतप्रासादमाजग्मुः।

संसारार्णवसेतवः शिवपथप्रस्थानदीपाङ्कुरा
विश्वालम्बनयष्टयः परमतव्यामोहकेतूद्गमाः।
किं वास्माकमनोमतङ्गजदृढालानैकलीलाजुष-
स्त्रायन्तां नखरश्मयश्चरणयोः श्रीसुव्रतस्वामिनः १

इति स्तुतिभिः श्रीमुनिसुव्रतमुपास्य श्रीमदाम्रभटमुल्लाघस्नानेनं[2] पटूकृत्य यथागतमागुः। श्रीमदुदयनचैत्ये शाकुनिकाविहारे घटीगृहे राज्ञः कौङ्कणनृपतेः कलशत्रयं स्थानत्रये न्यास्यत[3]॥

॥ इतिश्रीराजपितामहाम्रभटप्रबन्धः ॥

(१ रोगमुक्तस्नानेन) २ C उल्लाघ्य निरोगं कृत्वा ३ एवमार्हतशिरोमणेः प्रभोर्महिमा श्रीमद् ४ कलशत्रितयं ५ A एवं शाकुनिकाविहारोद्धारे कोटिद्वयं व्ययितम्

* (क)—सिरिपुन्ने नयरे चन्दगुत्तो राया तस्स चन्दलेहाभारिआ तीसे सत्तहुं पुत्ताणं उवरिं सुदंसणा नाम धूआ जाआ। सउणीभवे तुमं बाणेण पहया... गुरूणं वयणं सुच्चा... चेइयस्स उद्धारं कारेइ॥ सिरिसुव्वयसामिसिद्धिगणाणन्तरं इक्कारसोहिं लरकोहिं चुलसीइ सहस्सोहिं चउसयसत्तरोहिं वासाणं अइएहिं विक्कमाइच्चसंवच्छरो पयट्टो

॥ अथान्यस्मिन्नऽवसरे कुमारपालनामा नृपः पाण्डित्यलिप्सया कपर्दिमन्त्रिणोऽनुमतेन भोजनानन्तरं क्षणं केनापि विदुषा वाच्यमाने कामन्दकीयनीतिशास्त्रे ॥

जीवन्तसुव्वयसामिअदिक्खाए पुण एगारसलक्खेहिं अट्ठावीसूणपञ्चणवइसहस्सेहिं वासाणं विक्कमो भावी एसा सउलिआविहारस्स उप्पत्ती। लोइअतित्थाणि अणेगाणि भरुअत्थे वदन्ति। कमेण उदयपुत्तेण वाहडेण सित्तुज्जपासाय उद्धारकारिए। तदणुएण अम्बडेण पिउणो पुण्णत्थं सउलिआविहारस्स उद्धारो कारिउं। मिच्छदिट्ठी सिन्धवदेवीए अम्बडस्स पासायसिहरे नच्चन्तस्स उवस्सग्गो कउं सोउ निवारिउ विज्जाबलेण सिरिहेमचन्दसूरिहिं अस्सावबोहतित्थस्स एस कप्पो ॥ इत्यश्वावबोधकल्पे. मा. प. २७ [श्रीपुण्ये नगरे चन्द्रगुप्तो राजा तस्यचन्द्रलेखा भार्या तस्याः सप्तानां पुत्राणां उपरि सुदंसणा नाम सुता जाता। शकुनीभवे त्वं बाणेन निहता। नवकारप्रभावेण राजसुता जातेत्यादि गुरूणां वचनं श्रुत्वा। चैत्यस्योद्धारं करितं। तन्नाम्ना शकुनिकाविहारः ॥ श्रीसुव्रतस्वामिसिद्धिगमनानन्तरं एकादशलक्षैश्चतुरशीतिसहस्रैश्चतुःशतैः सप्तदशोत्तरैः वर्षाणां व्यतिक्रान्तैः विक्रमसंवत्सरः प्रवर्त्तितः। जीवतः सुव्रतस्वामिनो दिक्षाया आरभ्य एकादशलक्षैः अष्टाविंशत्यूनपञ्चनवतिसहस्रैः वर्षाणां विक्रमो, भावी एषा शकुनिकाविहारस्योत्पत्तिः। लौकिकतीर्थानि अनेकानि भृगुकच्छे वर्त्तन्ते ॥ क्रमेण उदयपुत्रेण वाग्भटेन शत्रुंजयपार्श्वनाथोद्धारः कारितः। मिथ्यादृष्टिसैन्यवीदेव्या आम्रभटस्य प्रासादशिखरे नृत्यतः उपसर्गः कृतः स निवारितः। विद्याबलेन श्रीहेमचन्द्रसूरिभिः। अश्वावबोधतीर्थस्यैषः कल्पः॥)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्जन्य इव भूतानामाधारः पृथिवीपतिः ।
विकलेपि हि पर्जन्ये जीव्यते न तु भूपतौ[1] ॥ १

वाक्यमिदमाकर्ण्य नृपतेर्मेघ ऊपम्या इति कुमारपालेनाभिहिते सर्वेष्वपि सामाजिकेषु न्युञ्छनानि कुर्वाणेषु तदा कपर्दिमन्त्रिणमवाङ्मुखं वीक्ष्य, एकान्ते नृपष्टष्ट एवमवादीत्। ऊपम्याशब्दे स्वामिना स्वयमुच्चरिते सर्वव्याकरणेष्वेतत्प्रयोगापेतेषु[2] छन्दोनुवर्त्तिभिर्न्युञ्छनानि क्रियमाणे मम द्वेधाऽवाङ्मुखत्वमुचितं। तथा वरमराजकं विश्वं न तु मूर्खो राजेति प्रतीपभूपालमण्डलेष्वपकीर्त्तिः प्रसरति। अतोऽस्मिन्नर्थे उपमेयं ऊपम्यं उपमेत्याद्याः शब्दाः शुद्धाः। तद्वचनानन्तरं राजा शब्दव्युत्पत्तिहेतवे कस्याप्युपाध्यायस्य समीपे मातृकापाठात्प्रभृति शास्त्राण्यारभ्यैकेन वर्षेण वृत्तिकाव्यत्रयमधीतं[3] विचारचतुर्मुखबिरुदमर्जितम् ॥

॥ इति विचारचतुर्मुखश्रीकुमारपालाध्ययनप्रबन्धः॥

कस्मिन्नप्यऽवसरे विश्वेश्वरनामा कविर्वाराणस्याः श्रीपत्तनमुपागतः[4] श्रीहेमसूरीणां संसदि प्राप्तः ।

(१ सर्ग १ श्लो. १३) २ CD अपप्रयोगे एतस्मिन् ३ C वृत्तिकाव्यानां. ४ कथमितिचेज्जिनमण्डनसूरिकृतकुमारपालचरित्रंद्रष्टव्यम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र कुमारपालनृपतौ विद्यमाने सः ।
पातु वो हेमगोपालः कम्बलं दण्डमुद्वहन् ।

इति भणित्वा विलम्बमानो नृपेण सक्रोधं निरैक्ष्यत ।

षट्दर्शनपशुग्रामं चारयन्जैनगोचरे ॥ १

इत्युत्तरार्द्धपरितोषितसमाजलोकः । श्रीरामचन्द्रादीनां समस्यां समर्पयामास ।

व्यापिद्धा[1] नयने मुखं च रुदती स्वे गर्हिते कन्यका
नैतस्याः प्रसृतिद्वयेन सरले शक्ये पिधातुं दृशौ ।
सर्वत्रापि च लक्ष्यते मुखशशिज्योत्स्नावितानैरिय-
मित्थं मध्यगता सखीभिरभितो दृग्मीलनाकेलिषु॥ १

व्यापिद्धा । इति श्रीकपर्दिना महामात्येन पूरितायां समस्यायां पश्चात्कविः पञ्चाशत्सहस्रमूल्यं निजं ग्रैवेयकं श्रीकपर्दिनः कण्ठे श्रीभारत्याः पदमित्युच्चरन्निवेशयामास। अथ तद्वैदग्ध्यचमत्कृतेन नृपतिना स्वसंनिधौ स्थाप्यमानः ।

कथाशेषः कर्णोऽजनि जनकृशा काशिनगरी
सहर्षं हेषन्ते हरिहारिति हम्मीरहरयः ।
सरस्वत्याश्लेषप्रवणलवणोदप्रणयिनि

---

१ C गोपुरे २ C D इदं चतुर्थं चरणं दृश्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभासस्य क्षेत्रे मम हृदयमुत्कण्टितमदः ॥ १

इत्युक्ताप्रच्छ्यमानो नृपसत्कृतः स यथास्थानमगात् । कदाचिदेव श्रीकुमारपालविहारे नृपाहूताः प्रभवः श्रीकपर्दिना दत्तहस्तावलम्बा यावत्सोपानमारोहन्ति तावन्नर्त्तक्याः कञ्चुके गुणमाकृष्यमाणं विलोक्य श्रीकपर्दी ।

*सोहग्गीउ सहिकञ्चुयउ जुत्त उत्ताणु करेइ ।

एवमुक्त्वा यावद्विलम्बते ।

*पुट्ठिहिं पच्छइ तरुणीयणु जसु गुणगहणु करेइ॥१

इति श्रीप्रभुपादैरुत्तरार्द्धमपूरि ॥ कदाचित्प्रस्तूपे श्रीकपर्दिमन्त्री प्रणामानन्तरं हस्ते किमेतदिति पृष्टः स प्राकृतभाषया हरड इति विज्ञपयामास । प्रभुभिरुक्तं किमद्यापि आहतप्रतिभतया, तद्वचनच्छलमाकलय्य कपर्दिनोक्त इदानीं न कुतोन्त्याप्याद्योभूत् । मात्राधिकश्च । हर्षाश्रुपरिपूर्णदृशः प्रभवः श्रीरामचन्द्रप्रभृतिपण्डितानां पुरस्तात्तच्चातुरीं प्रशशंसुः । तैरज्ञाततत्त्वैः किमिति पृष्टो हरड इति

---

* सौभाग्यतः सखिकञ्चुको युक्तोत्तानं करोति ।

* पृष्टैः पश्चात् (नितम्बैः) तरुणीजनो यस्मात् गुणग्रहणं (रज्जुग्रहणं) करोति ॥ १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दच्छलेन हकारो रडइ । किमद्यापीत्यभिहित-मात्रेण वचस्तत्त्वविदाऽनेनेदानीमुक्तं। यतः पुरा मातृकाशास्त्रे हकारः प्रान्ते पठ्यते अत एव ह रड-इ साम्प्रतं त्वऽस्मिन्नामनि प्रथमतया मात्राधिकश्च

॥ इति हरडइ प्रबन्धः ॥

॥ कदाचित् केनापि पण्डितेनोर्वशी-शब्दे शकारस्तालव्यो दन्त्यो वेतिपृष्टे याव-त्प्रभवः किंचित्समादिशन्ति तावत्, उरून् अश्नु-ते उर्वशीति पत्रकं लखित्वा श्रीकपर्दिना प्र-भोरुत्सङ्गे मुक्तं। तत्प्रामाण्यात्तालव्यशकारनिर्णय-स्तदग्रे प्रभुभिरभिहितः । इत्युर्वशीशब्दप्रबन्धः ॥ अथान्यदा सपादलक्षीयराजस्य कश्चित्सान्धिविग्रहि-कः श्रीकुमारपालनृपतेः सभायामुपेतो राज्ञा भव-त्स्वामिनः कुशलमिति पृष्टः। स मिथ्याभिमानी पण्डितमानी च विश्वं लातीति विश्वलस्तस्य च को विजयसन्देहः । राज्ञा प्रेरितेन श्रीमता कपर्दिना मन्त्रिणा । श्वलश्वल्ल आशुगतौ । इति धातोर्विरि-व श्वलति नश्यतीति विश्वलः । इत्येवं प्रधाने-न तन्नामदूषणं विज्ञप्त, इति स राजा विग्रहरा-

[1] A B उरूशेते

ज इतिनामं बभार । अपरस्मिन्वर्षे स एव प्रधानः पुरुषः श्रीकुमारपालनृपतेः पुरो विग्रहराजनाम विज्ञपयन् मन्त्रिणा श्रीकपर्दिना विग्रो विगतनासिक एवं हराजौ रुद्रनारायणौ कृतौ, इति व्याख्यातं। तदित्यवगम्य तदनन्तरं स नृपः कपर्दिना नामखण्डनभीरुः कविबान्धव इति नाम बभार ॥ अथान्यदा श्रीकुमारपालनृपपुरतः श्रीयोगशास्त्रव्याख्याने संजायमाने पञ्चदशकर्मादानेषु वाच्यमानेषु

दन्तकेशनखास्थित्वक्रोम्णां ग्रहणमाकरे ॥

इति प्रभुकृतमूलपाठे पं० उदयचन्द्रः[1] रोम्णां ग्रहणमिति भूयो भूयो वाचयन् प्रभुभिर्लिपिभेदं पृष्ठे स प्राणितूर्याङ्गानामिति व्याकरणसूत्रेण प्राण्यङ्गानां सिद्धमेकत्वमिति लक्षणविशेषं स विज्ञपयन् प्रभुभिः श्लाघितो राज्ञान्यैश्च ॥

इति पं० उदयचन्द्रप्रबन्धः ॥

अथ कदाचित्स राजर्षिर्घृतपूरभोजनं कुर्वन् किंचिद्विचिन्त्य कृतसर्वाहारपरिहार इति प्रभुं प्रपच्छ। यदस्माकं घृतपूराहारो युज्यते नवेति प्रभुभिरभिदधे।

१ A B विग्रहराजपण्डितमुखात्तन्नाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वणिग्ब्राह्मणयोर्युज्यते कृताभक्ष्यनियमस्य क्षत्रियस्य तु न तेन पिशिताहारस्यानुस्मरणं भवतीत्थमेवेति पृथ्वीपतिरभिधाय पूर्वभक्षितस्याभक्ष्यस्य प्रायश्चित्तं याचितवान्। द्वात्रिंशद्दशानसंख्ययां[1] द्वात्रिंशद्विहारान्कारयेति। राज्ञा तथाकृते, प्रभुदत्ते लग्ने वटपद्रकान्निजप्रासादे मूलनायकप्रतिष्ठां कारयितुं श्रीपत्तनमुपेयुषि कान्हनाम्नि व्यवहारिणि तन्नगरमुख्ये प्रासादे ताद्बिम्बं मुक्त्वा यावदुपहारान्गृहीत्वा स पुनरुपैति तावन्नृपतेरङ्गरक्षकैर्निरुद्धे द्वारि अन्तः प्रवेशमलभमानः कियति काले व्यतिक्रान्ते उत्थितैर्द्वारपालकैर्व्यतीते प्रतिष्ठाकाले[2] स तत्र प्रविश्य प्रभोः पादमूले लगित्वा सोपालम्भं रुरोद। प्रभुभिरन्यथा दुरपनेयं तस्य दुःखमिति विमृश्य रङ्गमण्डपाद्बहिर्भूत्वा नक्षत्रचारेण स्वं लग्नमुदितं व्योम्नि विलोक्य घटिकासंबन्धेन[3] नैमित्तिकेन यस्मिँल्लग्ने बिम्बानि प्रतिष्ठापितानि तेषां वर्षत्रयमायुः सम्प्रतितने लग्ने तु प्रतिष्ठितमिदं चिरायुरिति प्रभुभिरादिष्टं स तदैव प्रतिष्ठामकारयत्त-

१ A B अब्दान्तसंख्यया एकस्मिन्भिडबन्धे २ A प्रतिष्ठोत्सवे
३ D कूटघटिका.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्प्रभूक्तं तथैव जज्ञे ॥

इत्यभक्ष्याभक्षणप्रायश्चित्तप्रबन्धः ॥

मयापहृते धने पुरा कश्चिन्मूषको मृतस्तत्प्रायश्चित्ते राज्ञा याचिते तच्छ्रेयसे प्रभुभिस्तन्नामाङ्कितो विहारः कारितः । तथाच कयापि व्यवहारिवध्वाऽज्ञातज्ञातिनामग्रामसंबन्धया पथि दिनत्रयं बुभुक्षितो नृपतिः शालिकरम्बेन सुहितीकृतस्तत्कृतज्ञतया तत्पुण्याभिवृद्धये करम्बविहारं श्रीपत्तनेऽकारयत् ॥ तथा यूकाविहारश्चैवं । सपादलक्षदेशे कश्चिदविवेकी धनी केशसंमार्जनावसरे प्रियार्पितां यूकां करतले संगृह्य पीडाकारिणीं तां तर्जयंश्चिरेण मृदित्वा व्यापदयामास । संनिहितेनामारिकारिपञ्चकुलेन स श्रीमदणहिल्लपुरे समानीय नृपाय निवेदितः । तदनु प्रभूणामादेशात्तद्दण्डपदे तस्य सर्वस्वेन तत्रैव यूकाविहारः कारितः ॥

इति यूकाविहारप्रबन्धः ॥

अथ स्तम्भतीर्थे सामान्ये सालिगवसहिकाप्रासादे यत्र प्रभूणां दीक्षाक्षणो बभूव रत्नबिम्बालंकृतस्तत्र निरुपमो जीर्णोद्धारः कारितः ॥

इति प्रभदीक्षावसहिकाया उद्धारप्रबन्धः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ श्रीसोमेश्वरपत्तने कुमारविहारप्रासादे बृहस्पति-
नामा गण्डः कामप्यैरतिं[1] कुर्वाणः प्रभोरप्रसादाद्भ्र-
ष्टप्रतिष्ठः श्रीमदणहिल्लपुरं प्राप्य षोढावश्यके प्रौढिं
प्राप्य प्रभून् सिषेवे । कदाचिच्चातुर्मासिकपारणके
प्रभूणां पादयोर्द्वादशावर्त्तवन्दनादनु ।
चतुर्मासी यावत्तव[2] पदयुगं नाथ निकषा
कषायप्रध्वंसाद्विकृतिपरिहारव्रतामिदम् ।
इदानीमुद्भिद्यन्निजचरणनिर्लोठितकले[3]—
र्जलक्लिन्नैरन्नैर्मुनितिलक वृत्तिर्भवतु मे ॥ १
इति विज्ञपयंस्तत्कालागतेन राज्ञा प्रसन्नान्प्रभून्वि-
सृज्य स पुनरेव तत्पददानपात्रीकृतः ॥
इति बृहस्पतिगण्डस्य पुनः पददानप्रबन्धः ॥
अन्यदा सर्वावसरस्थितेन राज्ञालिङ्गनामा वृद्धः
प्रधानपुरुष इत्यपृच्छद्यत । यदहं श्रीसिद्धनृपते-
र्हीनः समानोऽधिको वा । तेन चाऽच्छलप्रार्थ-
नापूर्वं श्रीसिद्धनृपतेः षण्णवँतिर्गुणा द्वौ दोषौ ।
स्वामिनस्तु द्वौ गुणौ तत्संख्या एव दोषा इति

---

१ C कामपि रतिं २ मासीं यावत् A चातुर्मासीमासीत्-
३ C D कवे (उद्यन्निजचारित्रेण निर्नाशितः कलिर्येन सः)
४ अष्टनवति;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्वाक्यादनु दोषमये आत्मनि विरागं दधानो यावच्छुरिकां चक्षुषि क्षिपति तावदाशयविदा तेनेति व्यज्ञापि। श्रीसिद्धनृपतेः षण्णवतिगुणाः संग्रामाऽसुभटतास्त्रीलम्पटतादोषाभ्यां तिरोहिताः। कार्पण्यादयो भवद्दोषाः समरशूरतापरनारीसहोदरतागुणाभ्यामपन्हुता इति तद्वचसा स पृथ्वीनाथः स्वस्थावस्थस्तस्थौ॥

इत्यालिङ्गप्रबन्धः॥

अथ पुरा श्रीसिद्धराजराज्ये पाण्डित्ये स्पर्धमानो वामराशिनामा विप्रः प्रभूणां प्रतिष्ठानिष्ठामसहिष्णुः।

यूकालक्षशतावली[1]वलवलल्लोलोल्लसत्कम्बलो
दन्तानां मलमण्डलीपरिचयाद्दुर्गन्धरुद्धाननः।
नाशावंशविरोधनाद्विणिगिणत्[2]पादप्रतिष्ठास्थितिः
सोऽयं हेमडसेवडः पिलपिलत्खल्लिः समागच्छति।१

इति तदीयममन्दं निन्दास्पदं वचनमाकर्ण्यान्तर्भूतामर्षवत्तर्जनापरं वचः प्रभुभिरभिहितं पण्डित विशेषणं पूर्वमिति भवता किं नाधीतमतोऽतः परं सेवडहेमड इत्यभिधेयमिति, सेवकैः कुन्तपश्चाद्भागेना-

१ C लिक्षशत. (२ चलचलत्) ३ A गिणिगिणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हत्य मुक्तः।श्रीकुमारपालनृपते राज्येऽशास्त्रो वध इति तद्वृत्तिछेदः कारितः। स ततः परं कणभिक्षया प्राणाधारं कुर्वाणः प्रभूणां पौषधशालायाः पुरतः स्थितः। आनादिभूपतितपास्विभिरधीयमानयोगशास्त्रमाकर्ण्याऽशठतयेदमपाठीत्।

आतङ्ककारणमकारणदारुणानां
वक्त्रेषु[1] गालिगरलं निरगालि येषाम्।
तेषां जटाधरफटाधरमण्डलानां
श्रीयोगशास्त्रवचनामृतमुज्जिहीते ॥ १

इति तद्वचसाऽमृतधारासारेण निर्वाणपूर्वोपतापास्तस्मै द्विगुणां वृत्तिं प्रसादीकृतवन्तः ॥

इति वामराशिप्रबन्धः ॥

अथ कदाचिच्चारणौ द्वौ सुराष्ट्रमण्डलनिलयौ दूहाविद्यया स्पर्धमानौ श्रीहेमाचार्येण यो व्याख्यायते सोऽपरस्य हीनोपक्षयं ददातीति प्रतिज्ञाय श्रीमदणहिल्लपुरं प्रापतुः तदैकेन प्रभुसमागतेन।

*लच्छिवाणिमुहकाणि एयइं[2] भागी मुह भँरउं[3]।
हेमसूरिअच्छाणि[4] जे ईसरते ते पण्डिया ॥१

---

१ C वक्त्रेण २ पयइ ३ B मरउ ४ सूरिआ छाणि.

* लक्ष्मीवाणीप्रमुखाणि एतैः भाग्यैः मुखं भृतं सर्वाणि भाग्यानि हे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्ताभ्यर्णे स्थिते तस्मिन् श्रीकुमारपालविहारे आरात्रिकावसरानन्तरं प्रणामपरो नृपः प्रभुणा दत्तदृष्टिहस्तः क्षणं यावत्तिष्ठति। अत्रान्तरे प्रविश्य द्वितीयश्चारणः ॥

*हेम तुहाला कर भरउं जांह अच्चंपभूरिद्धि।
जेवं पह हिठा मुहा तांह ऊपहरी सिद्धि[2]॥ १

इत्यनुच्छिष्टेन तद्वचसान्तश्चमकृतो नृपतिरेतदेव भूयोभूयः पाठयामास। ततस्त्रिःकृत्वः पठिते[3] किं पठिते लक्षं दास्यसीति विज्ञप्तस्तस्मै त्रिलक्षं

मसूरेर्मुखे तिष्ठन्तीत्यर्थः यतः ये हेमसूरेरऽक्षिणी यत्र ईषद्वते ते पण्डिताः हेमसूरिनेत्रे रत्या यान् इषत् प्रेक्षेते ते पुरुषाः शीघ्रं पण्डिता भवन्तीत्यर्थः ॥!

यद्वा। पाठान्तरे लक्ष्मीश्चिन्तयति यतयो वाणिमुखकाः वाणीं मुखे धारयन्ति 'मुह मरउं' सपत्नीहेतोः मया मर्त्तव्यं एवं ज्ञात्वा हेमसूरेः प्रच्छन्नं भग्ना नष्टा अत एव ये ईश्वरास्ते पण्डिताः न तु पण्डिता लक्ष्मीवन्त इति ॥१ !

* हे हेमचन्द्र तव करः भृतः संगतः यत्र आश्चर्यभूतार्द्धिः युक्तं तत् एवं प्रभुपदाधोमुखाः। कुमारपालवत् प्रभुपदं अधोमुखेन वदन्ते इत्यर्थः तत्र सिद्धयः उपहियन्ते ॥२ ॥ !

१ C D जिह अच्चुपयरिद्धि। २ जे चंपहहिठा मुहा तीह उबहरी सिद्धी ३ त्रिःपठिते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दापयामास ।

इति सौराष्ट्रचारणयोः प्रबन्धः ॥

कदाचिच्छ्रीकुमारपालनृपतिः श्रीसंघाधिपतीभूय तीर्थयात्रां चिकीर्षुर्महता महेन श्रीदेवालयप्रस्थाने संजाते सति देशान्तरायातयुगलिकया त्वां प्रति डाहलदेशीयकर्णनृपतिरुपैतीति विज्ञप्तः स्वेदबिन्दुतिलकितललाटं दधानो मन्त्रिवाग्भटेन साकं साध्वसध्वस्तसंघाधिपत्यमनोरथः प्रभुपादान्ते स्वं निनिन्द । अथ तस्मिन्नृपतेः समुपस्थिते महाभये किंचिदवधार्य द्वादशे यामे भवतो निवृत्तिर्भविष्यतीत्यादिश्य विसृष्टो नृपः किंकर्त्तव्यतामूढो यावदास्ते तावन्निर्णीतवेलायां समागतयुगलिकया श्रीकर्णो दिवं गत इति विज्ञप्तो नृपेण ताम्बूलमुत्सृज्य कथमिति पृष्टौ तावूचतुः । कुम्भिकुम्भस्थः श्रीकर्णः प्रयाणं निशि कुर्वन्निद्रामुद्रितलोचनः कण्ठपीठप्रणयिना सुवर्णशृङ्खलेन प्रविष्टन्यग्रोधपादपेनोल्लम्बितः पञ्चतामञ्चितवान् । तस्य संस्कारानन्तरमावां प्रचलिताविति ताभ्यां विज्ञप्ते तत्कालं पौषधवेश्मनि समागतो नृपः प्रशंसापरः कथं कथमित्यपवार्य द्वासप्ततिमहासामन्तैः समं समस्तसंघेन च प्रभुणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विधोपदिश्यमानवर्त्मा धुन्धुक्कनगरे प्राप्तः प्रभूणां जन्मगृहभूमौ स्वयं कारितसप्तदशहस्तप्रमाणझोलिकाविहारे प्रभावानां विधित्सुर्जातिपिशुनानां द्विजातिनामुपसर्गमुदितं वीक्ष्य तान्विषयताडितान्कुर्वन् श्रीशत्रुंजयतीर्थमाराधयन् । दुक्खक्खउं कम्मक्खउं इति प्रणिधानदण्डकमुच्चरन् देवस्य पार्श्वे विविधप्रार्थनावसरे ।

"इक्कह फुल्लह माटि देअइ सामी सिद्धिसुहु ।
तिणिसिउं केही साटी भोलिम जिणवरह ॥ १ ॥

इति चारणमुच्चरन्तं निशाम्य नवकृत्वः पठितेन नवसहस्रांस्तस्मै नृपो ददौ।तदनन्तरमुज्जयन्तसंनिधौ गते तस्मिन्नऽकस्मादेव पर्वतकम्पे संजायमाने श्रीहेमचन्द्राचार्या नृपं प्राहुः।इयं छत्रशीला युगपदुपेतयोर्द्वयोः पुण्यवतोरुपरि निपतिष्यतीति वृद्धपरंपरया, तदावां पुण्यवन्तौ यदियं गीरसत्या सत्या भवति तदालोकापवादः,नृपतिरेव देवं नमस्कारोतु न वयमित्युक्ते नृपतिनोपरुध्य प्रभव एव संघेनसह प्रहिताः

* एकपुण्यार्थं एकेन प्रीत्याऽर्पितपुण्येनेत्यर्थः स्वामी सिद्धिसुखं ददाति तन्निश्रया तेनैव प्रकारेण हे जिनवर किमर्थं भवान् मुग्धः इति भावनाश्रेणिसमुच्छसितस्य वाक्यम् ॥१।

१C D देवइ सिद्धि मुहु केहि साटि कटि रेभोतिम २ सउं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वयं छत्रशिलामार्गं परिहृत्य परस्पिन्जीर्ण-प्राकारपक्षे नव्यपद्याकरणाय श्रीवाग्भटदेव आदिष्टः पद्यायाः पक्षद्वये व्ययीकृतास्त्रिषष्टिलक्षाः । इति तीर्थयात्राप्रबन्धः ॥

कदाचित्पृथिव्यामानृण्याय नृपतिना स्वर्णसिद्धये श्रीहेमचन्द्राणामुपदेशात्तद्गुरवः श्रीसंघनृपतिविज्ञप्तिकाभ्यामाकारितास्तीव्रव्रतपरायणा महत्संघकार्यं विमृश्य विधिविहारक्रमेण पथि केनाप्यलक्ष्यमाणा निजामेव पौषधशालामागताः राजा तु प्रत्युद्गमादिसामग्रीं कुर्वन् प्रभुज्ञापितस्तत्राययौ । अथ गुरौ नृपतिप्रमुखैः समस्तश्रावकयुतैः प्रभुभिर्द्वादशावर्त्तवन्दनावन्दिते वन्दनान्ते तौ श्रुततदुपदेशानन्तरं गुरुभिःपृष्टे संघकार्ये सभां विसृज्य जवनिकान्तरितौ श्रीहेमचन्द्रनृपती तत्पादयोर्निपत्य सुवर्णसिद्धेर्याचनां चक्राते। मम बाल्ये वर्त्तमानस्य ताम्रखण्डैः काष्टभारवाहिकातो याचितःवल्लीरसेनाभ्यक्तोयुष्मदादेशाद्वह्निसंयोगात्सुवर्णीबभूव । तस्या वल्लेर्नामसंकेतादिरादिश्यतामिति ॥ श्रीहेमाचार्ये उक्तवति कोपाटोपात् श्रीहेमचन्द्रं दूरतः प्र-

१ A छत्रशिला

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षिप्य न योग्योसीति । अग्रे मुद्गरसप्रायदत्तविद्या त्वमजीर्णभाक् कथमिमां विद्यां मोदकप्रायां तव मन्दाग्नेर्ददामीति तं निषिध्य नृपं प्रति एतद्भाग्यं भवतो नास्ति येन जगदानृण्यकारिणी हेमनिष्पत्तिविद्या तव सिद्ध्यति । अपि च मारिनिवारणजिनमण्डितपृथ्वीकरणादिभिः पुण्यैः सिद्धे लोकद्वये किमधिकमभिलषसीत्पादिश्य तथैव विहारक्रमं कृतवन्तः । एकदा पृष्टः राज्ञा पूर्वभव स्वरूपं। तत्सर्वं कथितं प्रभुभिरिति। अथ कस्मिन्नप्यवसरे सपादलक्षं प्रति सज्जीकृते सैन्ये श्रीवाग्भटस्यानुजन्मा बाहडनामा मन्त्री दानशौण्डतया दूषितोपि भृशमनुशिक्ष्य भूपतिना सेनापतिश्चक्रे । तेन प्रयाणद्वितयानन्तरमस्तोकमार्थिलोकं मिलितमालोक्य कोशाधिपाल्लक्षद्रव्ये याचिते नृपादेशात्तस्मिन्नददाने अथ तं कशाप्रहारेणाहत्य सेनापतिस्तं कटकान्निरवासयत्। स्वयं तु यदृच्छया दानैःप्राणितार्थिलोकश्चतुर्दशशतसंख्यासु करभीष्वारोपितैर्द्विगुणैः सुभटैः समं चरन्मितैः प्रयाणैर्बम्बेरानगरे प्रकारं वेष्टयामास। अथ तस्यां। निशि सप्तशतीकन्यानां विवाहः प्रारब्धोस्तीति नगरलोकान्मत्वा तद्विवा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हार्थं तथैव निश्चि स्थित्वा प्राप्तः प्राकारपरावर्त्तं चकार। तत्राधिगतं स्वर्णकोटीसप्तकं तथैकादशसहस्राणि वडवानामिति संपत्तिगर्भितां विज्ञप्तिकां वेगवत्तरैश्वरैर्नृपं प्रति प्राहिणोत्। स्वयं तत्र देशे श्रीकुमारपालनृपतेराज्ञां दापयित्वाऽधिकारिणो नियोज्य व्याघुटितः। श्रीपत्तनं प्रविश्य राजसौधमाधिगम्य नृपं प्रणनाम। नृपस्तदुचितालापावसरे तद्दुष्णरञ्जितोप्येवमवादीत्। तव स्थूललक्ष्यतैव महद्दूषणं। (वाहानीकयोः साधनादौ साधीयान् नेदीयान्प्रयोगनिष्पत्तिरक्षामन्त्रो नो चेच्चक्षुर्दोषेणोर्द्ध एव विदीर्यसे) यं व्ययं भवान्कुरुते[1] तादृशं कर्त्तुमप्यहं न प्रभूष्णुः। स इति श्रुतनृपादेशान्नृपं प्रति "तथ्यमेव तदादिष्टं देवेन" एवंविधं व्ययं कर्त्तुं प्रभुर्न प्रभवति। यतः स्वामी परंपरया न नृपतेः सुतः। अहं तु नृपपुत्रोऽतो मयैव द्रव्यव्ययः साधीयान्क्रियते। तेनेति विज्ञप्ते नृपतिस्तोषं करोतु रोषं वा निकषः निकषाकाञ्चनश्रियमासादयतीत्यनर्घ्यतां लभमानो *नृपतिवि

(B C D पङ्क्तिद्वयं नास्ति)१ C कर्तुं क्षमते २A रोषं वा निकषा.

*. यतोहं स्वामिबलेन व्ययं करोमि। स्वामी तु कस्य बलेनातो मयैव द्रव्यव्ययः साधीयान् क्रियते इति वदन् प्रमुदितेन राज्ञा स-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सृष्टः स्वं पदं प्रपदे ॥

इति राजघरट्टवाहडप्रबन्धः ॥

अथ तस्य कनीयान्भ्राता सोलाकनामा मण्डलीकः सत्रागारबिरुदं बभार । अथ कदाचिदानाकनामा मातृष्वस्रीयस्तत्सेवागुणतुष्टेन राज्ञा दत्तसामन्तपदोपि तथैव सेवमानः। कदापि मध्यंदिनावसरे चन्द्रशालापल्यङ्कस्थितस्य नृपतेः पुरो निविष्टः सहसा कमपि प्रेष्यं तत्र प्राप्तं प्रेक्ष्य कोयमिति पृष्टे नृपतिना श्रीमदानाकः स्वं कर्मकरमुपलक्ष्य तत्संकेतान्निकेतनान्निर्गत्य सकौशलं पृष्टः पुत्रजन्मवर्द्धापनिकां प्रार्थयामास । ऊमिति तया वार्त्तया तु दिनकरप्रभयेव विकसितवदनारविन्दं तं विसृज्य स्वं पदमुपेतः । राजा किमेतदिति पृष्टस्तेन स्वामिनः पुत्रोत्पत्तिरिति विज्ञप्ते, वसुधाधवः स्वगतं किंचिदवधार्य तं प्रति प्रकाशं प्राह । यज्जन्म निवेदयितुमयं कर्मकरो वेत्रिभिरस्खलित एवायमाप[3] तावता पुण्योपचयेनायं गूर्जरदेशे नृपो

त्कृतो राजसदस्यनर्घ्यतां लभमानो राजघरट्टविरुदं लब्ध्वा । इति जिनमण्डनोपाध्यायकृतकुमारपालप्रबन्धे प. ९४

१ A B इति बाहड. २ A तथा. ३ इमां भुवमाप.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावी परमस्मिन्पुर धवलगृहे च न । यतोऽतः स्थानादुत्थापितस्य तवाग्रे सुतोत्पत्तिर्निवेदिता। ततो हेतोर्नास्मिन्नगरेश्वरत्वंमिति विचारचतुर्मुखेन श्रीकुमारपालदेवेन निर्णीतम् ॥

इति लवणप्रसादप्रबन्धः ॥

आज्ञावर्तिषु मण्डलेषु विपुलेष्वष्टादशस्वादरा-
दब्दान्येव चतुर्दश प्रसृमरां मारिं निवार्यौजसा ।
कीर्तिस्तम्भनिभांश्चतुर्दशशतीसंख्यान्विहारांस्तथा
कृत्वा निर्मितवान्कुमारनृपतिर्जैनो निजैनोव्ययम्१

अथ प्रभोः कदाचित्कच्छराजलक्षराजमातुर्महासत्याः शापाच्छ्रीमूलराजान्वयानां लूतारोगः संक्रामतीति स व्याधिः कुमारपाले बाधामधात् । संबन्धात्तु गृहिधर्मप्रतिपत्त्यवसरे प्रभोरुद्गणितराज्यभारे श्रीकुमारपाले तच्छिद्रेण तान्प्रविश्य लूताव्याधिर्बाधामधात् । तद्दुःखदुःखिते सराजलोके राज्ञि प्रणि-

---

* कर्णाटे १ गूर्जरे २ लाटे ३ सौराष्ट्रे ४ कच्छ ५ सैन्धवे १ ।
उच्चायां ७ चैव भम्भेर्यां ८ मारवे ९ मालवे १० तथा ॥ १
कौङ्कणे च ११ महाराष्ट्रे १२ कीरे १३ जान्लधरे १४ पुनः ।
सपादलक्षे १५ मेवाडे १६ दीपा १७ भीराख्ययोरपि १८॥२
काशिगाजण्यादिचतुर्दशदेशेषु ॥ इतिपूर्वोक्तस्य पत्रे १७

१ C तस्मिन्नगरे नरेश्वरत्वं २ राजन्यानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धानान्निजमायुः सबलं वीक्ष्याऽष्टाङ्गयोगाभ्यासेन प्रभवस्तं लीलयोन्मूलितवन्तः ॥ कदापि कदली-पत्राधिरूढं कमपि योगिनमालोक्य विस्मिताय नृपतये आसनबन्धेन चतुरङ्गुलमूलभूमित्यागाद्ब्रह्म-रन्ध्रेण निर्यत्तेजःपुञ्जं प्रभवो दर्शयामासुः ॥ अथ चतुरशीतिवर्षप्रमाणायुःपर्यन्ते निजमवसानदिनम-वधार्यान्त्याराधनक्रियायामनशनपूर्वप्रारब्धायां त-

---

* तद्यातनाबाधितमूर्तिरुच्चैः पप्रच्छ सूरिं गदशान्तिहेतुम् ।
आयुर्घनं श्रीकुमरस्य वीक्ष्य ते दक्षमुख्या अवदन्विमृश्य ॥
निवेश्यतेऽन्यो यदि कोपि राज्ये हित्वामयस्त्वां तमयं प्रयाति ॥
उवाच चातुर्यनिधिर्नरेशो निहन्म्यहं किं निजजीवितार्थं ।
वराकमन्यं परमार्थविज्ञः ! गिरः सुधासारसमा निपीय ।
दयाकिरस्ता अवदद्यतीशः । निविश्य राज्ये स्वयमेव दु खं ।
तत्ते हरिष्यामि नरेश्वराहं । अवोचदुच्चैश्चकितो नरेशः ।
को देववृक्षं पिचुमन्दहेतोश्चिन्तामणिं काचकृते निहन्ति ।
रोगं निहन्तुं मम शक्तिरस्ति स्वाङ्गान्तरं योगबलेन राजन् ।
ततः कुमारो महता महेन न्यवीविशत्सूरिवरं स्वराज्ये ।
हित्वा कुमारं परिभुक्तराज्यं लूतामयः सूरिशरीरमाप ।
रोगं हन्तुं निश्चलाङ्गः स योगी प्राणायामं पूरकाख्यं वितेने ।
ऊर्ध्वं नीते. सूर्यबिम्बे समन्ताच्चन्द्रस्तापाद्द्राग् सुधाभिर्ववर्ष ।
श्लिष्टं ताभिः सर्वरोगापहाभिर्वैगादङ्गं चङ्गमासीदमुष्य ।

इति चारित्रसुन्दरगणिकृतकुमारपालचरित्रस्य दशमसर्गस्य प्रथ-मवर्गे प. ३४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्तितरलिताय नृपतये षण्मासीशेषमायुरास्ते संतत्यभावाद्विद्यमान एव निजामुत्तरक्रियां कुर्या इत्यनुशिक्ष्य दशमद्वारेण प्राणोत्क्रान्तिमकार्षुः। तदनन्तरं प्रभोः संस्कारादनु तद्भस्म पवित्रमिति राज्ञा तिलकव्याजेन नमश्चक्रे। ततः समस्तसामन्तैस्तदनु नगरलोकैस्तत्रत्यमृत्स्नायां गृह्यमाणायां तत्र हेमखण्ड इत्यद्यापि प्रसिद्धिः॥ अथ राजा बाष्पाविललोचनः प्रभुशोकाविष्लवमनाः सचिवैर्विज्ञप्त इदमवादीत्। स्वपुण्यार्जितोत्तमतमलोकान् प्रभून्न शोचामि किं तु निजमेव सप्ताङ्गराज्यं सर्वथा परिहार्यं राजपिण्डदोषदूषितं, यन्मदीयमुदकमपि जगद्गुरोरङ्गे न लग्नं तदेव शोचामीति प्रभुगुणानां स्मारं स्मारं सुचिरं विलप्य प्रभूदिते दिने तदुपदिष्टविधिना समाधिमरणेन नृपः स्वर्लोकमलंचकार॥ सं० ११९९ वर्षाद्वर्ष ३१ श्रीकुमारपालदेवेन राज्यं कृतं॥ सं० १२३० वर्षेऽजयदेवोऽभिषिक्तः। अस्मिन्पूर्वप्रासादान् विध्वंसयति सीलनामा कौतुकी नृपपुरः प्रारब्धेऽवसरे कृतककामपटुतां मायया निर्माय तत्र स्वकल्पितं देवकुलपञ्चकं पुत्रेभ्यः समर्प्य ममानन्तरं भक्त्यतिशये-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाराधनीयमित्यनुशिक्ष्यान्त्यावस्थायां यावदास्ते तावत्तेन लघुपुत्रेण तत्तूर्णं चूर्णितमाकर्ण्य रे श्रीमदजयदेवेनापि पितुः परलोकान्तरं तद्धर्मस्थानानि विध्वंसितानि त्वं त्वद्यापि मयि विद्यमानेपि चूर्णयन्नधमतमोसीति तदालापेन सत्रपस्तस्मादसमञ्जसाद्विरराम। तदनु श्रीअजयदेवेन श्रीकपर्दिमन्त्री महामात्यपदं दातुमत्यर्थमभ्यर्थितः प्रातः शकुनान्यवलोक्य तदनुमत्या प्रभोरादेशमाचरिष्यामीत्यभिधाय शकुनगृहं गतस्ततः सप्तविधं दुर्गादेव्याः शकुनं याचितमवाप्य तच्छकुनं पुष्पाक्षतादिभिरभ्यर्च्य कृतकृत्यं मन्यमानः पुरगोपुरान्तः प्राप्तो नदन्तं वृषभमीशानदिग्भागे विलोक्यातिशयस्मेरमनाः स्वं निवासमासाद्य भोजनानन्तरं मरुवृद्धेन यामिकेन शकुनस्वरूपं पृष्टः श्रीकपर्दी तदग्रे तत्स्वरूपमादिश्य तांस्तुष्टाव। ततो मरुवृद्धः

नद्युत्तारेऽध्ववैषम्ये तथा संनिहिते भये।
नारीकार्ये रणे व्याधौ विपरीता[1] प्रशस्यते ॥ १

इति प्रामाण्याद्भवानासन्नव्यसनतया मतिभ्रंशात्प्रतिकूलमप्यनुकूलं मनुते। यस्त्वया वृषभः शुभः

१ तान् शकुनान् २ C विपरीतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिकल्पितः सोपि भवद्व्यापत्त्या शिवस्याभ्युदयं पश्यंस्तद्दाहात उक्षा[1] जगर्जेति तदुक्तिमवमन्यमाने तस्मिन्नापृच्छ्य तदर्थानि[2]ऽवगाढुं गते[3], स नृपतिना प्रसादीकृतां मुद्रामासाद्य महता महेन समधिगत-निजसौधे विश्रम्य निशि नृपतिना विधृतः समा-नप्रतिष्ठैरभिभवितुमारब्धः ॥

*जो करिवराण कुम्भे पायं दाऊण मुत्तिए दलइ ।
सो सीहो विहिवसउं जम्बूयपरिपिल्हणं सहइ ॥ १

इत्यादि विमृशन्कटाहिकायां प्रक्षेपकाले ।
अर्थिभ्यः कनकस्य दीपकपिशा विश्राणिताः कोटयो वादेषु प्रतिवादिनां विनिहिताः शास्त्रार्थगर्भा गिरः।
उत्खातप्रतिरोपितैर्नृपतिभिः शारैरिव क्रीडितं कर्त्तव्यं कृतमर्थिता यदि विधेस्तत्रापि सज्जा वयम्१
स सुधीरित्यन्त्यकाव्यमधीयंस्तथैव व्यापादयांचक्रे इति श्रीकपर्दिप्रबन्धः ॥

अथ श्रीप्रबन्धशतकर्त्ता रामचन्द्रस्तु तेन भूपापस-देन तप्ततास्रपट्टिकायां निवेश्यमानः ।

---

१ तद्दाहनोक्षत्वात् २ तीर्थानि ३ मरुवृद्धे.

*यः करिवराणां कुम्भे पादं दत्त्वा मौक्तिकानि दलति।
स सिंहो विधिवशाज्जम्बूकपरिपीडनं सहते ॥ १

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*महिवीढह सचराचरह जिण सिरि दिन्नो पाय।
तसु अत्थमणु दिणेसरहं होउत होइ चिराँय ॥१

इत्युदीर्य दशनाग्रेण रसनां छिन्दन् विपन्न एव व्यापादयांचक्रे ॥

इति रामचन्द्रप्रबन्धः॥

अथ राजपितामहः श्रीमानाम्रभटस्तत्तेजोऽसहिष्णुभिः सामन्तैस्तैः समं तदालब्धावसरैः प्रणामं कारयद्भिराक्षिप्त एवमवादीत् । देवबुद्धया श्रीवीतरागस्य गुरुबुद्धया श्रीहेमचन्द्रर्षेः स्वामिबुद्धया कुमारपालस्यैव मे नमस्कारोऽस्मिन् जन्मनीति जैनधर्मवासितसत्त्वधातुना तेनेत्यभिहिते रुष्टो राजा युद्धसज्जो भवेति तद्गिरमाकर्ण्य श्रीजैनबिम्बं समभ्यर्च्याऽनशनं प्रपद्याङ्गीकृतसंग्रामदीक्षो निजसौधाद्राज्ञः परिग्रहं निजभटवातेन तुषनिकरमिव विकरन् घटिकागृहे प्राप्तस्तेषां मलीमसानां संगजनितं कश्मलं धारातीर्थे प्रक्षाल्य तत्कौतुकालोकनागताभिरप्सरोभिरहंपूर्विकया व्रियमाणो देवभू-

*महीपीठे सचराचरे येन श्रीः दत्ता प्रायः।
तस्यास्तमनं दिनेश्वरस्य भवितव्यं भवत्येव चिराय ॥ १

१ A जिणिसिरि दिन्ना २ C D दिणसरसु ३ होइतु होदु४ A B विराउ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यं जगाम ॥

वरं भट्टैर्भाव्यं वरमपि च खिन्नैर्द्रुनकृते
वरं वेश्याचार्यैर्वरमपि महाकूटनिपुणैः ।
दिवं याते दैवादुदयनसुते दानजलधौ
न विद्वद्भिर्भाव्यं कथमपि बुधैर्भूमिवलये ॥ १
त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युग्रपुण्यपापानामिहैव फलमश्नुते ॥ १

इति प्रमाणोक्तप्रामाण्यात्स कुपतिर्वयजलदेवनाम्ना प्रतीहारेण क्षुरिकया हतो धर्मस्थानपातकी कृमिभिर्भक्ष्यमाणः प्रत्यहं नरकमनुभूय परोक्षतां प्रपेदे ॥

सं० १२३० पूर्ववर्षादऽजयदेवेन वर्ष ३ राज्यं कृतं ॥ सं० १२३३ पूर्ववर्षाद्वर्ष २ बालमूलराजेन राज्यं कृतमस्य मात्रा नाइकिदेव्या परमार्हिभूपसुतयोत्संगे शिशुं निधाय गाडरारघट्टनामनि घाटे संग्रामं कुर्वत्या म्लेच्छराजा तत्सत्त्वादकालागतजलदपटलसाहाय्येन विजिग्ये ॥

सं० १२३५ पूर्ववर्षाद्वर्ष ६३ श्रीभीमदेवेनराज्यं कृतमास्मिन्राज्ञि राज्यं कुर्वाणे श्रीसोहडनामा मालवभूपतिर्गूर्जरदेशाविध्वंसनाय सीमान्तमागतस्तत्प्रधानेन संमुखं गत्वेत्यवादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतापो राजमार्त्तण्ड पूर्वस्यामेव राजते ।
स एव विलयं याति पश्चिमाशावलम्बिनः ॥ १

इति विरुद्धां तद्गिरमाकर्ण्य स पश्चान्निवृत्ते । तदनु तत्पुत्रेण श्रीमदर्जुनदेवनाम्ना गूर्जरदेशभङ्गोप्यकारि । श्रीमद्भीमदेवराज्यचिन्ताकारी व्याघ्रपल्लीसंकेतप्रसिद्धः श्रीमदानाकनन्दनः श्रीलवणसाहप्रसादश्चिरं राज्यं चकार । तत्सुतः साम्राज्यभारधवलः श्रीवीरधवलस्तन्माता मदनराज्ञी देवराजनाम्नो भगिनीपतेः पट्टकिलस्य भगिन्यां विपन्नायां तस्य बहुतरमनिर्वहमाणमापद्वारं निशम्य तन्निर्वहणाय लवणप्रसादाभिधपतिमापृच्छ्य शिशुना वीरधवलेन समं तत्र गता सती तेन स्वहृणीयगुणाकृतिरिति गृहिणीचक्रे । श्रीलवणस्तद्वृत्तान्तं सम्यगवगम्य तं व्यापादयितुं निशि तद्गृहे प्रविष्टो निभृतीभूय स यावदवसरं निरीक्ष्यते, तावत्स भोजनायोपविशन् वीरधवलं विना नाश्नामीति भूयो भूयो व्याहृत्य निर्बन्धात्समानीयैकस्मिन्नेव स्थालेऽश्नन्नेकस्मादपि तं शरीरिणं कृतान्तमिव स्वान्तकमालोक्य श्यामलास्यो मा भैषीरिति तेनोचे । यदहं त्वामेव हन्तुमागतः परमस्मिन्मन्नन्दने वीरधवले

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वात्सल्यं साक्षाच्चक्षुषा निरीक्ष्य तदाग्रहान्निवृत्तोस्मीत्युक्त्वा तेन सत्कृतो यथागतं जगाम। वीरधवलस्यापरमातृकाः राष्ट्रकूटान्वयाः साङ्गणचामुण्डराजादयो वीरजनत्वेन भुवनतलप्रतीताः। अथ स वीरधवलक्षात्रिय उन्मीलितकिंचिच्चेतनस्तस्माद्भूत्तान्तात्तपमाणस्तद्गृहं त्यक्त्वा निजमेव जनकं सिषेवे। सत्त्वौदार्यगाम्भीर्यस्थैर्यनयविनयौचित्यदयादानदाक्षिण्यादिगुणशाली शालीनतया कण्टकयस्तां कामपि भुवमाक्रम्य पित्रापि कियत्कृतजनपदप्रसादो द्विजन्मना चाहडनाम्ना सचिवेन चिन्त्यमानराज्यभारः प्राग्वाटवंशमुक्तामणिना पुरा श्रीमत्यत्तनवास्तव्येन तत्कालं तत्रायाततेजःपालमन्त्रिणा सह सौहार्दमुत्येदे। मन्त्रिणस्तु जन्मवार्त्ता चैवं। कदाचिच्छीमत्यत्तने भट्टारकश्रीहरिभद्रसूरिभिर्व्याख्यानावसरे कुमारदेव्याभिधाना काचिद्विधवातीव रूपवती मुहुर्मुहुर्निरीक्ष्यमाणा तत्र स्थितस्याशराजमन्त्रिणश्चित्तमाचकर्ष। तां[1] तर्जनानन्तरं मन्त्रिणानुयुक्ता गुरव इष्टदेवतादेशादमुष्याः कुक्षौ सूर्याचन्द्रमसोर्भाविनमवतारं पश्या-

१ वीरव्रतेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मः, तत्सामुद्रिकानि भूयो विलोकितवन्त इति प्रभोर्विज्ञाततत्त्वः स तामपहृत्य निजां प्रेयसीं कृतवान्। क्रमात्तस्या उदरेऽवतीर्णौ तावेव ज्योतिष्केन्द्राविव वस्तुपालतेजःपालाभिधानौ सचिवावभूतां। अथान्यदा श्रीवीरधवलदेवेन निजव्यापारभारायाभ्यर्थ्यमानः प्राक् स्वसौधे तं सपल्लकिं भोजयित्वा "नुपमा राजपत्न्यै श्रीजयतलदेव्यै निजं कर्पूरमयताडङ्कयुग्मं कर्पूरमयो मुक्ताभिः सुवर्णमयमण्यन्तरिताभिर्निष्पन्नमेकावलीहारं सा प्राभृतीचकार" मन्त्रिणः प्राभृतमुपढौकितं निषिध्य निजं व्यापारं समार्पयत्। यत्तवेदानीं वर्त्तमानं वित्तं तत्ते कुपितोपि प्रतीतिपूर्वं पुनरेवाददामीति, अक्षरपात्रान्तरसंबन्धपूर्वकं श्रीतेजःपालाय व्यापारसंबन्धिनं पञ्चाङ्गप्रसादं ददौ।

अकरात्कुरुते कोशमवधादेशरक्षणम्।
देशंवृद्धिमयुद्धाच्च स मन्त्री बुद्धिमांश्च सः॥ १

निखिलनीतिशास्त्रोपनिषन्निषण्णधीः स्वस्वामिनं वर्द्धयन् भानूदये कालपूजया विधिवच्छ्रीजिनमर्चि-

१ C समर्पयन् २ यत्तावकादीनां B यन्मयेदानीं ३ पात्रान्तरस्थबन्ध. ४ भूमि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वा गुरूणां वन्दनकपूरपूजानन्तरं द्वादशावर्त्तवन्दनदानादनु यथावसरप्रत्याख्यानपूर्वमपूर्वमेकैकं श्लोकं गुरोरध्येति मन्त्रावसरानन्तरं सद्यस्करसवतीपाकभोजनानन्तरं, मूञ्जालनामा महोपासकस्तदङ्गलेखकोऽवसरे रहसि पप्रच्छ। स्वामिनाहर्मुखे शीतान्नमाहार्यते किं वा सद्यस्कमिति पृच्छन्तं यामेयं द्वेधा त्रेधाऽवधीर्य कदाचित्क्रोधान्मन्त्रिणा पशुपाल इत्याक्षिप्तः। स धृतधैर्यः। उभयोः कश्चिदेकतरः स्यादित्याभिहिते तद्वचश्चातुरीचमत्कृतचित्तोऽनधिगतभवदुपदेशध्वनिरहं, तद्विज्ञ यथास्थितं विज्ञप्यतामित्यादिष्टः स वाग्मी प्रोवाच। यां रसवतीमतीव रसप्लुतां सद्यस्कां प्रभुरभ्यवहरति तां प्राग्पुण्यरूपां जन्मान्तरिततयात्यन्तशीतलां मन्यते। किं चेदं मया गुरोः संदेशवचनमाविःकृतं तत्त्वं तु त एवावधारयन्तीति तत्र पादावधार्यतां तेनेति विज्ञप्तः श्रीतेजःपालनामा मन्त्री कुलगुरुभट्टारकश्रीविजयसेनसूरीणामभ्यर्णमागतो गृहिधर्मं पप्रच्छ। तैरुपासकदशाभिधसप्तमाङ्गाज्जिनोदितेदव पूजावश्यकयतिदानादिके गृहिधर्मे समुपदिष्टे, ततः

१ ० ग्राम्योऽयं २ मन्ये ३ गृहिधर्मविधिं गुरून्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभृति स देवतार्चनविशेषजैनमुनिदानाद्यं धर्मकृत्यमारब्धवान्। वर्षत्रयदेवतावसराय पदेन पृथक्कृतेन षट्त्रिंशत्सहस्रप्रमाणेन द्रव्येण बाउलाग्रामे श्रीनेमिनाथप्रासादः समजनि ॥ अथ सं० १२७७ वर्षे सरस्वतीकण्ठाभरणलघुभोजराजमहाकविमहामात्यश्रीवस्तुपालेन महायात्रा प्रारेभे। गुरूपदिष्टे लग्ने तत्कृत्यसंघाधिपत्याभिषेकेण श्रीदेवालयप्रस्थाने उपक्रम्यमाणे दक्षिणपथे दुर्गादेव्याः स्वरमाकर्ण्य स्वयं तद्दिदा शाकुनिकेन किंचिच्चिन्तयति। मरुवृद्ध शकुनं भारितं विधेहीत्यभिदधानः शाकुनाच्छब्दो बलीयानिति विचार्य पुराद्विहारावासेषु श्रीदेवालयं संस्थाप्य शकुनव्यतिकरं पृष्टो मार्गवैषम्ये शकुनानां वैपरीत्यं श्लाघ्यते। राज्यविकलतायां तीर्थमार्गाणां वैषम्यं तथा यत्र सा दुर्गा दृष्टिपथं गता तत्र कमपि दक्षं पुरुषं प्रस्थाप्य स प्रदेशो दर्श्यतां। तथाकृते स पुरुष इति विज्ञपयामास। यत्तस्मिन् वरण्डशब्दे नवीक्रियमाणे सा त्रयोदशेष्वरेषु निषण्णा देव्यभूत्। अथ स मरुवृद्धो। देवी भवतः सार्द्धत्रयोदशसंख्या यात्रा अभिहितवती। अन्त्यार्द्धयात्राहेतुं भूयः पृष्ठे स आह। इ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हातुलमङ्गलावसरे तद्वक्तुं न युक्तं समये सर्वं निवेदयिष्यामीति वाक्यानन्तरं श्रीसंघेन समं मन्त्री पुरतः प्रयाणमकरोत्। सर्वसंवाहनानामर्द्धपञ्चमसहस्राणि। एकविंशतिशतानि श्वेताम्बराणां संघतद्रक्षाधिकारे सहस्रं तुरङ्गमाणां सप्तशती रक्तकरभीणां संघरक्षाधिकारिणश्चत्वारो महासामन्ताः। इत्थं समग्रसामग्र्या मार्गमतिक्रम्य श्रीपादलिप्तपुरे स्वयं कारिते श्रीमहावीरचैत्यालंकृतस्य श्रीललितसरसः परिसरे आवासान्दापयामास। तत्र तीर्थाराधनां विधिवद्विधाय मूलप्रासादे काञ्चनकलशं प्रौढजिनयुगलं श्रीमोढेरपुरावतारे श्रीमन्महावीरचैत्याराधकमूर्त्तीः देवकुलिकामण्डपश्रेणेरुभयतश्चतुष्किकाद्वयपङ्क्तिं[1], शकुनिकाविहारे सत्यपुरावतारे चैत्यपुरतो रजतमूल्यं तोरणं, श्रीसंघयोग्यान्मठान्, धार्मिकसत्यकस्य[2] देवकुलिकाः, नन्दीश्वरावतारे प्रासादान्[3] इन्द्रमण्डपं च, तन्मध्ये गजाधिरूढश्रीलवणप्रसादवीरधवलमूर्त्तीं, तुरङ्गाधिरूढां निजमूर्त्तिं, तत्र सप्त पूर्वपुरुषमूर्त्तीः सप्त गुरुमूर्त्तीश्च, तत्संनिधौ चतुष्किकायां ज्यायोभ्रात्रोर्महंमालवदेवलूणिगयोराराधकमूर्त्तीं, प्रतो-

१ C श्रीतदीला २ A जामि. ३ D नन्दीश्वरप्रासादाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लीः, अनुपमसरः, कपर्दियक्षमण्डपतोरणप्रभृतीनि बहूनि जिनधर्मस्थानानि रचयांचक्रे। तथा नन्दीश्वरकर्मस्थाये कण्टेलीयापाषाणसत्कजातीयषोडशस्तम्भेषु पर्वतात्[1] जलमार्गेणानीयमानेषु समुद्रकण्ठोपकण्ठे उत्तार्यमाणेषु, एकः स्तम्भः पङ्के मग्नस्तथा यथा निरीक्ष्यमाणोपि न लभते। तत्पदेऽपरपाषाणस्तम्भेन प्रासादः प्रमाणकोटिं नीतः। वर्षान्तरे वारिधिवेलावशात्यङ्कनिमग्नः स एव स्तम्भः प्रादुरासीत्। सचिवसमादेशात्तस्मिंस्तत्र संचार्यमाणे प्रासादो विदीर्ण इति निवेदितुमागताय पुरुषभाषकाय हैमीं जिव्हां स मन्त्री ददौ। दक्षैः किमेतदिति पृष्टेऽतः परं यथा कथंचिद्धर्मस्थानानि दृढानि कारयिष्यन्ते यथा युगान्तेपि तेषां नान्तो भवति अतः पारितोषिकं दानं। आमूलात्तृतीयवेलायामयं प्रासादः समुद्धृतो विजयते। श्रीपालिताणके च पौषधशालां विशालां कारयामास। श्रीमदुज्जयन्ते च श्रीसंघेन सह प्राप्तो मन्त्री तत्र च तदुपत्यकायां[2] जलपूरे कारितं नव्यं वप्रं, तथा तन्मध्ये श्रीमदाशराजविहारं, तथा कुमारदेवीसरश्च, निरुपमं वि-

१ पावकपर्वतात् C D २ उपत्यकान्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोक्य धवलगृहे पादोऽवधार्यतामिति नियुक्तै-
रुच्यमाने श्रीमद्गुरूणां योग्यं पौषधवेश्माऽस्ति ना-
स्तीति मन्त्रिणादिष्टे तन्निष्पाद्यमानमाकर्ण्य विनया-
तिक्रमभीरुर्गुरुभिः सह बाहिर्दापितावासे तस्थौ।
प्रातरुज्जयन्तमारुह्य श्रीशैवेयक्रमकमलयुगलमभ्य-
र्च्य स्वयंकारितश्रीशत्रुंजयावतारतीर्थप्रभूतप्रभावनां
विधाय कल्याणत्रयचैत्यवर्यसपर्यादिभिस्तदुचिती-
माचर्य मन्त्री यावत्तृतीये दिनेऽवरोहति तावदुभाभ्यां
दिनाभ्यां निष्पन्ने पौषधौकसि मन्त्रिणा समं गुरव-
स्तत्र समानीतास्तत्प्रशशंसुः पारितोषिकदानेनानु-
जगृहुः[२]। श्रीमत्पत्तने प्रभासक्षेत्रे चन्द्रप्रभं प्रभाव-
तयाँ प्रणिपत्य यथौचित्यादभ्यर्च्य च निजेऽष्टापदप्रा-
सादेऽष्टापदकलशमारोप्य तत्रत्यदेयलोकाय दानं
ददानः श्रीहेमाचार्यैः श्रीकुमारपालनृपतये जगद्वि-
दितं श्रीसोमेश्वरः प्रत्यक्षीकृत इति पञ्चदशाधिक-
वर्षशतदेशीयधार्मिकपूजाकारकमुखादाकर्ण्य तच्च-
रित्रचित्रितमना व्यावृत्तमानो मार्गे लिङ्गोप-
जीविनामसदाचारेणान्नदाने निषिद्धे तत्पराभवं

---

१ जन्म दिक्षा केवलं च यस्मिन्दिने तीर्थकृतस्तदुत्सवं विधाय यच्चैत्यादौ बिम्बं स्थाप्यते तादृशचैत्येषु २B जगृहे. ३ प्रभावनया.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विज्ञाय वायडीयश्रीजिनदत्तसूरिभिर्निजोपासकपार्श्वात्तस्मिन्क्षणे पूर्यमाणे सति दर्शनानुनयार्थं[1] तत्र समागताय मन्त्रिणे.

रत्नाकर इव क्षारवारिभिः परिपूरणात् ।
गम्भीरिमाणमाधत्ते शासनं लिङ्गधारिभिः ॥ १ ॥
यान् लिङ्गिनोनुवदन्ते[2] संविग्ना अपि साधवः ।
तदर्चा चर्च्यते कस्माद्धार्मिकैर्भवभीरुभिः ॥ २ ॥
प्रतिमाधारिणोप्येषां त्यजन्ति विषयं पुरः ।
लिङ्गिनां विषयस्थानामनर्चा तु विरोधिनी ॥ ३ ॥
लिङ्गोपजीविनां लोके कुर्वन्ति येऽवधीरणाम् ।
दर्शनोच्छेदपापेन लिप्यन्ते ते दुराशयाः ॥ ४ ॥

आवश्यकवन्दननिर्युक्तौ ॥

*तित्थयरगुणा पडिमासु नत्थि निस्संसयं वियाणन्तो ।
तित्थयरोवि[3] नमन्तो सो पावइ[4] निज्जरं विउलं १

---

१ B अनुनयार्थे. २ C वन्दन्ति ३ तित्थयरुत्ति ४ A पामइ

---

*तीर्थंकरगुणाः प्रतिमासु न सन्ति निःसंशयं विजानन्तोऽपि तीर्थंकरान् नमन्तः ते प्राप्नुवन्ति निर्जरां विपुलाम् १

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*लिङ्गं जिणपन्नत्तं एव नमंसन्ति निजरा विउला।
जइवि गुणप्पहीणं वन्दइ अज्झप्पसुद्धीए ॥ २ ॥

इति तदुपदेशान्निर्मार्जितसम्यक्त्वकदर्पणो विशेषादर्शनपूजापरः स्वस्थानमासदत्। अथ ज्यायसा सोदरेण मं० लूणिगनाम्ना परलोकप्रयाणावसरेऽर्बुदवसहिकायां[2] मम योग्या देवकुलिका कारयितव्येति धर्मव्ययं याचित्वा तस्मिन्विपन्ने तद्गोष्ठिकेभ्यस्तद्भुवमलभमानश्चन्द्रावत्याः स्वामिनः पार्श्वान्नव्यां भूमिं विमलवसहिकासमीपेऽभ्यर्थ्य तत्र श्रीलूणिगवसहिप्रासादं भुवनत्रयचैत्यशलाकारूपं कारयामासिवान्। तत्र श्रीनेमिनाथबिम्बं संस्थाप्य प्रतिष्ठितं तद्गुणदोषविचारणाकोविदं श्रीजावालिपुराच्छ्रीयशोवीरमन्त्रिणं समानीय मन्त्री प्रासादस्वरूपं प्रपच्छ। ततस्तेन प्रासादकारकसूत्रधारः शोभनदेवोऽभ्यधायि। रङ्गमण्डपे शालभञ्जिकामिथुनस्य विशालघाँटस्तीर्थकृत्प्रासादे सर्वथानुचितो वास्तुनिषिद्धश्च। तथा

१ नमंसुत्ति २ D अर्बुदे विमलवसहिकायां ३ D विलास.

*लिङ्गं जिनप्रज्ञप्तं एव नमस्यन्ति निर्जरा विपुला यद्यपि गुणप्रहीनं वन्दन्ते अध्यात्मशुद्धये २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गर्भगृहे प्रवेशद्वारे सिंहाभ्यां तोरणमिदं देवस्य विशेषपूजाविनाशि । तथा पूर्वपुरुषमूर्त्तियुतं गजानां शाला पश्चाद्भागे[1] प्रासादकारापकस्यायतिविनाशि[2] । अप्रतीकारार्हं दूषणत्रयं विज्ञस्यापि सूत्रभृतो यदुत्पद्यते स भाविकर्मणो दोष इति निर्णीय यथागतं स च गतः । तदुपश्लोकनश्लोका एवम् ।

यशोवीर यशोमुक्ताराशेरिन्दुरसौ शिखा ।
तद्रक्षणाय रक्षायाः श्रीकारो लाञ्छनच्छलात् ॥१॥
बिन्दवः श्रीयशोवीर शून्यमध्या निरर्थकाः ।
संख्यावन्तो विधीयन्ते त्वयैकेन पुरस्कृताः ॥ २ ॥
यशोवीर लिखत्याख्यां यावच्चन्द्रे विधिस्तव ।
न माति भुवने तावदाद्यमप्यक्षरद्वयम् ॥ ३ ॥

इति श्रीशत्रुञ्जयादितीर्थानां यात्राप्रबन्धाः ।

॥ अथ श्रीवस्तुपालस्य स्तम्भतीर्थे सइदनाम्ना नौविणिजेन समं विग्रहे संजायमाने श्रीभृगुपुरान्महासाधनिकं शङ्खनामानं श्रीवस्तुपालं प्रतिकालरूपमानीतवान्। स जलधिकूले दत्तनिवासे नगरप्रवेसमार्गान् शत्रुसंकीर्णानालोक्य व्यवहारिणां चित्तानि यानपात्रप्रणयीनि च वीक्ष्य प्रहितैर्बन्दिभिः श्री-

---

१ C पुरतः २ तथाविधप्रयोगेषु रूढिः ३ B आयविनाशो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्सुपालेन समं समरवासरं निर्णीय यावच्चतुरङ्गसैन्यं सन्नह्यते तावच्छ्रीवस्तुपालेन पुरः कृतो गुडजातीयो लूणपालनामा सुभटो यदि शाङ्गखमन्तरेणाहं प्रहरामि तदा कपिलां धेनुमेवेति वारवर्णिकापूर्वकः शाङ्गख इति तद्वचनादनु शाङ्गखोहमिति प्रतिसुभटेनोदिते तं निपात्य पुनरनयैव रीत्या द्वितीयेपि पातिते सति कथं समुद्रसामीप्यात् शाङ्गखबाहुल्यमित्युच्चरन् महासाधनिकशाङ्गखैनव तत्सुभटतां श्लाघमानेनाहूतः कुन्ताग्रेण प्रहरन् सतुरग एकेनैव प्रहारेण व्यापादितः । तदनु श्रीवस्तुपालेन समराङ्गणप्रणयिना केसरिकिशोरेण च शाङ्गखसैन्यं गजयूथमिव त्रासितं दिशो दिशमनेशत् । पश्चान्नौवित्तको मारितः सङ्घयद इति । तदनु लूणपालमृत्युस्थाने लूणपालेश्वरप्रासादो मन्त्रिणा कारितः । अथान्यस्मिन्नवसरे श्रीसोमेश्वरस्य कवेः काव्यम् ॥

हंसैर्लब्धप्रशंसैस्तरलितकमलप्रत्तरङ्गैस्तरङ्गै-
र्नीरैरन्तर्गभीरैश्चटुलबककुलग्रासलीनैश्च मीनैः ।
पालीरूढद्रुमालीतलसुखशयितस्त्रीप्रणीतैश्च गीतै-

---

१ A भवण D लण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाति प्रक्रीडदूर्मिस्तव सचिव चलच्चक्रवाकस्त-
टाकः ॥ १ ॥

श्रीमन्त्रिणा षोडशसहस्रद्रम्माणां दात्तिः[2] प्रसादीकृता। क्वचिच्चिन्तातुरस्य मन्त्रिणो भूमिं मृगयमाणस्य समागतः। सोमेश्वरदेवः समयोचितमिदमपाठीत् ॥ तद्यथा ॥

एकस्त्वं भुवनोपकारक इति श्रुत्वा सतां जल्पितं
लज्जानम्रशिराः स्थिरातलमिदं यद्वीक्ष्यसे वेद्मि तत्
वाग्देवीवदनारविन्दतिलक श्रीवस्तुपाल स्वयं
पातालाद्बलिमुद्धिधीर्षुरसकृन्मार्गं भवान् मार्गति १

मन्त्रिणास्य काव्यस्य पारितोषिकेऽष्टौ सहस्राणि दत्तानि ॥ तथा ॥

त्वचं कर्णः शिबिर्मांसं जीवं जीमूतवाहनः।
ददौ दधीचिरस्थीनि। इति त्रिषु पदेषु पण्डितेषूधीयमानेषु पण्डितजयदेवः समस्यापदमिव वस्तुपालः पुनर्वसु। इत्युच्चरन् सहस्रचतुष्टयं लेभे। तथा सूरीणां दर्शनप्रतिलाभनावसरे केनापि दुर्गतद्विजातिना याचनया तन्नियुक्तेभ्यः कृपया पटीमुपलभ्य मन्त्रिणं प्रति समयोचितमूचे ॥

---

१ B दाक्षीः २ D सहस्रा दानैः प्रसादीकृताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वचित्तूलं क्वचित्सूत्रं कार्पासास्थि क्वचित्क्वचित् ।
देव त्वदरिनारीणां कुटीतुल्या पटी मम ॥ १ ॥

तत्पारितोषिके मन्त्रिणा दत्तानि पञ्चदशशतानि । तथा बालचन्द्रनाम्ना पण्डितेन श्रीमन्त्रिणं प्रति ॥

गौरी रागवती त्वयि त्वयि वृषो बद्धादरस्त्वं युतो
भूत्या त्वं च लसद्गुणः शुभगणः किं वा बहु ब्रूमहे।
श्रीमत्तीर्थ्वर नूनमीश्वरकलायुक्तस्य ते युज्यते
बालेन्दुश्चिरमुच्चकै रचयितुं त्वत्तोऽपरः कः प्रभुः॥१

इत्युक्ते तस्याचार्यपदस्थापनायां द्रम्मसहस्रं व्ययीकृतं ॥ कदाचिन्म्लेछपतेः सुरत्राणस्य गुरुमालिमं मखंतीर्थयात्राकृते इह समागतमवगम्य तज्जिघृक्षुभ्यां श्रीलवणप्रसादवीरधवलाभ्यां श्रीतेजःपालमन्त्री मन्त्रं पृष्ट एवमाख्यातवान् ।

धर्मछद्मप्रयोगेण या सिद्धिर्वसुधाभुजाम् ।
स्वमातृदेहपण्येन तदिदं द्रविणार्जनम् ॥ १ ॥

इति नीतिशास्त्रोपदेशेन वृकयोरिव तयोः छागमुन्मोच्य पाथेयादिना सत्कृत्य तं तीर्थं प्रति प्रहितवान्। स च कियद्भिर्वर्षैः[2] पश्चाद्व्यावृत्तः श्रीम-

१ मक्का २ B D दिनैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्त्रिणा तदुचितनेपथ्यादिभिः सत्कृतः स स्वस्थानं प्राप्तस्तीर्थगुणानां विस्मरन् श्रीसुरत्राणपुरतः श्रीवस्तुपालमेव वर्णयामास। स सुरत्राणस्तदनन्तरमस्माकं देशे भवानेवाध्यक्षोऽहं तु भवतः सेलभृत् तत्त्वयाहं यत्कृत्यादेशेनैव सर्वदानुग्राह्य इति प्रतिवर्षं तत्प्रहितयमलकपत्रेणोपरुध्यमानः श्रीमन्त्रीशः श्रीशत्रुञ्जयभूमिगृहयोग्यं श्रीयुगादिजिनबिम्बं धन्यं मन्यमानस्य सुरत्राणस्यानुज्ञया तद्देशवर्त्तिन्या उम्माणीनाम्न्याः खन्याः प्रयत्नशतैरानीतवान्। तस्मिन्नप्यारोहति श्रीमूलनायकस्यामर्षात्पर्वते विद्युत्पातः समजनि। ततः प्रभृति श्रीमन्त्रीश्वरस्याजीवितान्तं श्रीदेवपादैर्दर्शनं न ददे। कस्मिंश्चित्पर्वणि श्रीमदनुपमया निरुपमे मुनीनामन्नदाने यदृच्छया दीयमाने कार्योत्सुक्यात्तदागतः श्रीवीरधवलदेवः सिताम्बरदर्शनिनं द्वारप्रदेशं पाणिंधममालोक्य विस्मयस्मेरमानासो मान्त्रिणमभीहितवान्। हे मान्त्रिण इत्थं सदैवाभिमतदैवतवत् किममी न सत्क्रियन्ते। तव चेदशक्तिस्तदर्द्धभागो ममास्तु। मामकमेव सर्वं वा दीयतां सदैवेत्यतः

१ C सर्वथा २ A B मुम्माणी ३ A दर्शनेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणान्नोच्यते तथा कृते भवतो वृथायास एव स्यादिति तन्मुखचन्द्रविनिर्गतैर्गोभिर्निर्वाणोपतापः स्वामिनः कियानर्द्धविभागः सर्वमेव भवदीयमेवेत्युक्त्वा पटीं न्युञ्छनीचक्रे। अन्यदा यतिदानावसरे मिथो मुनिजनसंमर्दने श्रीमदनुपमायाः प्रणमत्याः प्राज्याज्यसंपूर्णं घृतपात्रं पृष्ठे पतितमालोक्य कुपितं तेजःपालमान्त्रिणमिति सान्त्वितवती यत्तव स्वामिनः प्रासादात्मुनिजनपुण्यपात्रपतितैराज्यैरङ्गाभ्यङ्गो भवतीति तत्पूर्णदानविधिचमत्कृतोमन्त्री पश्चाङ्गप्रसादपूर्वं

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्
त्यागसहितं च वित्तं दुर्लभमेतच्चतुर्भद्रम् ॥ १ ॥

इति युक्तोक्तिपूर्वं च तां मन्त्री प्रशशंस। इत्यनेकधा दानावदातानिकषरेखां प्राप्ता।

लक्ष्मीश्चला शिवा चण्डी शची सापत्न्यदूषिता।
गङ्गा न्यग्गामिनी वाणी वाक्सारोऽनुपमा ततः १

इत्यादिभिः स्तुतिभिर्जैनाचार्यैः स्तूयते स्म ॥

अथान्यदा पञ्चग्रामसङ्ग्रामाधिरूढयोः श्रीवीरधव-

---

* बौद्धेन विमलाचार्येण कृतोयं श्लोकः प्रश्नोत्तरमालायां वर्तते तस्मान्नारायणेन गृहीत्वा स्वग्रन्थे हितोपदेशे स्थापितः, तस्मादनेनेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ललवणप्रसादयोः श्रीवीरधवलपत्नी राज्ञी जयतलदेवी सन्धिविधानहेतवे जनकं प्रति श्रीशोभनदेवमुपागता। किं वैधव्याद्भीरुः सन्धिबन्धं कारयसीति तेनाभिहिता। वीरचूडामणेः पत्युः श्रीवीरधवलस्योन्नतिमारोपयन्ती सा पितृकुलविनाशशङ्कया भूयो भूयोहमेवं व्याहरामि। तुरगपृष्ठाधिरूढे तस्मिन्वीरधवले स कोस्ति सुभटो यस्तत्सन्मुखे स्थास्यतीति व्याहृत्य सामर्षैव प्रतस्थे। अथ तस्मिन्समरसंरम्भे प्रहारव्यथाव्याकुले श्रीवीरधवले भुवस्तलमलंकुर्वति।

यः पञ्चग्रामसङ्ग्रामभूमौ भीमपराक्रमः।
घातैः पपात संजातैरश्वतो न तु गर्वतः॥ १॥

इति किञ्चिदन्तर्भग्ने समरसुभटवर्गे एक एवायं पत्तिः पतित इति सकलं निजबलमुत्साहयन् श्रीलवणप्रसादः समस्तानपि रिपून् लीलयैव समूलकाषं कषितवान्। इत्थमेकविंशत्तिकृत्वः सत्त्वगुणरोचिष्णू रणरासिकतया क्षेत्रे पितुरग्रे पतितः॥ अथ वीरधवलस्यायुःपर्यन्ते, प्रतितीर्थं प्रस्थितेन[2] दत्तमेकधा सहस्रगुणमुपलभ्यत इति रूढेः श्रीतेजः-

१ A प्रतिहारश्री° २ A C D प्रस्थितस्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पालेन जन्मसुकृतं ददे । तदनु तस्मिन् स्वामिनि विपन्ने तत्सौभाग्यातिशयात्सेवकानां विंशत्यधिकशतेन सहगमनं चक्रे । तदनु श्रीतेजःपालेन प्रेतवने यामिकान्मुक्त्वा लोकस्य स निर्बन्धो निषिद्धः ॥

आयान्ति यान्ति च परे ऋतवः क्रमेण
संजातमेतदृतुयुग्ममगत्वरं तु ।
वीरेण वीरधवलेन विना जनानां
वर्षा विलोचनयुगे हृदये निदाघः ॥ १ ॥

अथ श्रीमन्त्रिणा वीरधवलस्य सुतो वीसलदेवो राज्येऽभिषिक्तः। श्रीअनुपमदेव्या विपत्तौ तेजःपालारूढशोकग्रन्थावनिवर्त्तमानायां तत्रागतैः श्रीजयसेनसूरिभिर्बलवत्पुरुषैरुपशामितायां विपदि किंञ्चिच्चेतनया सापत्रपः श्रीतेजःपालः सूरिणोचे । वयमस्मिन्नप्यवसरे भवतः कैतवमालोकितुमुपेताः । श्रीवस्तुपालेन किमेतदिति पृष्ठा गुरवः प्राहुः । यदस्माभिः शिशोस्तेजःपालस्योपयामाय धरणिगपार्श्वादनुपमा कन्या याचिता तदा स्थिरता कृता । तदनु तस्याः कन्याया एकान्तविरूपतां निशम्य तत्संबन्ध-

---

१ C जनस्य २ A C D ग्रन्थेऽनिवर्तमाने ३ D आलोकयितुं
४ तत्परिणयननिश्चयता ५ C स्थिरपत्रदानादनु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भङ्गाय चन्द्रप्रभजिनप्रतिष्ठितक्षेत्राधिपतेरष्टौ द्रम्माणां भोगमुपायनीचक्रे । इदानीं तद्वियोगग्रन्थेरामनस्यमित्युभयोर्वृत्तान्तयोः कस्तथ्य इति तन्मूलसंकेताच्छ्रीतेजःपालः स्वहृदयं दृढीचक्रे ॥ अथान्यदावसरे मन्त्री वस्तुपालः पूर्णायुःश्रीशत्रुञ्जयं यियासुरिति मत्वा पुरोधाः सोमेश्वरदेवस्तत्रागतोऽनर्घ्येष्वप्यासनेषु मुच्यमानेष्वनुपविशन् हेतुं पृष्ठ इत्याह ॥

अन्नदानैः पयःपानैर्धर्मस्थानैर्धरातलम् ।
यशसा वस्तुपालेन रुद्धमाकाशमण्डलम् ॥ १ ॥

इति स्थानाभावान्नोपविश्यते इति तदुक्तेरुचितपारितोषिकदानपूर्वं तमापृच्छ्य मन्त्री पथि प्रस्थितः । आकेवालीयाग्रामे देशकुटयां दर्भसंस्तरमारूढो गुरुभिराराधनां कार्यमाण आहारपरिहारपूर्वं पर्यन्ताराधनया प्रध्वंसितकलिमलो युगादिदेवमेवं जपन्

सुकृतं न कृतं किञ्चित्सतां संस्मरणोचितम् ।
मनोरथैकसाराणामेवमेव गतं वयः ॥ १ ॥

इति वाक्यप्रान्ते नमोऽर्हद्भ्य इत्यक्षरैः समं प-

---

१ B भागमपि याचितीचक्रे

२ A च भूतलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रिहतसप्तधातुबद्धं शरीरं स्वकृतफलमुपभोक्तुं स्वर्लोकमलंचकार । तत्संस्कारस्थानेऽनुजश्रीतेजःपालसुतजैत्रसिंहाभ्यां श्रीयुगादिदेवदीक्षावस्थामूर्त्तिनालंकृतस्वर्गारोहणप्रासादोऽकारि ॥

अद्य मे फलवती पितुराशा
मातुराशिषांशीखा ङुरिताद्य ।
यद्युगादिजिनयात्रिकलोकं
प्रीणयाम्यहमशेषमखिन्नः ॥ १ ॥
नृपव्यापारपापेभ्यः सुकृतं स्वीकृतं न यैः ।
तान्धूलिधावकेभ्योपि मन्येऽधमतरान्नरान् ॥ २ ॥

इत्यादीनि श्रीवस्तुपालमहाकवेः काव्यानि स्वयं कृतान्यमूनि ॥

पूर्णः स्वामिगुणैः स वीरधवलो निर्मानं एव प्रभुर्विद्वद्भिः कृतभोजराजबिरुदः श्रीवस्तुपालः कविः ।
तेजःपाल इति प्रधाननिवहेष्वेकश्च मन्त्रीश्वरस्तज्जायानुपमागुणैरनुपमा प्रत्यक्षलक्ष्मीरभूत् ॥ १

॥ इति श्रीमेरुतुङ्गाचार्यविरचिते प्रबन्धचिन्तामणौ श्रीकुमारपालमन्त्रीश्वरवस्तुपालतेजःपालमहापुरुषयशोवर्णनो नाम चतुर्थः प्रकाशः ॥

---

१ आशिः शब्दोऽकारान्तो न तथापि ग्रन्थकृतैव न्यस्तः २ C निःसीमः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ पूर्वोक्तेभ्यो महापुरुषचरितेभ्यो यान्यवशिष्टानि तानि तदितराणि चेह प्रकीर्णकप्रबन्धे प्रारभ्यन्ते ॥ तद्यथा ॥

समीपस्फुरच्छिप्राश्रवन्त्यांमवन्त्यां पुरि पुरा श्रीविक्रमार्कनृपः, सत्रागारे वैदेशिकं लोकं भोजनानन्तरं निद्रापरं संपन्नदीर्घनिद्रंमार्कण्य विस्मयस्मेरमानसस्तद्वृत्तान्तं जिज्ञासुस्तान् सर्वानपि वसनपिहितान्विधाप्य तद्वार्त्तां चापन्हुतां निजाज्ञां विधाय पुनरुपागतानध्वगांस्तथैव भोजयित्वा प्रदोषे चोष्णोदकं तैलं च तेषां चरणपरिचरणनिमित्तमुपनीय तेषु२प्रसुप्तेषु महानिशायां कृपाणपाणिर्नृपतिर्निभृतीभूय स्वयं यावत्तस्थौ तादकस्मात्तत्र कोणैकदेशे प्रथमं तावद्धूमोद्गमं तदनु शिखारेखामथ दीप्रफणारत्नफणालंकृतं सहस्रफणालंकृतसहस्रफणं नागं निर्गतमवलोक्य तच्चित्रचमत्कृतो राजा यावत्साकूतं पश्यति तावत्स फणीन्द्रः किं पात्रमिति तद्दिनसुप्तान् पान्थान् प्रत्येकं प्रपच्छ। अथ ते धर्मपात्रं गुणपात्रं तपःपात्रं रूपपात्रं कामपात्रं कीर्त्तिपात्रमित्यादीनि वदन्तोऽज्ञानतया यदृच्छया तस्य

१ A श्रीवत्यां २ प्राप्तमृत्युं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शापान्मृत्युमश्नुवन्तीति विलोक्याऽथ श्रीविक्रम-
एव तत्पुरोभूय योजिताञ्जलिः ।
भोगीन्द्र बहुधा पात्रं गुणयोगाद्भवेद्भुवि ।
मनःपात्रं तु परमं शुद्धं श्रद्धांपवित्रितम् ॥ १ ॥

अथ निजाशयमेवं भाषमाणं श्रीविक्रमं परितोषाद्वरं वृणीष्वेति प्राह । अथ श्रीविक्रमोऽमून् पथिकानुज्जीवयेति तेन वरे याचिते शेषं विशेषात्परितोषयामास ॥

इति श्रीविक्रमार्कस्य पात्रपरीक्षाप्रबन्धः ॥

अथ कदाचित्पाटलीपुरपत्तनेऽकस्मादमन्दानन्दे नन्दे राज्ञि पञ्चत्वमागते कश्चिद्विप्रस्तत्कालं तदागतः परपुरप्रवेशविद्यया नृपदेहमधितस्थौ । तत्संकेततो द्वितीयो द्विजो नृपद्वारमुपेत्य वेदोद्गारमुदाहरन्प्रत्युज्जीवितो नृपः स कोशाध्यक्षैस्तस्मै स्वर्णलक्षमदापयत् ।अथ तद्वृत्तान्तं विज्ञाय महामात्यो, नन्दः पुरा कदर्योभूत् साम्प्रतं तु तदौदार्यमिति वदंस्तं विप्रं विधृत्य परकायप्रवेशकारिणं वैदेशिकं सर्वत्र शोधयन् क्वापि मृतकं केनापि रक्ष्यमाणमाकर्ण्य चिताप्रवेशाद्वरमीकृत्य पूर्वामिव तं नन्दं निरु-

१ A शुद्धश्रद्धा २ C तत्संकेतात् द्वितीयदिने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पममतिवैभवान्निजप्राज्ये साम्राज्ये निर्वाहयामास॥
इति नन्दप्रबन्धः ॥

अथ खेडं[1]महास्थाने देवादित्यविप्रपुत्री बालकाले विधवा निरूपमरूपपात्रं सुभगाभिधाना प्रधाना प्रातः सूर्यं प्रत्यर्घाञ्जलिं क्षिपन्ती अज्ञाततद्भोगादाधानममूत्कथंचित्तदसमञ्जसं पितृभ्यामवबुध्य मन्दाक्षमुद्रमिति तां प्रति तद्व्याहृत्य स्वपुरुषैर्वलभ्या नगर्या अभ्यासे मुमुचे। तया तत्र प्रसूतः सूनुः क्रमेण वर्द्धमानः सवयोभिः शिशुभिः निःपितृक इति निर्भर्त्स्यमानो मातुः समीपे पितरं पृच्छन् तया न जाने इत्यभिहितस्तज्जन्मवैराग्यान्मुमूर्षोः[4] प्रत्यक्षीभूय सविता सान्त्वनापूर्वं करे कर्करान्[5]समर्प्य भवन्मातुः संपर्ककारिणमर्कं स्वं ज्ञापयन् भवतः पराभवकारिणं प्रत्यऽयं क्षिप्तः शिलारूपो भविष्यतीत्यादिश्य निरपराधस्य कस्यापि क्षिप्तो यदि तवैवाऽनर्थनिबन्धनं ज्ञापयंस्तिरोधत्त। अथेत्यभिभवकारिणः कांश्चिद्व्यापादयन् शिलादित्य इति सान्वयनाम्ना प्रतीतः। तन्नगरराज्ञा तत्परीक्षा-

---

१ C खेडा २ अज्ञातात्तद्योगभोगादाधानमधात् ३ लज्जागोप्यं ४ C मूर्खो मुमूर्षुः ५ C तत्करं कर्करं D तत्करे

यैव तथाकृते तमिलापालं शिलया तया कालधर्म-
मवापय्य स्वयमेव भूपतिरभूत्। तथास सवितृप्रसा-
दीकृतहयेऽधिरूढो नभश्चर इव स्वैरविहारी परा-
क्रमाक्रान्तदिग्वलयश्चिरं राज्यं कुर्वन् जैनमुनि-
संसर्गात्प्रादुर्भूतसम्यक्त्वरत्नः श्रीशत्रुञ्जयस्य महा-
तीर्थस्यामानमहिमानमवगम्य जीर्णोद्धारं चकार॥
कदाचिच्छिलादित्यं सभापतीकृत्य चतुरङ्गसभायां
पराजितेन देशत्यागिनां भाव्यमिति पणबन्धपूर्वं
सिताम्बरसौगतयोर्वादे संजायमाने पराजितान्
सिताम्बरान्स्वविषयात्सर्वान्निर्वास्य श्रीशिलादि-
त्यजामेयममेयगुणं मल्लनामानं क्षुल्लकं तत्र स्थितं
समुपेक्ष्य स्वयं जितकाशिनः श्रीविमलगिरौ श्री-
मूलनायकं श्रीयुगादिदेवं बुद्धरूपेण पूजयन्तो बौ-
द्धा यावद्विजयिनस्तिष्ठन्ति तावत्स मल्लः क्षत्रकुलो-
द्भवत्वात्तस्य वैरस्याविस्मरन् कृतप्रक्रियोजैनद-
र्शनाभावात्तेषामेव संनिधावधीयन्रात्रिन्दिनं त-
ल्लीनचित्तः कदाचिद्ग्रीष्मवासरेषु निशीथकाले नि-
द्रामुद्रितलोचने समस्तनागरिकलोके दिवाभ्यस्तं
शास्त्रं महताभियोगेनानुस्मरन् तत्कालं गगने सं-

१ C देशताडितेन २ C यामेयं भावगेनेयं ३ A जितकासिनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरत्या श्रीभारत्या के मिष्टा इति शब्दं पृष्टः स परितो वक्तारमनवलोक्य वल्ला इति तां प्रति प्रतिवचनं प्रतिपाद्य पुनः षण्मासान्ते तस्मिन्नेवावसरे प्रत्यावृत्तया देव्या केन सहेति भूयोभिहितस्तदा त्वनुस्मृतपूर्ववाक् गुडघृतेनेति प्रत्युत्तरं ददानस्तदवधानचमत्कृतयाभिमतं[1] वरं वृणीष्वेत्यादिष्टः सौगतपराजयाय कमपि प्रमाणग्रन्थं प्रसादीकुरु । इत्यर्थमभ्यर्थयन् नयचक्रग्रन्थार्पणेनानुजगृहे । अथ देवीप्रसादादेवागततत्त्वैः श्रीशिलादित्यमनुज्ञाप्य सौगतमठेषु तृणोदकप्रक्षेपपूर्वं नृपतिसभायां पूर्वोदितपणबन्धपूर्वकं कण्ठपीठावतीर्णश्रीवाग्देवताबलेन श्रीमल्लस्तांस्तरसैव निरुत्तरीचकार । अथ राजाज्ञया सौगतेषु देशाद्गतेषु[3] जैनाचार्येष्वाहूतेषु स मल्लो बौद्धेषु जितेषु तेषु वादीति। तदनु भूपाभ्यर्थितैर्गुरुभिस्तस्मै[4] पारितोषिके सूरिपदं ददे[5] । श्रीमल्लवादिसूरिनामा गणभृत्प्रभावकतया नवाङ्गवृत्तिकारश्रीअभयदेवसूरिभिः प्रकटीकृत-

---

१ A B अनिमित्तं २ C प्रसादतस्तैर्देवावगततत्त्वः
३ C D देशोद्गतेषु C वादिषु ४ A तस्य ५ चक्रे
६ C नवाङ्गवृत्तिकारश्राभयः देवसूरिभिः प्रगटीकृतः श्री-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीस्तम्भनकस्य तीर्थस्य विशेषोन्नत्यै श्रीसङ्घेन चिन्तायिकत्वे[1] नियोजितः ॥ इति मल्लवादिप्रबन्धः॥

अथ मरुमण्डले पल्लीग्रामे काकूपाताकौ[2] भ्रातरौ निवसतस्तयोः कनीयान्धनवान् ज्यायांस्तु तद्गृहभृत्यवृत्त्या वर्त्तते । कस्मिंश्चिन्निशीथसमये दिवसकर्मवृत्तिश्रान्तः प्रावृट्काले काकूः[2] प्रसुप्तः कनीयसाभिदधे । भ्रातः स्वकीयकेदाराः पयःपूरैः स्फुटितसेतवस्तव तु निश्चिन्ततेत्युपालब्धः स तदात्यक्तश्शस्तरः[3] स्वं निन्दन् कुद्दालं स्कन्धे निवेश्य यावत्तत्र याति तावत्कर्मकरान्[4] स्फुटितसेतुबन्धरचनापरान्समालोक्य के यूयमिति पृष्टाः भवद्भ्रातुः कामुकाः[5] इत्यभिहिते क्वापि मदीयाः कामुकाः सन्तीति पृष्टे वलभ्यांसन्तीति ते प्राहुः।अथ सोप्यवसरे सर्वस्वं पिठरे आरोप्य तं मूर्द्धा[6] दधानः श्री वलभीमवाप्य गोपुरसमीपवर्त्तिनामाभीराणां समीपेऽवसत्[7]। अत्यन्तकृशतया ते रङ्क इति दत्ताभिधानस्तार्णमुटजं विधाय तदवष्टम्भेन यावत्तस्थौ

---

१ A B श्रीमल्लेन चिन्तायिकत्वं २ A D काकूआकः ३ शय्या ४ कर्मकराः ५ B अथ स पिठरे सर्वस्वमारोपितं मूर्द्धा ६ C सन्निधौ निवसन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावत्कश्चित्कार्पटिकः कल्पपुस्तकप्रमाणेनं रैवतकशैलादलाबुना सिद्धरसमादाय मार्गमतिक्रामन् काकूयतुम्बडीत्यशरीरिणीं वाणीमाकर्ण्य विस्मयस्मेरमना जातभीर्वलभीपरिसरे तस्य छद्मनो वणिजः सद्मनि रङ्क इति तन्नामतो निशङ्कतया तत्सरसमलाबु तत्रोपनिधीचक्रे। स स्वयं श्रीसोमेश्वरयात्रायां गतः। कस्मिन्नपि पर्वणि पाकविशेषाय चुल्हीनियोजितायां तापिकायांमलाबुरन्ध्राद्गलितरसबिन्दुना हिरण्मयीं तां निभाल्य स वणिग् तं सिद्धरसं चेतसा निर्णीय तदलाबुसहितगृहसर्वस्वमन्यत्र नियोज्य स्वगृहं प्रदीपकेन भस्मीकृत्य परस्मिन्गोपुरे सौधं निर्माप्य तत्र निवसन्, कदाचित्प्राज्याज्यविक्रयकारिण्याः स स्वयं घृतं तोलयंस्तदक्षयं निरीक्ष्य घृतपात्राधः कृष्णचित्रककुण्डलिकां विमृश्य केनापि कैतवेन तद्द्रव्यव्ययादपहृत्य चित्रकासिद्धिं स्वीचकार। कदाचित्तस्यागण्यपुण्यवैभववशात्सुवर्णपुरुषसिद्धिरजायत। इत्थं त्रिविधसिद्धया कोटिसंख्याभिधानानि धनानि

---

१ रसानयशास्त्रोक्तरीत्या २ C काकतुम्बडीति सिद्धरसात्
३ तपेलीति भाषायाम् C ४ कारिणा-५ अक्षीणं ६ A कुण्डलियां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संगृह्यापि कदर्यवर्यतया क्वापि सत्पात्रे तीर्थे वानुकम्पया वा तस्याः श्रियो न्यासो दूरे तिष्ठतु प्रत्युत सकललोकसंजिहीर्षया तां लक्ष्मीं सकलस्य विश्वस्य कालरात्रिरूपामदर्शयत्। अथ स्वसुताया रत्नखचितकङ्कतिकाया, राज्ञा स्वसुतायाः कृते प्रसभमपहृतायास्तद्विरोधानुरोधात्स्वयं म्लेच्छमण्डले गत्वा वलभीभङ्गाय तद्याचितकाश्चनकोटीरस्मै[2] समर्प्य प्रयाणमचीकरत्। तदनुपकृतस्तु एकः छत्रधरः निशाशेषे सुप्तजाग्रदवस्थेऽवनीपतौ[3] पूर्वसंकेतितेन केनापि पुंसा सममित्यालापमकरोत्। अस्मत्स्वामिनां मन्त्रेऽमूर्खः कोपि नहि[4] यदयमश्वपतिमहीमहेन्द्रः केनाप्यज्ञातकुलशीलेनासाधुना साधुना वापि वणिजा नामकर्मभ्यां रङ्केन प्रेरितः सूर्यपुत्रं शिलादित्यं प्रति यश्चचालेति पथ्यां तथ्यां तद्वाचमाकर्ण्य किञ्चिच्चेतसि विचिन्तयन् तस्मिन्नहनि नृपः प्रयाणविलम्बमकरोत्। अ-

---

१ C कङ्कतिकायां स्वसुताकृते प्रसभमुपहृतायां २ D तद्याचिताः काश्चनकोटीस्तस्य नवकोटीरस्य ३ A एकच्छत्रधरो ४ C निशासौधे सुप्तजाग्रदवस्थे पृथिवीपतौ ४ B D मूषकोपि नहि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थ रङ्कः साशङ्कस्तद्वृत्तान्तं निपुणवृत्त्यावगम्य काञ्च-
नदानेन तस्य काञ्चन तृप्तिमासूत्र्य पुनः परस्मि-
न्प्रत्यूषे विचार्याविचार्य वा कृतप्रयाणोयं महान-
रेन्द्रश्चालितः।सिंहस्यैकपदं यथेति न्यायाच्चलित एव
राजते ॥ यतः ॥

मृगेन्द्रं वा मृगारिं वा हरिं व्याहरतां जनैः ।
तस्य चोभयथा व्रीडा लीलादलितदन्तिनः ॥१॥

इत्यस्य स्वामिनो निःसीमपराक्रमस्य सन्मुखे
कः स्थास्यातीति तद्गिरा प्रोत्साहवान् म्लेच्छप-
तिर्भेरीनिनादबधिरितरोदःकन्दरं प्रयाणमकरोत् ।
इतश्च तस्मिन्वासरे वलभ्यां श्रीचन्द्रप्रभबिम्बमम्बा-
क्षेत्रपालाभ्यां सहितमधिष्ठातृबलाद्गगनमार्गेण शि-
वपत्तनभुवि भूषणबिभूव । रथाधिरूढा श्रीव-
र्द्धमानप्रतिमा चादृष्टवृत्त्याधिष्ठातृबलेन संचरन्ती-
आश्विनपूर्णिमायां श्रीमालपुरमलंचकार । अ-
न्या अपि सातिशया देवमूर्त्तयो यथोचितं भृभाग-
मलंचक्रुः । तत्पुर्देवतया चै श्रीवर्द्धमानसूरीणां
चोत्पातज्ञापनावसरे ॥

१B D जनाः २ चकारात्स्वज्ञानेन ज्ञातमपि तथैवान्यैर्मुनिभिर-
पीति द्वितीयचार्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

का त्वं सुन्दरि जल्प देविसदृशी[1] किं कारणं रोदिषि
भङ्गं श्रीवलभीपुरस्य भगवन् पश्याम्यहं प्रत्ययम्[2]।
भिक्षायां रुधिरं भविष्यति पयो लब्धं भवेत्साधुभिः
स्थातव्यं मुनिभिस्तदेव रुधिरं यस्मिन्पयो जायते १

एवमुत्पातेषु संजायमानेषु पुरीपरिसरप्रान्तेषु म्लेच्छसैन्येषु देशभङ्गसमासादितपङ्केन रङ्केन पञ्चशब्दवादकान्कनकवितरणैर्बहुधा विभेद्य[3] तस्य हयस्यारोहणकाल एव तैः क्रियमाणे प्रतिशब्दसंराविणे तार्क्ष्यवदुड्डीय तस्मिन्स्तार्क्ष्यं "दिवमुत्पतन्ति किंकर्तव्यतामूढः स शिलादित्यस्तैर्निजघ्ने। तदनु तैर्लीलयैव वलभीभङ्गः सूत्रितः॥

"पणसयरीवासाइं[4] तिन्निसयाइं अइक्कमे ऊण।
विक्कमकालाउ तउ वलहीभङ्गो समुप्पन्नो॥ १॥

---

१ C D देवसदृशे २ A प्रत्ययः ३ D विद्रोध्य ४ अत्रे ५ A वाससयं

---

*पञ्चसप्ततिवर्षाणि त्रिशतानि अतिक्रमे तु।
विक्रमकालात् वलभीभङ्गः समुत्पन्नः
क. सत्यपुरकल्पे प. ३७ तु

तेण सन्नेण विक्कमाउ अठाहिं सएहिं पणयालेहिं वरिसाणं गएहिं अइऊण सो राया मारिउ। तउ सट्ठाणं हम्मीरो। तउ अन्नो ग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति श्रीशिलादित्यराज्ञ उत्पत्तिस्तथा रङ्कोत्पत्तिस्तत्कृतो वलभीभङ्गश्चेति प्रबन्धत्रयम् ॥

अथ श्रीरत्नमालनगरे श्रीरत्नशेखरो नाम राजा सकदाचिद्दिग्यात्रायाः प्रत्यावृत्तः पुरप्रवेशमहोत्सवे विपणिश्रेणिं शृङ्गारितां मृगयमाणः कस्मिन्नपि हट्टे काष्ठपात्रीयुतं कुद्दालमालोक्य सौधप्रवेशानन्तरं प्राभृतपाणौ महाजने समायाते सुखिनो यूयमिति नृपालापानन्तरं तैर्न सुखिनो वयमिति विज्ञप्ते विभ्रमभ्रान्तस्तावद्विसृज्यं कस्मिन्नपि निर्जनावसरे पुरप्रधानानाहूय किं न सुखिनो यूयमिति पृष्टे अपि च काष्टपात्रीयुतकुद्दालस्योर्ध्वीकरणकारणमनुयुक्तास्ते इति विज्ञपयामासुः ।

यत्र स्वामिना काष्टपात्र्यामेकमेवमवधारितं, स वित्तेश्वरः स्ववित्तसंख्यामजानन् काष्टपात्रिकैः स्ववि-

---

ज्जणवई गुज्जरं भञ्जित्ता तवो वलन्तो पत्तो सच्चउरे

[तेन सैन्येन विक्रमात् अष्टाभिः शतैः पञ्चाशद्भिः वर्षाणां गतैः [वलभीं] भङ्क्त्वा स राजा मारितः गतः स्वस्थानं हम्मीरः । ततोऽन्यः गज्जणपतिः गूर्जरं भङ्क्त्वा ततो वलन् प्राप्तः सत्यपुरे]

---

१ D व्यवहारिकाकूत्पत्तिः २ C समाप्तिमफणीत् ३ तान् विसृज्य ४ A अर्च्यजनावसाने ५ B D पात्र्यादिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सकलनां ज्ञापयितुं संकेतश्चक्रे। तथा च न सुखिनो वयमितिस्वामिनः संतानाभावात्।कोटीध्वजकुलाकुलं नगरमिदं स्वामिना चिरकाललालितमन्वयाभावात्केन परांकोटींनीयत इति "पुरातनस्यान्तःपुरस्य वन्ध्यत्वं बुद्धया निधाय नृपवंशवृद्धये नौतनमन्तःपुरं[1] चिकीर्षवः " स्वामिनोनुमत्या पुष्पार्कदिने केनापि प्रधानशाकुनिकेन समं शकुनागारं प्राप्ताः । कामपि दुर्गतनितम्बिनीमासन्नप्रसवां काष्ठभारवाहनैकवृत्तिं शिरोधिरूढदुर्गामालोक्य शकुनवित्तामक्षतादिभिः पुनरभ्यर्चयन्[2], तैः किमेतदिति पृष्टे प्राह । यः कश्चिदाधाने पुत्रः स एवात्र नृपो भावी चेद्बृहस्यतिमतं प्रमाणमित्यसंभाव्यं वृत्तान्तमनुमन्यमानाः मानोन्नतये नृपाय व्याघुटय यथावस्थितं तत्स्वरूपं निवेदितवन्तः । अथ खेदमेदुरमना नृप आप्तपुरुषैस्तां गर्त्तापूरीकर्तुं प्रारभ्यमाणामिष्टं दैवतं स्मरेत्यभिहिते सा मरणभयव्याकुला प्रदोषकाले यावत्ताननुज्ञाप्य शङ्काभङ्गं[3] कुरुते तावत्साऽप्रसूत पुत्रं। तं तत्र परित्यज्य पुनरुपागतां गर्त्तापूरीकृत्य पुनरपि राज्ञे विज्ञपयांचक्रुः । अथ काचि-

१ A नौतनं पुरं २ A C अभ्यर्चयत ३ [मलमूत्रत्यागं]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्मृगी संध्याद्वयेपि पयःपानं कारयन्ती तमनुदिनं वृद्धिमन्तं कारयामास। तस्मिन्नवसरे देव्या महालक्ष्म्याः पुरतः ढङ्कशालायां[1] हरिण्याश्चतुर्णां पादानामधः शिशुरूपं नाणकं नूतनं संजायमानमाकर्ण्य क्वचिन्नवीनो नृप उत्पन्न इति प्रसृतवार्त्तया श्रीरत्नशेखरः सैन्यानि प्रतिदिशं तं शिशुं विशासितुं प्राहिणोत्। तैर्यत्र तत्रावलोक्य लब्धोपि बालहत्याभीतैः स सायं पुरगोपुरे गोकुलखुररवैर्यथायं बालो विपन्नः सन्स्वयमपवादाय न भवतीति दूरस्थैः स्तैर्यावन्मुक्तस्तावत्तत्रायातं गोकुलं तं मूर्त्तिमन्तं पुण्यपुञ्जमिव बालमालोक्य तैरेव पदैः स्तम्भितमिव तस्थौ। अथ पाश्चात्यपक्षात्पुरोभूय वृषभो वृषभासुरं[2] तं शिशुं पदानामन्तराले निधाय गोधनं सकलमपि प्रेरयामास। अथ तं वृत्तान्तं नृपोऽवधार्य तैः समं तमपरेतं लोकैर्विज्ञप्तश्च[3] तं बालमानीय पुत्रीयमाणः श्रीपुञ्ज इति दत्ताभिधानः प्रवर्द्धयामास। अथ श्रीरत्नशेखरे राज्ञि दिवं गते तस्य राज्ञः कृताभिषेकस्य साम्राज्यं पालयतः

---

१ C ढङ्कशालायाः २ वृषेण पूर्वपुण्येन देदीप्यमानं। वृषः कामदेवस्तद्वद्भासुरं ३ B सामन्तनगरलोकः

पुत्री समजनि सा च संपूर्णसर्वाङ्गावयवसुन्दरापि कपिमुखी तेन वैराग्येण विषयविमुखतां बिभ्राणा श्रीमातेति नामधेयं बभार। सा कदाचिज्जातजातिस्मृतिः पितुरग्रे स्वं पूर्वभवं निवेदितवती, यदहमर्बुदाद्रौ पुरा कपिपत्नीत्वमनुभवन्ती कस्यापि शाखिन एकस्याः शाखायाः शाखान्तरं संचरन्ती केनापि तदतुल्येन शिल्पेन विद्धतालुः पञ्चत्वमासदत्। तदधोवर्त्तिनि कामिततीर्थकुण्डे यावद्गलितं[1] वपुः पपात तावत्तीर्थातिशयान्मामकं वपुर्मानुषाकारमभवत् यन्मस्तकं तु तत्तथैवास्ते तेनाहं कपिवदना। अथ श्रीपुञ्जनृपस्तस्यास्तन्मस्तकं कुण्डे क्षेपयितुं निजान्पुरुषान्[2]समादिदेश। तैस्तु सुचिरात्तत्तदवस्थं विलोक्य तथाकृते सा श्रीमाता मानवानना समजनि। ततःप्रभृति सा मातरपितरावनुज्ञाप्याऽर्बुदसंख्यगुणा तस्मिन्नेवाऽर्बुदे तपस्यन्ती, कदाचिद्गगनगामिना योगिना ददृशे। स च तत्सौन्दर्यापहृतहृदयो गगनादुत्तीर्य प्रेमालापपूर्वकं त्वं मां कथं न वृणोषीति पप्रच्छ। सेत्यवादीत्। साम्प्रतं तावत्क्षणदायाः प्रथमयामो व्य-

१ A गलित्वा २ A B आप्तपुरुषान् ३ C तत्र तदवस्थं ४ A दृष्टा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीतस्तूर्ययामस्य ताम्रचूडेषु रुतमकुर्वाणेषु यद्यस्मिन्नगे कयाचिद्विद्यया द्वादश पद्याः[1] कारयसि ततो भवन्तमभीष्टं करोमीति तदुक्तिसमनन्तरमेव तत्र कर्मणि चेटकपटकं नियोज्य यामद्वयेन निर्मापिते सर्वपद्यानिवहे श्रीमाता स्वशक्तिवैभवेन कृतकं ताम्रचूडारवं कारयन्ती तेनागत्य विवाहाय सज्जीभवेत्यभिदधे ।तव पद्याया निष्पाद्यमानायाः कुक्कुटरवः समजनिष्टेति तयोक्ते भवन्मायया कृतकं कृकवाकुरवं को न वेत्तीत्युत्तरं ददानः सरित्तीरे तज्जाम्योपढौकितविवाहोपहारः, श्रीमात्रा समस्तविद्यामूलं तत्त्रिशूलमिहैव विहाय पाणिपीडनाय सन्निहितो भवेत्याहूय, प्रेमोपहृतचित्ततया तत्तथा कृत्वा सामीप्यमुपागतः तत्पदयोः कृतकान् शुनो नियोज्य हृदये तेन त्रिशूलेनाहत्य मारितः । इत्थं निःसीमशीललीलायितेन स्वजन्मातिवाहितवती। तस्यामखण्डशीलायां व्यतीतायां[2] श्रीपुञ्जराजा तत्र शिखरबन्धरहितं प्रासादमकारयत् । यतः षण्मासान्ते तस्य गिरेरधोभागवर्त्ती अर्बुदनामा नागो यदा चलति तदा पर्वतकम्पो भवति । अतः शि-

१ B पद्यां द्वद्यां [२ मृतायाम्

खररहितास्तत्र सर्वेपि प्रासादाः ।
इति श्रीपुञ्जराजा तत्पुत्रीश्रीमाता तत्प्रबन्धः ॥१॥

कदाचिच्चौडदेशे गोवर्द्धनो नाम राजाभूत् तदा-यःस्तम्भे निबद्धो[2] सभामण्डपपुरतो न्यायिना हन्य-माना न्यायघण्टा निनदति । अन्यदा तस्यैकसूनोः कुमारेण रथारूढेन पथि संचरता ज्ञानवृत्त्या काश्चि-द्वत्सतरो व्यापादितस्तन्माता सौरभेयी नयना-भ्यामजस्रमश्रूणि वर्षन्ती स्वपराभवप्रतीकाराय शृङ्गाग्रेण न्यायघण्टामवीवदत्तद्घण्टाटङ्कारं नृपो नि-शम्यार्जुनकीर्त्तिस्तमर्जुनी[3]वृत्तान्तं मूलतोवगम्य नि-जं न्यायं परां कोटिमारोपयितुं प्रातः स्वयं स्यन्दने निवेश्य प्रियपुत्रोपि तमेकमेव पुत्रं पथि नियोज्य तदुपरि तां धेनुं साक्षात्कृत्य रथं भ्रामयामास । तस्य भूभुजः सत्वेन तस्य सुतस्य भूयसा भाग्य-वैभवेन रथस्य रथाङ्गे समुद्धृते स कुमारो न वि-पन्नः । इति गोवर्द्धननृपप्रबन्धः ॥

अथ कान्त्यां पुरि पुरा पुराणनृपतिश्चिरं राज्यं निर्गर्वः कुर्वन्कदाचिन्मतिसागराभिधानेन प्रियसु-

---

१ B चोड २ C स्तम्भनिबद्धा ३ अर्जुन इव कीर्त्तिर्यस्येति । अर्जुन्याः सकृद्वत्साया धेनोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हृदा महामात्येनाऽनुगम्यमानो राजपाटिकायां व्रजन्विपर्यस्तध्वस्तेन[1] तुरङ्गेण नृपेऽपह्रियमाणे चतुरङ्गचमूचक्रे क्रमेण दवीयसि संजायमानेष्यतिजवे जवनेऽधिरूढःतदानुपादिकः "कियत्यपि भूभागे उल्लङ्घिते सति मार्गोल्लङ्घनपरिश्रमादत्यन्तसुकुमारतया[2] रुधिरपूरितत्वाद्विपन्ने नृपतौ" कृतानन्तरकृत्यस्तुरङ्गमं तद्वेषं च सहादाय प्रदोषसमये पुरं प्रविशन् राज्यस्यानुसंधानचिकीः श्रीमालभूपालभयात्कमपि नृपतेः सवयसं सरूपं च कुलालमालोक्य तं तद्वेषार्पणपूर्वकं तुरगेधिरोप्य सौधप्रवेशानन्तरं देव्यै तं व्यतिकरं निवेद्य सचिवेन पुण्यसार इति नाम विधाय स एव नृपतीचक्रे। इत्थं कियत्यपि गते काले स सचिवश्चमूसमूहवृतः प्रतिनृपतिं प्रति प्रतिष्ठासुः स्वप्रतिहस्तकप्रायं कमपि प्रधानपुरुषं नृपतिसेवाकृते निवेद्य स्वयं देशान्तरविहारमकरोत्। अथ स पृथिवीपतिर्निरङ्कुशो वेश्यापतिरिव[3] स्वैरविहारी तदनन्तरं पुरकुम्भकारान्समस्तानाहूय मृन्मयान् हयान् करिकलभकरभादींश्च निर्माय

---

१ B C विपर्यरतायस्तेन २ C सीमाल. ३ B वेशापतिरिव

तैः समं चिरं चिक्रीड । एवं स्थिते समस्तराजलोकस्यावहेलनां नृपतेर्निशम्य ततः स्कन्धावारावारात् सचिवोल्यपरिच्छदो नृपमुपेत्येत्यवादीत् । यस्त्वामिदानीमेव विस्मृतकारुभावः स्वभावचलाचलतया[1] यदि कामपि मर्यादां न मन्यसे तदा त्वां निर्विषयीकृत्य कमप्यपरं कुलालबालं भूपालं करिष्यामीति तदुक्तिक्रुद्धः स नृपः सभायामुपांशुभूमौ कोत्र भोः, इति व्याहृतिसमनन्तरमेव सज्जीभूतैश्चित्रपदातिभिः स सचिवः संदानितः । तदसंभाव्यं महदाश्चर्यं विमृश्य तत्प्रभुप्रभावाविर्भावचमत्कृतचित्तस्तत्पदयोर्निपत्य स्वं मोचयितुमत्यर्थं सभ्यर्थयन् नृपेण तथा कारिते स सभक्तिकं विज्ञापयामास। भवतः साम्राज्यदाने निमित्तमात्रोहं तव प्रभावादालेख्यरूपाणि सचेतनीभूयेत्थं निदेशवशंवदानि भवन्ति तत्र प्राक्कृतान्येव[2] कर्माणि कारणमत एव भवान्पुण्यसार इति सान्वयनामा ॥

इति पुण्यसारप्रबन्धः ॥

अथ पुरा कुसुमपुरे[3] नन्दिवर्द्धननामा राजकु-

---

१ B बलाबलतया २ C प्राक्तनानि ३ पाटलीपुत्रनगरेऽत्र चन्द्रनृपः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मारः छत्रधरेण समं देशान्तरविलोकनकुतकी पितरावनापृच्छ्य यदृच्छया गच्छन् प्रत्यूषकाले क्वापि पुरे प्राप्तस्तत्राऽपुत्रिणि नृपतौ पञ्चत्वमुपागते सति सचिवैरभिषिक्तपट्टहस्ती निखिलेपि नगरे यदृच्छया बभ्रांम[1]। तत्रागतनृपकुमारमासन्नमपि दुःस्वप्नमिव विस्मृत्य परं छत्रधरमभ्यषिञ्चत्। स च तत्प्रधानैर्महता महोत्सवेन पुरं प्रवेश्यमानो राजा कुमारमपि तयैव महत्या प्रतिपत्त्या सह गहीत्वा सौधं गतः। अहं राजलोकस्वामी त्वं तु ममेत्युचितैरुपचारवचनैस्तमन्तरिमेवमाराधं[2]। स तु राजा राजगुणानामनर्हो निरवधिदुर्मेधा वर्णाश्रमपालनानभिज्ञो[3] यथा२ प्रजापीडनपरः साम्राज्यं कुरुते तथा तथा पशुपतिमूर्द्धा विधूतँराजेवँ स कुमारः प्रतिदिनं हीयते। कस्मिन्नप्यवसरे तं तथास्थितं कुमारं स नृपतिस्तत्तनुताहेतुं पृच्छन् दुर्मेधतया प्रजाः पीडयसि तेनात्यन्तमनौचित्येन कृशतामावहामि।

---

१ भ्रामं भ्रामं ससंभ्रमं २ B एव रुरोध ३ C पालनपरिश्रमानभिज्ञः ४ निभृत. ५ [चन्द्रइव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वासो जडाण मज्झे दोजीहा सामिसवणपडिलग्गा।
जीविज्जइ तं[1] लाहो झीणित्ते विम्हउं[2] कीस ॥ १॥

इति मया गाथार्थः सत्यापितोस्तीति वद्वचनानन्तरं यदस्याः प्रजायाः पापनिरताया अपुण्योदयेनावश्यंभाविपीडनावसरेऽहं नृपतीकृतः। यदि प्रजायाः परिपालनां लोकेशोऽभ्यलिखिष्यत्तदा भवत एव पट्टहस्ती पट्टाभिषेकमकरिष्यादिति तदुक्तियुक्तिभ्यां भेषजाभ्यामिव निगृहीतरुक् स कुमारो वपुःपीवरतां बभार ॥ इति कर्मसारप्रबन्धः ॥

अथ गौडदेशे लक्षणावत्यां नगर्यां श्रीलक्ष्मणसेनो नाम नृपतिरुमापतिधरसचिवेन सर्वबुद्धिनिधिना चिन्त्यमानराज्यश्रिरं राज्यं चकार। स त्वनेकमत्तमातङ्गसैन्यसङ्गादिव मदान्धतां दधानो मातङ्गीसङ्गपङ्ककलङ्कभाजनमजनि। उमापतिधरस्तु तद्व्यतिकरमवगम्य प्रकृतिक्रूरतया च स्वामिनोऽनालोकनीयतां च विचिन्त्य प्रकारान्तरेण तं बो-

*वासो जडानां मध्ये द्विजिव्हाः स्वामिश्रवणप्रतिलग्नाः।
जीव्यते यत्तत् लाभः क्षीणत्वे विस्मयः कीदृशः ॥

१ A भवण. २ C जीविजइ जइ ३ C हाणन्ते विम्हिउ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धयितुं सभामण्डपस्य भारपट्टे गुप्तवृत्त्यामूनि काव्यानि लिलेख ॥

शौत्यं नाम गुणस्तवैव तदनु स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां व्रजन्त्यशुचयः स्पर्शात्तवैवापरे ।
किं चातः परमस्ति ते स्तुतिपदं त्वं जीवितं देहिनां
त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां निरोद्धुं क्षमः १
त्वं चेत्संचरसे वृषेण लघुता का नाम दिग्दन्तिनां
व्यालैः कङ्कणभूषणानि तनुषे हानिर्न हेम्नामपि ।
मूर्द्धन्यं कुरुषे जडांशुमयशः किं नाम लोकत्रयी-
दीपस्याम्बुजबान्धवस्य जगतामीशोसि किं ब्रूमहे २
छिन्नं ब्रह्मशिरो यदि प्रथयति प्रेतेषु सख्यं यदि
क्षीवः क्रीडति मातृभिर्यदि रतिं धत्ते श्मशाने यदि ।
सृष्ट्वा संहरति प्रजाः[2] यदि तथाप्याधायँ[3] भक्त्या मनस्तं सेवे करवाणि किं त्रिजगती शून्या स एवेश्वरः३
एतस्मिन्महति प्रदोषसमये राजा त्वमेकस्ततो
लक्ष्मीमम्बुरुहांपिधाय कुमुदे किं नो तनोषि श्रियः।
यद्ब्राह्मी स्थितिरत्र यच्च सुमनःश्रेणीषु संभावना
त्वं तावत्कतमोसि तत्तिरयितुं[5] धातापि नैव क्षमः ४

१ A भवन्ति २ A B प्रजां ३ C आदाय ४ D तथैव
५ A तिरयितुं [निर्द्धारयितुं आच्छादयितुं वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सद्वृत्तसद्गुणमहार्हमनर्घ्यमूल्य[1]-
कान्ताघनस्तननतटोचितचारुमूर्त्ते ।
आः पामरीकठिनकण्ठविलग्नभग्न
हा हार हारितमहो भवता गुणित्वम् ॥ ५ ॥

कस्मिन्नप्यवसरप्रस्तावे[2] तानि वीक्ष्य तदर्थमवगम्य तस्मिन्नन्तर्द्वेषं दधौ । यतः ।

प्रायः सन्ति प्रकोपाय सन्मार्गस्योपदेशनम् ।
विलूननासिकस्येव यद्वदादर्शदर्शनम् ॥ १ ॥

इति न्यायात्सामर्षतया तं पदभ्रष्टं चकार । अथ स नृपतिः कदाचिद्राजपाटिकायाः[3] प्रत्यावृत्तो दुरवस्थमेकाकिनमुपायविधुरं तं वीक्ष्य क्रोधाद्वधाय हस्तिपकेन हस्तिनं प्रेरयामास । स तु निषादिनं प्रति प्राह । यावदहं राज्ञोऽग्रे किञ्चिद्वच्मि तावज्जवान्निवार्यतां गजः । तद्वचनात्तेन तथा कृते उमापतिधरः प्राह ॥

नग्नस्तिष्ठति धूलिधूसरवपुर्गोष्ठ्यष्टिमारोहति
व्यालैः क्रीडति नृत्यति स्रवदसृग्चर्मोद्वहन्[4] दन्तिनः

---

१ A महर्घ्य. B महार्घ्य. २ AC सर्वावसरप्रस्तावे
३ C राज्यजयपाटिकायाः ४ A उद्वहद्दन्तिनाम्

आचाराद्बहिरेवमादिचरितैराबद्धरागा हरे[1]
सन्तो नोपदिशन्ति यस्य गुरवस्तस्येदमाचेष्टितम् १

इति तद्विज्ञानाङ्कुशेन वशंवदमनोगजो निजचरित्रैकवित्[2]सानुशयः स्वममन्दं निन्दंस्तद्व्यसनं शनैर्निषिध्य तं राजा पुनरेव प्रधानीचकार ॥

इति लक्ष्मसेनोमापतिधरयोः प्रबन्धः ॥

अथ काशीनगर्यां जयचन्द्र इति नृपः प्राज्यसाम्राज्यलक्ष्मीं पालयन्पङ्गुरिति बिरुदं बभार । यतो यमुनागङ्गायष्टियुगावलम्बनमन्तरेण चमूसमूहव्याकुलिततया क्वापि गन्तुं न प्रभवति । कस्मिन्नप्यवसरे तत्र वास्तव्यस्य कस्यापि शालापतेः पत्नी सूहवनाम्नी सौन्दर्यनिर्जितजगत्त्रयस्त्रैणा भीष्मग्रीष्मर्तौ जलकेलिं विधाय सुरसरित्तीरे तस्थुषी सा खञ्जनाक्षी व्यालमौलिस्थितं खञ्जनं वीक्ष्य तमसंभाव्यं शकुनं कस्यापि द्विजन्मनः स्नातुमायातस्य पदोर्निपत्य तद्विचारं पप्रच्छ । स निमित्तवित् चेन्मदादेशं सदैव तनुषे तदा तव विचारमहं निवेदयामीति तेनोक्ता तव पितृनिर्विशेषस्य सा मान्या मयाज्ञा, सदैव मूर्ध्ना तां वहामीति

---

१ A B रागो हरः २ C चारित्रे किञ्चित्

प्रतिज्ञापरायास्तस्याः सप्तमेऽहनि त्वमस्य नृपतेरग्रमहिषी भविष्यसीति आदिश्य द्वावपि यथागतं जग्मतुः॥ अथ निमित्तविदा निर्णीते वासरे स राजा राजपाटिकायाः प्रत्यावृत्तः क्वापि रथ्यायां नेपथ्यविहीनामपि अगण्यलावण्यपुण्याङ्गीं तां शालापतिबालां विलोक्य स्वचित्तसर्वस्वचौरीमूरीकृत्याग्रमहिषीं चकार। तदनु तया कृतज्ञतया विप्रप्रतिज्ञां स्मरन्त्या नृपाय तस्मिन् विद्याधरनिमित्ते विज्ञप्ते पटहप्रणादपूर्वं तस्मिन् विद्याधरे आह्वयमाने विद्याधराभिधानानां द्विजानां सप्तशतीमागतां विलोक्य तमेकमुपलक्षितं पृथक् कृत्वा शेषेषु यथोचितं सत्कृत्य विसृष्टेषु नृपतिर्यथेप्सितं प्रार्थयेति विद्याधरं विपद्विधुरं प्राह। राजादेशप्रमुदितेन तेनाङ्गसेवा सदैवास्तु इति प्रार्थिते नृपतिना तथेति प्रतिपन्ने तस्य निरवधिचातुर्यं पर्यालोच्य सर्वाधिकारभारे धुरंधरो व्यधायि। स च क्रमेण संपन्नसंपन् निजद्वात्रिंशदवरोधपुरध्रीणामनुवासरं जात्यकर्पूरपूराभरणानि कारयन् प्राच्यानि निर्माल्यानीत्यवकरकूपिकायां त्याजयन् साक्षादैवतावतार इव

१ A सर्वस्वं चौरीकृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिव्यभोगान् भुञ्जानोऽष्टादशसहस्राणां[1] ब्राह्मणानामभिलषिताभ्यवहारदानादनु स्वयमश्नाति ॥ अथ कदाचित् नृपतिना वैदेशिकभूपतिमभिषेणयितुं चतुर्दशविद्याधरोपि प्रेषितो देशाद्देशान्तराण्यवगाहमानः क्वचिदिन्धनविहीने देशे विहितावासस्तेषां विप्राणां पाककाले सूपकाराणां तैलाभ्यक्तवस्त्रदुकूलान्येवेन्धनीकुर्वन् तान्विप्रान् रूढयैव भोजयामास। अथ प्रतिरिपुं निर्जित्य जितकाशितया व्यावृत्य प्राप्तनिजपुरीपरीसरः पिण्याकाभिलाषात् दुकूलज्वालनेन कुपितं भूपतिमवगम्य स्वं गृहमर्थिभिर्लुण्ठाप्य तीर्थोपासनवासनया संचरन् आनुपदिकेन नृपतिनानुनीयमानो मानोन्नततया नृपतेराशये स्वाभिलाषसंभवं निवेद्य कथंकथंचिदाष्टछय निजमवसानमसाधयत्। तदनन्तरं सूहवदेव्या[2] निजाङ्गजस्य कृते युवराजपदवीं याचितो नृपः संगृहिणीपुत्रा[3]यास्मद्देशराज्यं न युज्यते इति बोधिता तं पतिं जिघांसुः म्लेच्छानाहूतवती ॥ अथ स्थानपुरुषाणां समायातविज्ञप्तिकया तं व्यतिकरमवधार्य लब्धप[4]-

---

१ A जड्घासहस्राणां. २ C संख्यासहस्राणां ३ (भोगार्थं रक्षिता वेश्यादिस्त्री संगृहिणी. ४ पद्मावतीनाम्नी देवी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रावतीवरप्रसादं सादरं कमपि दिग्वाससं निमित्तं पृष्टवान् स पद्मावत्याः सप्रत्ययं म्लेच्छागमनिषेधरूपसमादेशं नृपतेर्विज्ञप्तवान् ॥ अथ कियद्दिनानां प्रान्ते तान् संनिहितानाकर्ण्य स आशाम्बरः किमेतादिति पृष्टस्तस्यामेव निशि नृपतिप्रत्यक्षं पद्मावत्याः पुरो होममारभत ॥ अथ निरवद्याकृष्टिविद्यया होमकुण्डज्वालामालान्तरिता प्रत्यक्षीभूय श्रीपद्मावती तुरुष्कागमनिषेधमुक्तवती ॥ अथ सामर्षः क्षपणकस्तां[1] कर्णयोर्धृत्वा क्रोधानुबन्धात्तेषु संनिहितेषु किं भवत्यपि वितथं ब्रूते इति तेनोपालम्भिता सती सैवमवादीत्। त्वं यां पद्मावतीमतीव भक्त्या पृच्छसि सास्मत्प्रतापबलात्पलायांचक्रे। अहं तु म्लेच्छगोत्रजं दैवतं मिथ्याभाषणेन लोकं विश्वास्य म्लेच्छैर्विश्वासं कारयामीत्युदीर्य तस्यां तिरोहितायां म्लेच्छसैन्येन प्रातर्वाराणसीं वेष्टितां चेष्टया जानन् तद्धनुर्ध्वानैश्चतुर्दशशतीमितनिःस्वानयुग्मनिस्वनेऽपहृते बले सति प्रबलम्लेच्छकुलव्याकुलीकृतमनास्तं सूहवदेव्या अङ्गजं निजे गजे नियोज्य जान्हवीजले सगजो ममज्ज ॥ इति जयचन्द्रप्रबन्धः ॥

---

१ क्षपणको भिक्षुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ जगद्देवनामा क्षत्रियः त्रिविधामपि वीर-रकोटिरतां बिभ्रत्, श्रीसिद्धचक्रवर्त्तिनां सन्मान्योपि[2] तद्गुणमन्त्रवशीकृतेन नृपतिना परमार्हिश्रीपरमर्द्दिनाहूतः सोपरोधं पृथ्वीपुरन्ध्रीकुन्तलकलापकल्पं कुन्तलमण्डलमवाप्य यावत्तदागमं श्रीपरमर्द्दिने द्वाःस्थो निवेदयति तावत्तत्सदासि काचिद्विटवनिता विवसना पुष्पचलनकां[3] नृत्यन्ती तत्कालमेवोत्तरीयकमादाय सापत्रपा सा तत्रैव निषसाद ॥ अथ राजदौवारिकप्रवेशिताय श्रीजगद्देवाय सप्रियालापप्रभृति सन्मानदानादनु प्रधानपरिधानं दुकूलं लक्ष्यमूल्यातुल्योद्भटपटयुगं प्रासादीकृत्य तस्मिन् महार्हासननिविष्टे सभासंभ्रमे भग्ने सति नृपस्तामेव विटनटीं नृत्यायादिदेश ॥ अथ सा औचित्यप्रपञ्चचञ्चुचातुर्यधुर्या श्रीजगद्देवनामा जगदेकपुरुषः साम्प्रतं समाजगाम तत्तत्र विवसनाहं जिह्रेमि । स्त्रियः स्त्रीष्वेव यथेष्टं चेष्टन्ते इति तस्या लोकोत्तरया प्रशंसया प्रमुदितमानसस्तं नृपप्रसादीकृतं वसनयुगं तस्यै वितीर्णवान् ॥ अथ श्रीप-

---

१ दयादानयुद्धाख्यां. २ [सिद्धराजेन सन्मानितोपि]
३ C D चलच्चलनका ४ लक्षमूल्यातुलया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रमर्दिप्रसादतो देशाधिपत्ये संजाते सति तदुपाध्यायैः श्रीजगद्देवस्य मिलनाय समागतः काव्यमिदं प्राभृतीचकार ॥ तद्यथा ।

चक्रः पप्रच्छ पद्मं[2] कथय मम सखे कास्ति किं स प्रदेशो
वस्तुं नो यत्र रात्रिर्भवति भुवि चिरायेति स प्रत्युवाच ।
नीते मेरौ समाप्तिं कनकवितरणैः श्रीजगद्देवनाम्ना
सूर्येनन्तर्हितेऽस्मिन्कतिपयदिवसैर्वासराद्वैतसृष्टिः१
अस्यै काव्यस्य पारितोषिके तस्मै स स्थूललक्ष्यो
लक्षार्द्धं वितितार ॥

क्षोणीरक्षणदक्षदक्षिणभुजे दाक्षिण्यदीक्षागुरौ
श्रेयःसद्मनि धन्यजन्मनि जगद्देवे जगद्दातरि ।
वर्त्तन्ते विदुषां गृहाः प्रतिदिनं गन्धेभगन्धर्वयो-
रालानद्रुमरज्जुदामघटनाव्यग्रीभवत्किंकराः॥ २ ॥

---

१ A D क्षेणश्रस्तदुपाध्यायः
A B अक्षत्रक्षतवालिनो भगवतः कस्यापि संगीतक-
व्यासक्तस्य च तस्य कुन्तलपतेः पुण्यानि[3] मन्यामहे
एकः कामदुघामदुग्ध मरुतः सूनोः सुबाहुद्वयीं
प्रत्यक्षप्रतिपक्षभार्गव भवानन्यस्य चिन्तामणिः ॥ १ ॥ चक्रः०

२ A पान्थं. ३ B पुष्पाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वयि जीवति जीवन्ति बलिकर्णदधीचयः ।
दारिद्र्यं तु जगद्देव मयि जीवति जीवति ॥ ३ ॥
दरिद्रान् सृजतो धातुः कृतार्थान् कुर्वतस्तव ।
जगद्देव न जानीमः कस्य हस्तो विरंस्यति ॥ ४ ॥
जगद्देव जगद्देवप्रासादमधितिष्ठतः ।
स्वयशःशिवलिङ्गस्य नक्षत्रैरक्षतायितम् ॥ ५ ॥
अगाधः पाथोधिः पृथु धरणिपात्रं[1] विभु नभः
समुत्तुङ्गो मेरुः प्रथितमहिमा कैटभरिपुः ।
जगद्देवो वीरः सुरतरुरुदारः सुरसरित्
पवित्रा पीयूषद्युतिरमृतवर्षीति न नवम् ॥ ६ ॥
न नवमिति जगद्देवनार्पिता समस्या पण्डितेन पूरितेत्पादीनि बहूनि काव्यानि यथाश्रुतं ज्ञातव्यानि ॥ अथ श्रीपरमर्द्दिमेदिनीपतेः पट्टमहादेवी श्रीजगद्देवस्य प्रतिपन्नजामिः । कदाचित् राज्ञा श्रीमालभूपालपराजयाय प्राहितः श्रीजगद्देवः श्रीदेवार्चनं कुर्वन् छलघातिना परबलेन सैन्यं नैजमुपद्रुतं शृण्वन् तमेव देवतावसरं न मुमोच । तस्मिन्नवसरे प्रणिधिपुरुषमुखाज्जगद्देवपराजयमश्रुतपूर्वमवधार्य महिषीं श्रीपरमर्दी प्राह । भवद्भ्राता सं-

१ A पृथुरवनिपात्रं. २ निज.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रामवीरनाथतां बिभ्राणोपि रिपुभिराक्रान्तः पलायितुमपि न प्रभूष्णुरजनि । इति नृपतेर्मर्माभिघातनर्मोक्तिमाकर्ण्य प्रत्यूषसंध्याकाले सा राज्ञी प्रतीचीदिशमालोकितवती राज्ञा किमालोकसे इत्यादिष्टे सूर्योदयमिति, मुग्धे किं सूर्योदयोऽपरस्यां दिशि जायटीति, सा तु विरञ्चिप्रपञ्चः प्रतीपः प्रतीच्यामपि प्रद्योतनोदयो दुर्घटोपि घटते परं क्षत्रियदेवजगद्देवस्य भङ्गस्तु नेति दम्पत्योः प्रियालापः ॥ देवार्चनानन्तरं जगद्देवः पञ्चशत्या सुभटैः समं समुत्थितश्चण्डांशुरिव तमस्काण्डं, केसरिकिशोर इव गजयूथं, वात्यावर्त्त इव घनमण्डलं हेलयैव तद्दलयामास ॥ अथ परमर्दिनामा नृपो जगत्युदाहरणीभूतं परमैश्वर्यमनुभवन् निद्रावसरवर्जं रात्रिंदिवं निजौजसा विच्छुरितं छुरिकाभ्यासं विदधानोऽशनावसरे परिवेषणाकुलं प्रतिदिनमेकैकं सूपकारमकृपः कृपाणिकया निघ्नन् षष्ट्यधिकशतत्रयेण भक्तकाराणां वर्षे निषेव्यमाणः कोपकालानल इति बिरुदं बभार ।

आकाश प्रसर प्रसर्पत दिशस्त्वं पृथ्वि पृथ्वी भव
प्रत्यक्षीकृतमादिराजयशसां युष्माभिरुज्जृम्भितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रेक्षध्वं परमर्दिपार्थिवयशोराशेर्दिगन्तोदया-
द्वीजोच्छ्वासविदीर्णदाडिमदशां ब्रह्माण्डमारोहति॥१

इत्यादिभिः स्तुतिभिस्तूयमानश्चिरं राज्यसुखमनुबभूव। स च सपादलक्षक्षितिपतिना श्रीपृथ्वीराजेन सह संजातविग्रहः समराजिरमधिरूढः स्वसैन्ये पराजिते कान्दिशीकः कामपि दिशं गृहीत्वा पलायनपरः स्वराजधानीमाजगाम। अथ तस्य पार्थिवस्यापमानितसर्वसेवको निर्विषयीकृतः पृथ्वीराजराजसभामुपेतः प्रणामान्ते किं दैवतं पूज्यते परमार्हैपुरे विशेषात्सुकृतिभिरिति स्वामिनादिष्टस्तत्कालोचितं काव्यमिदमपाठीत्।

मन्दश्चन्द्रकिरीटपूजनरसस्तृष्णा न कृष्णार्चने
स्तब्धैः[1] शम्भुनितम्बिनीप्रणतिषु व्यग्रो विधातृग्रहः
नाथो नः परमर्द्यनेन वदनन्यस्तेन संरक्षितः
पृथ्वीराजनराधिपादिति तृणं तत्पत्तने पूज्यते॥१

इति स्तुतिपरितोषितेनानुजग्राह। स तत्र त्रिःसप्तकृत्वस्त्रासितम्लेछाधिपोपि द्वाविंशतिवेलायां स एव म्लेछाधिपतिः पृथ्वीराजराजधानीमुपेत्य निजदुर्द्धरस्कन्धावारेण समवात्सीत्। त्रासि-

१ A स्तब्धा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमक्षिकेव भूयो भूयो रिपुरुपैतीति निजनृपतेररतिं मनोगतामवगम्य प्रभोर्निःसीमप्रसादपात्राद्वितीयमिवासात्रं तुङ्गनामा क्षात्रं तेजो वहन् सुभटकोटीरः स्वप्रतिबिम्बरूपेण पुत्रेण समं म्लेछाधिपतेरनीकं प्रविश्य निशीथसमये तस्य रिपोर्गुरूदरात् परितः खदिराङ्गारधगधगायमानां परिखां निरीक्ष्याङ्गजं जगाद । अस्यां मम प्रविष्टस्य पृष्टे पदं ददानो म्लेछपतिं निगृहाणेति पितुरादेशान्ते कार्यमेतन्ममासाध्यतमं किं च जीवितकाङ्क्षया वप्तुर्[२]विपत्तिदर्शनं, तदहमस्यां विशामि भवन्त एव तमन्तं नयन्तु । इत्युक्त्वा तेन तथा कृते स्वामिकार्यं पर्याप्तप्रायं मन्यमानस्तमरातिं लीलया निगृह्य यथागतमाजगाम । विभातभूयिष्ठायां निशि विपन्नं स्वामिनं निरीक्ष्य परसैन्यं पलायांचक्रे । स तुङ्गसुभटस्तुङ्गप्रकृतिर्नृपतेः कदाचिन्न ज्ञापयामास । कस्मिन्नप्यवसरे राजमान्यतया नितान्तपरिचितां तुङ्गपुत्रवधूमवधूतमङ्गलवलयामालोक्य संभ्रमात् पतिना पृच्छयमानोपि पयोधिरिव गम्भी, रतया मौनमर्यादया किमप्यविज्ञपयन् निजशपथ-

---

२ A B वपुः [वसुः पितुः]

दानपूर्वं पृष्टो निजगुणपातकं दुष्करमिति तथापि प्रभोरभ्यर्थनया निवेद्यमानमस्तीत्याभिधाय तद्वृत्तान्तं प्रत्युपकारभीरुर्यथावस्थितं निवेदयामास ।

इयमुज्झधियामलौकिकी
महती कापि कठोरचित्तता ।
उपकृत्य भवन्ति निःस्पृहाः
परतः प्रत्युपकारशङ्कया ॥ १ ॥

इति तुङ्गसुभटप्रबन्धः ॥ अथ कदाचित्तस्य म्लेछपतेः सूनुर्नृपतिः पितुर्वैरस्य स्मरन्, सपादलक्षक्षितिपतिर्विग्रहकाम्यया सर्वसामग्र्या समुपेतः पृथ्वीनाथस्य नासीरवीरधनुर्द्धरशरैः प्रावृषेण्यधाराधरधारासारैरिव तस्मिन्ससैन्ये त्रासिते पृथ्वीराजस्तदा तदानुपदिकीभावं भजन्, महानसाधिकृतपञ्चकुलेन विज्ञापितं करभीणां सप्तशत्यापि महानसपरिस्पन्दः सुखेनोह्यते नातः कियतीभिः करभीभिः प्रभुः प्रसीदत्विति विज्ञप्तो नृपतिर्म्लेछपतिमुच्छेद्य भवदभ्यार्थिताः करभीः प्रसादीकरिष्यामीति तत्संबोध्य पुनः प्रयाणं कुर्वन् सोमेश्वरनाम्ना प्रधानेन भूयो भूयो निषिध्यमानः, तत्पक्षपातभ्रा-

१ A सुखेनोह्यते ततः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्त्या नृपतिना निगृहीकर्णः, तदत्यन्तपराभवात् तस्मिन् प्रभौ सामर्षो म्लेछपतिं प्राप्य तदभिभवप्रादुःकरणतस्तान् विश्वस्तान् पृथ्वीराजस्कन्धावारसन्निधौ समानीय पृथ्वीराजराजस्यैकादश्युपवासकृतपारणादनु सुप्तस्य तन्नासीरवीरैः सह समरसंरम्भे म्लेछाधिपतीनां जायमाने निर्भरनिद्रायमाणस्तुरुष्कैर्नृपतिर्निबध्य स्वसौधं नीतः। पुनरप्येकादश्युपवासपारणके नृपतेर्देवार्चनावसरे म्लेछराजेन प्रहितं तत्र पात्रीकृतमांस्पाकं गुरूदरान्तर्नियुज्य तदैव देवताराधनवैयग्र्ये सति शुनापच्छियमाणे तस्मिन् पिशिते किं न रक्षसि यामिकैरित्याभिहितः करभीणां सप्तशत्या दुर्वहं यत्पुरा मम महानसं तत्सांप्रतं दुर्दैवयोगादीदृशीं दुर्दशां प्राप्तमिति कौतुकाकुलितमानसो विलोकयन्नस्मीति तेनोक्ते किं काचिदद्यापि त्वय्युत्साहशक्तिरवशिष्यत इति तैर्विज्ञप्ते यदि स्वस्थाने गन्तुं लभेत तदा दर्शयामि वपुःपौरुषमिति यामिकैर्विज्ञप्तो म्लेछभूपतिः तत्साहसं दिदृक्षुस्तदीयां राजधानीमानीय पृथ्वीराजं तत्र राजसौधे यावदभिषेक्ष्यति तावत्तत्र चित्रशालायां शूकरनिवहैर्हन्यमानान् म्लेछानालो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्यामुना मर्माभिधातेनात्यन्तपीडितस्तुरुष्कपार्थिवः पृथ्वीराजं कुठाराशिरश्छेदपूर्वं संजहार ॥

इति नृपतिपरमर्दिजगद्देवपृथ्वीपतीनां प्रबन्धाः ॥

अथ शतानन्दपुरे परिखीभूतजलधौ श्रीमहानन्दो नाम राजा मदनरेखेति तस्य राज्ञी अन्तःपुरप्राचुर्यात् पतिसंवननकर्मनिर्माणव्याप्त्या[२] नानाविधान् वैदेशिकान् कलाविदश्च पृच्छन्ती कस्यापि यथार्थवादिनः सत्यप्रत्यस्य कार्मणकर्मणे किंचित्सिद्धयोगमासाद्य तत्प्रयोगावसरे[३] ॥

मन्त्रमूलबलात्प्रीतिः पतिद्रोहोभिधीयते ।

इति वाक्यमनुस्मरन्ती सतीव तद्योगचूर्णं जलधौ न्यधत्त । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति तद्वेषजमाहात्म्याद्वशीकृतो वारिधिरेव मूर्त्तिमान् निशि तामुपेत्य रेमे । इत्थमकस्मादाधानवर्तीं प्रतीकैस्तद्विधैर्निर्णीय सकोपो भूपो यावत्तस्याः प्रवासादिदण्डं कमपि विमृशति तावत्तस्याः संनिहिते निधननिर्बन्धे प्रत्यक्षीभूय जलधिरधिष्ठातृदैवतमहमिति स्वं ज्ञापयन् मा भैषीरिति तामाश्वास्य प्रति नृपं प्राह ।

---

१ वशीकरणकर्म २ A प्राप्त्या ३ D प्रयोजनावसरे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवाहयित्वा यः कन्यां कुलजां शीलमण्डिताम् ।
समदृष्ट्या न पश्येत स पापिष्ठतरः स्मृतः ॥ १ ॥

इति त्वामवज्ञाकारिणं प्रलयकालमुक्तमर्यादया सान्तःपुरपरीवारं मज्जयिष्यामीत्यभिधाय क्वचित् क्वचित् पयांस्यपहृत्यान्तरीपान् प्रादुश्चकार । तानि सर्वाण्यपि लोकेषु कौङ्कणानीति प्रसिद्धानि ॥ इति कौङ्कणोत्पत्तिप्रबन्धः ॥

अथ पाटलीपुत्रपत्तने[1] वराहनामा कश्चिद्ब्राह्मणाङ्गभूः आजन्म निमित्तज्ञानश्रद्धालुर्दुर्गतत्वादसून् रक्षितुं पशून् चारयन् क्वापि शिलातले लग्नमालिख्याकृततद्विसर्जनः प्रदोषकाले गृहमुपेतः। कृतसमयोचितकृत्यो निशीथकाले भोजनायोपविष्टो लग्नविसर्जनमनुस्मृत्य निरातङ्कवृत्त्या तत्र याति तावत्तदुपरि पारीन्द्रमप्युपविष्टमवगणय्य तदुदराधोभागे पाणिं प्रक्षिप्य लग्नं विमृजन् सिंहरूपमपहाय प्रत्यक्षीभूय रविरेव वरं वृणु इत्युवाच । अथ समस्तनक्षत्रग्रहमण्डलं दर्शयेति वरं प्रार्थयमानः स्वविमानेऽधिरोप्य तत्रैव नीतो वत्सरान्ते यावद्ग्रहाणां वक्रातिचारोदयास्तमनादीन् भावान् प्र-

१ A पोटलापुत्र.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षरूपान् परीक्ष्य पुनरिहायातो मिहिरप्रासादाद्वराह-मिहिर इति प्रसिद्धाख्यः श्रीनन्दनृपतेः परमां मान्यतां दधानो वाराहीसंहितेति नवं ज्योतिःशास्त्रं रचयांचकार। अथ कदाचित्स निजपुत्रजन्मावसरे निजगृहे घटिकां निवेश्य तया शुद्धजन्मकाललग्नं निर्णीय जातकग्रन्थप्रमाणेन ज्योतिश्चक्रे। स्वयं प्रत्यक्षीकृतग्रहचक्रज्ञानबलात्तस्य सूनोः संवत्सरशतप्रमाणमायुर्निर्णीतवान्। जन्ममहोत्सवे चैकं श्रीभद्रबाहुनामानं जैनाचार्यं कनीयांसं सोदरं विहाय नृपप्रभृतिकः स कोपि नास्ति य उपायनपाणिर्न जगाम। स निमित्तविज्जिनभक्ताय शकडालमन्त्रिणे तेषां सूरीणामनागमनकारणमुपालम्भगर्भितं जगौ। तेन ज्ञापितास्ते महात्मानः संपूर्णश्रुतज्ञानकरतलकलितामलकफलवत्कालत्रयास्तस्य शिशोर्विंशतितमे दिने बिडालान्मृत्युमुपदिशन्तो वयं नागता इति तेषामुपदेशभूतां वाचं वराहमिहिराय निवेदितायां, ततः प्रभृति निजकुटुम्बं तस्य शावस्यावश्यकीं तां विपदं निरोद्धुं बिडालरक्षायै शतश उपायान्कुर्वन्नपि निर्णीते दिने निशी-

१ शिशोः

थेऽकस्माद्बालमूर्द्धि[1] पतितयार्गलया स बालः परलोकमवाप । ततस्तच्छोकशङ्कुमुधिर्दिषवः श्रीभद्रबाहुगुरवो यावत्तद्देहमायान्ति तावत्तद्गृहाङ्गणे समस्तनिमित्तशास्त्रपुस्तकान्येकत्र पिण्डीकृतानि संनिहितदहनान्यालोक्य किमेतदिति पृष्टः सांवत्सरैः समत्सरस्तान् जैनमुनीनुपालम्भयन् एतानि संदेहकारीणि धक्ष्याम्येव यैरहमपि विप्रलब्धस्तेनेति सनिर्वेदमुदिते तैः श्रुतज्ञानबलात्तज्जन्मलग्नं सम्यक् तस्मै निवेद्य सूक्ष्मेक्षिकया तद्गृहबले ज्ञापिते विंशतिदिनान्येव भवन्ति । इत्थं विरक्तावपनीतायां स ज्योतिषिक इति जगौ । यद्गवद्भिर्बिडालान्मृत्युरुपदिष्टस्तदेव व्यभिचारीति तेनाभिहिते तत्रार्गलां तामानाय्य तत्रोत्कीर्णं बिडालं दर्शयन्तो भवितव्यताव्यत्ययः किं कदापि भवतीति महर्षिभिरभिदधे । कस्मात् रुद्यते गतः कः परमाणवोऽनपायाः संस्थानविशेषनाशजन्मा शोकश्चेन्न कदापि मोहितव्यम् ।

अभावप्रभवैर्भावैर्मायाविभवभावितैः ।
अभावनिष्ठं पर्यन्ते सतां न क्रियते तमः ॥

---

१ ज्योतिर्विद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्तियुक्तिभ्यां प्रबोध्य ते महर्षयः स्वं पदं भेजुः। इत्थं बोधितस्यापि तस्य मिथ्यात्वध्वान्तान्तरितस्य कनकभ्रान्तिरिव तथाप्युन्मत्सरोच्छेदकात्तद्भक्तानभिचारकर्मणा कांश्चन पीडयन् कांश्चन व्यापादयन् तद्वृत्तान्तं तेभ्यो ज्ञानातिशयादवधार्योपसर्गहरं पार्श्वमिति नूतनं स्तोत्रं रचयांचक्रुः॥ इति वराहमिहिरप्रबन्धः॥

अथ ढङ्काभिधानभूभृति रणसिंहनामा राजपुत्रस्तन्नन्दनां भूपलनाम्नीं सौन्दर्यनिर्जितनागलोकबालामालोक्य जातानुरागतया तां सेवमानस्य तस्य वासुकेः सुतो नागार्जुननामा समजनि। तेन पातालपालेन सुतस्नेहमोहितमनसा सर्वासामप्यौषधीनां फलानि मूलानि दलानि च भोजितस्तत्प्रभावान्महासिद्धिभिरलंकृतः सिद्धपुरुषतया पृथ्वीं विगाहमानः शातवाहननृपतेः कलागुरुर्गरीयसीं प्रतिष्ठामुपागतोपि गगनगामिनीं विद्यामध्येतुं श्रीपादलिप्तपुरे पादलिप्ताचार्यान् सेवमानो व्रतमतिभोजनावसरे पदे लेपप्रमाणेन गगनोत्पतितान् श्रीअष्टापदप्रभृतीनि तीर्थानि नमस्कृत्य तेषां स्वस्थानमुपेयुषां पादौ प्रक्षाल्य ज्ञातसप्तोत्तरशतसंख्यम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षधीनामास्वादवर्णघ्राणादिभिर्निर्णीय च गुरूनवगणय्य कृतपदलेपः कृकवाकुकलापिवदुत्पत्यावटे निपतंश्च तद्रूणश्रेणिजर्जरिताङ्गो गुरुभिः किमेतदित्यनुयुक्तो यथावद्वृत्तान्तं निवेदयन् तच्चातुर्यचमत्कृतचेतोभिस्तच्छिरसि पद्महस्तदानपूर्वकं षाष्टीकतन्दुलोदकेन तानि भेषजान्यभ्यञ्ज्य तत्पादलेपाङ्गगनगामी भूया इति तदनुग्रहादेकां सिद्धिमासाद्य श्रीपार्श्वनाथपुरतः साध्यमानो रसः समस्तस्त्रैणलक्षणोपलक्षितपतिव्रतवनितामर्द्यमानः कोटिवेधी भवतीति तन्मुखादाकर्ण्य च यत्पुरा समुद्रविजयदाशार्हेण त्रिकालवेदिनः श्रीनेमिनाथस्य मुखान्महातिशायि श्रुत्वा श्रीपार्श्वनाथबिम्बं रत्नमयं निर्माप्य श्रीद्वारवत्यां प्रासादे न्यस्तं, द्वारवतीदाहानन्तरं समुद्रेण प्लावितायां तस्यां पुरि तत्र समुद्रे तस्मिन्बिम्बे तथैव विद्यमाने कान्तीयसांयात्रिकस्य धनपतिनाम्नो यानपात्रे देवतातिशयात् स्खलिते इह जिनबिम्बमस्तीति दिव्यवाचा निर्णीय नाविकांस्तत्र प्रक्षिप्य सप्तसंख्यैरामतन्तुभिः सन्दानितमुद्धृत्य निजायां पुरि चिन्तातीतलाभात् स्वयंकृतप्रासादे न्यस्तवान्। तत्स-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्वातिशायिबिम्बं नागार्जुनः स्वसिद्धरससिद्धयेऽपहृत्य सेडीतटिन्यास्तटे तदेव बिम्बस्य तत्पुरतो रससाधनाय श्रीसातवाहनस्यैकपत्नीं चन्द्रलेखाभिधानां प्रतिनिशं सिद्धव्यन्तरसान्निध्यात्तत्रानीय रसमर्दनं कारयति स्म। इत्थं भूयो भूयस्तत्र यातायाते सति बन्धुबुद्ध्या सा नागार्जुनपार्श्वे तदौषधीनां मर्दनहेतुं पृच्छती, सोपि स्वकल्पनया कोटिवेधरसस्य यथावस्थितं वृत्तान्तं निवेदयन्, तस्याश्च वचनगोचरातीतं सत्कारं कुर्वाणोनन्यसामान्यसौजन्यं प्रवर्द्धयामास। अथ कदाचित्तया निजाङ्गजयोरस्मिन् वृत्तान्ते निवेदिते तौ तल्लुब्धौ राज्यं परित्यज्य नागार्जुनसमलंकृतां भुवमागतौ कैतवेन तस्य रसस्य जिघृक्षया गुप्तवेषौ यत्र नागार्जुनो भुङ्क्ते तत्र तामर्थदानेन परितोष्य रसवार्त्तां पृच्छतः। सा च तज्जिज्ञासया तदर्थं सलवणां रसवतीं[1] कुर्वती षण्मास्यां व्यतीतायां तस्मिन् क्षारमिति रसवतीं दूषयति सति, इङ्गितैः सिद्धं रसमिति ताभ्यां निवेदितवती। अथ प्रतिप्रन्नभागिनेयाभ्यां रसग्रसनलालसाभ्यां वासुकिना निर्णीत-

[१ रसवतीविधायिनीं कांचित्]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्भाङ्कुरमृत्युरिति परपरया ज्ञाततत्त्वाभ्यां तेनैवं शस्त्रेण तथैव स निजघ्ने । स रसः संप्रतिष्ठितत्वा-द्दैवताधिष्ठानाच्च तिरोहितो बभूव । यत्र स रसस्त-म्भितस्तत्र स्तम्भनकाभिधानं श्रीपार्श्वनाथतीर्थं र-सादप्यतिशायि सकललोकाभिलषितफलप्रदं । त-तः कियता कालेन तद्बिम्बं वदनमात्रवर्जं भूम्यन्त-रितं बभूव । अथ श्रीशासनदेवतादेशात् षण्मासीं यावदाचाम्लानि निर्म्माय कठिनीप्रयोगेण नवाङ्ग-वृत्तौ निवृत्तायां श्रीअभयदेवसूरीणां वपुषि प्रादुर्भूते प्रभूतरोगे पातालपालः श्रीधरणेन्द्रनामा सितस-र्परूपमास्थाय तद्वपुर्जिव्हया विलिह्य[2] प्रसह्य निरा-रामयीकृत्य तत्तीर्थं श्रीमदभयदेवसूरीणामुपादिदेश। श्रीसंघेन सह समागतास्तत्र ते सूरयः प्रस्रवन्तीं सुराभिं विलोक्य गोपालबालैर्निवेदितायां भुवि न-वं द्वात्रिंशातिकास्तवं कुर्वन्तस्त्रिंशत्तमवृत्तेन तत्र श्रीपार्श्वनाथबिम्बं प्रादुश्चक्रुः । देवतादेशेन[3] तद्वृत्तं गोप्यमेव निर्ममे ॥

यन्मार्गेपि चतुःसहस्रशरदो देवालये योर्चितः

---

३ B D संप्रातिष्ठितदेवताधिष्ठानवशात् २ A लेलिह्य
१ A देवतावशेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वामी वासववासुदेववरुणैः स्वावासमध्ये[1] ततः ।
कान्त्याभिभ्यधनेश्वरेण महता नागार्ज्जुनेनार्चितः[2]
पायात्स्तम्भनके पुरे स भवतः श्रीपार्श्वनाथो
जिनः ॥ १ ॥

इति नागार्ज्जुनोपत्तिस्तम्भनकतीर्थावतारप्रबन्धौ ॥

अथावन्त्यां पुरि कश्चिद्विप्रः पाणिनिव्याकरणोपाध्यायतां कुर्वाणः सिप्रासरित्प्रान्तवर्त्तिचिन्तामणिगणेशप्रणामगृहीताभिग्रहः छात्रैः फक्किकाव्याख्यानप्रश्नादिभिरुद्वेजितः कदाचित् प्रावृषि तस्यासरितः पूरे प्रसर्पति कृतघ्नम्यापातो दैवात् संघटितवृक्षस्तन्मूले करावलम्बनस्तरीमासाद्य प्रत्यक्षं परशुपाणिं प्रणमन् तेन तत्साहसानुष्ठानेन वरं वृणीष्वेत्यादिष्टः पाणिनिव्याकरणस्योपदेशं प्रार्थयमानस्तेन तथेति प्रतिपद्य खटिकार्पणपूर्वं[3] प्रतिदिनं व्याकरणे व्याख्यायमाने षण्मासपर्यन्ते व्याकरणे समर्थिते सति लम्बोदरं निर्विलम्बमनुज्ञाप्य प्रथमादर्शं सहादाय[4] तां पुरीं प्रविश्य स्थण्डिले कस्यापि पुरस्य निषण्ण एव सुष्वाप । ततः प्रत्यूषे प्रे-

१ A यो वार्द्धिमध्ये २ C अञ्चितः ३ A षष्टिकार्पणपूर्वं
४ A सहादीयतां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्याभिस्तं तथास्थितं प्राप्य विपणिरमणी तद्वृत्तान्तं ज्ञापिता सती ताभिरेव समानीय प्रेङ्खोलपल्यङ्के मुक्तः। अहोरात्रत्रयान्ते किंचित्त्यक्तनिद्रश्चित्रशालादिचित्रं चित्रकारि पश्यन् स्वलोकसमुत्पन्नमात्मानं मन्यमानस्तया पणहरिणीदृशा ज्ञापितवृत्तान्तः स्नानपानभोजनादिभिर्भक्तिभिः परितोषितो नृपसभायां समुपेतः पाणिनिव्याकरणं यथावस्थितं व्याचक्षाणो नृपप्रभृतिपण्डितैरशेषैः सत्क्रियमाणस्तदुपात्तं सर्वस्वं तस्यै समर्पयामास।

अथ तस्य क्रमेण चतुर्णां वर्णानां स्त्रियश्चतस्रः प्रिया अभवन्। तथा क्षत्रियाङ्गजः श्रीविक्रमार्कः शूद्रीसुतो भर्तृहरिः[3] स हीनजातित्वात् भूमिगृहस्थो गुप्तवृत्त्याध्याप्यते। अपरे त्रयः प्रत्यक्षाः पाठ्यन्ते एवं भर्तृहरिसंकेतेन तेषामध्याप्यमानानां॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।

इति पाठ्यमाने भर्तृहरौ रज्जुसंकेतेऽसंजायमाने प्रत्यक्षच्छात्रैस्त्रिभिरुत्तरार्द्धे पृच्छ्यमाने कुपितः उपाध्यायं रे वेश्यासुत अद्यापि रज्जुसंकेतं न कु-

१ D प्रेक्ष्य २ B C ते वृत्तान्तं ज्ञापिता ३ A भर्तृहरः नृहरः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुषे इत्याक्रुपन् प्रत्यक्षीभूय शास्त्रकारं[1] निन्दन्
आयासशतलब्धस्य प्राणेभ्योपि गरीयसः।
गतिरेकैव वित्तस्य दानमन्या विपत्तयः ॥ १

इति पाठाद्वित्तस्यैकामेव गतिं मेने। तेन भर्तृहरिणा वैराग्यशतकादिप्रबन्धा भूयांसश्चक्रिरे ॥
इति भर्तृहर्युत्पत्तिप्रबन्धः ॥

अथ श्रीधारायां मालवमण्डनस्य श्रीभोजराजस्यायुर्वेदवेदी कश्चित् वाग्भटनामायुर्वेदोदितानि कुपथ्यानि विधाय तत्प्रभावात् रोगान् प्रादुःकृत्य पुनस्तन्निग्रहाय सुश्रुतविश्रुतैर्भेषजैः पथ्यैश्च तान्निगृह्य नीरमन्तरेण कियत्कालं जीव्यते इति परीक्षार्थं तत्परिहृत्य दिनत्रयान्ते पिपासापीडिततालवोष्ठपुट इत्यपाठीत् ॥

क्वचिदुष्णं क्वचिच्छीतं क्वचित्क्वथितशीतलम्।
क्वचिद्भेषजसंयुक्तं वारि क्वापि न वारितम् ॥ १ ॥

इति वारिसत्कारकारि वाक्यमिदमपाठीत्। तेन निजानुभूतो वाग्भटनामा प्रबन्धश्चक्रे। तस्य जामातापि लघुबाहडः श्वसुरेण बृहद्बाहडेन-

---

१ B इत्याक्रष्टः २ A भर्तुहरिरज्जुसकेतं न कुरुषे इत्यादिष्टः स प्रत्यक्षीभूय धरासुकारं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सह राजमन्दिरे प्रयातः प्रत्यूषकाले श्रीभोजस्य शरीरचेष्टितं[1] विलोक्य बृहद्बाहडेनाद्य नीरुजो यूयमित्युक्ते लघोर्मुखभङ्गं विलोक्य श्रीभोजेन कारणं पृष्टः स स्वामिनः शरीरेऽद्य निशाशेषे कृष्णच्छायाप्रवेशसूचितो राजयक्ष्मणः प्रवेशोऽभूदिति दैवतादेशेनातीन्द्रियं भावं[2] विज्ञपयन्, तत्कलाकलापचमत्कृतेन राज्ञा तस्य व्याधेः प्रतीकारतयानुयुक्तः लक्षत्रयमूल्यं रसायनं निवेदयन्, षड्भिर्मासैस्तावता द्रव्यव्ययेन परमादरेण च तस्मिन् रसायने सिद्धे प्रदोषसमये तद्रसायनं काचमये कुम्पके न्यस्य नरेन्द्रपल्यङ्के निधाय प्रत्यूषे देवतार्चनानन्तरं तद्रसायनमत्तुमिच्छुः रसायनपूजावर्द्धापनादनु सज्जीकृतायां समग्रसामग्र्यां स लघुरगदंकारी केनापि कारणेन तं काचकुम्पकं भूमावास्फाल्य बभञ्ज। आः किमेतदिति राज्ञोक्ते रसायनपरिमलादेव पलायिते[3] व्याधौ व्याधेरभावाद्धातुक्षयकारिणानेन वृथा स्थापितेनालं यदद्या शर्वरीविरामे सति सा पूर्वोक्ता कृष्णा छाया

---

१ A शरीरेङ्गितं २ A दैवताशियेन B आत्मीयभवं ३ D पलायमाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभोर्वपुरपास्य दूरं गतैव दृष्टो इत्यर्थे देवः प्रमाणमिति तदीयसत्यप्रत्ययेन परितोषितो राजा दारिद्र्यद्रोहि पारितोषिकं प्रसादीचकार ॥ अथ ते सर्वव्याधयस्तेन चिकित्सितेन भूतलादुच्छेदिताः स्वर्लोकेऽश्विनीकुमारवैद्ययोः स्वपराभवं निजगदुः ॥ अथ तौ तया प्रवृत्त्या चित्रीयमाणमानसौ नीलवर्णविहङ्गमयुग्मीभूय व्याधिप्रतिभटस्य वाग्भटस्य धवलगृहवातायनतले वलभ्यां निविष्टौ कोऽरुक् शब्दं चक्रतुः ॥ ततः स आयुर्वेदवेदी नेदीयांसं तदीयशब्दं साभिप्रायं चेतसि चिरं विचिन्त्य।

अशाकभोजी घृतमात्ति योन्धसा
पयोरसान् शीलति नात्ति योम्भसा ॥
अभुक् विभुक् नापकृतां विदाहिनां[1]
चलत्प्रभुक् जीर्णभुगल्पसारभुक् ॥ १ ॥

इत्यभाणि। भणितानन्तरं चमत्कृतचित्तौ तौ प्रयातौ। पुनर्द्वितीयादिने द्वितीयवेलायां तादृक्पक्षिरूपं विधाय प्राक्तनशब्दरूपं कुर्वाणौ समायातौ वैद्यगृहे पुनस्तयोर्वचः, प्रतिवचः ।

---

१ A आमुक् विरुट् नावकृतां B अभुक् विभुक् नावकृतां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्षासु यस्तिष्ठति शरदि पिबति हेमन्तशिशिरयोरत्ति ।
माद्यति मधुनि ग्रीष्मे स्वपिति भवति च खग सोरुक् ॥

इति भणितानन्तरं पुनरेव गतौ । तृतीयदिने योगीद्ररूपं कृत्वा तद्गृहे समागतौ तयोर्वचः ।

अभूमिजमनाकाशमहन्तव्यमवारिजम् ।
संमतं सर्वशास्त्राणां वद वैद्य किमौषधम् ॥

पुनर्वैद्यवचः

अभूमिजमनाकाशं पथ्यं रसविवर्जितम् ।
पूर्वाचार्यैः समाख्यातं लङ्घनं परमौषधम् ॥ १ ॥

तेन[1] चमत्कृतचित्तौ वैद्यौ प्रत्यक्षीभूय यथाभिमतं वरं वितीर्य स्वस्थानं भेजतुः ॥

इति वैद्यवाग्भटप्रबन्धः ॥

अथ धामणउलिग्रामवास्तव्यो[2] धाराभिधानः कोपि नैगमः श्रिया वैश्रमणस्पार्द्धिष्णुः संघाधिपत्यमासाद्य माद्यद्द्रविणव्ययव्यतिकरजीवितजीवलोकः पञ्चभिरङ्गजैः समं श्रीरैवताचलोपत्यका-

---

१ A तेन निजाभिप्रायसदृशप्रत्युत्तरदानेन २ A धारणउलिग्रामे वास्तव्यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यां विहितावासः दिगम्बरभक्तेन केनापि गिरिनगरराजेन सिताम्बरभक्त इति स स्खल्यमानस्तद्वयोः सैन्ययोः समरसंरम्भे प्रवर्त्तमाने सति अमानेन रणरसेन युद्धमाना देवभक्त्या वल्लभतया प्रोत्साहितसाहसा विपद्य ते पञ्चपुत्राः पञ्चापि क्षेत्रपतयो बभूवुः। तेषां क्रमेण नामानि। कालमेघः १ मेघनादः २ भैरवः३ एकपदः४ त्रैलोक्यपादः५इति बभूवुः। तीर्थप्रत्यनीकं पञ्चतां नयन्तस्ते पञ्चापि गिरेः परितो विजयन्ते स्म। अथ तत्पिता धाराभिधान एक एवावशिष्टः कन्यकुब्जदेशे गत्वा श्रीबप्पहट्टिसूरीणां व्याख्याक्षणप्रक्रमे श्रीसंघस्याज्ञां दत्तवान् यद्रैवतकतीर्थं दिगम्बराः कृतवसतयः सिताम्बरान् पाषण्डिरूपान् परिकल्प्य पर्वताधिरूढान्नेच्छन्ति[1] अतस्तान् निर्जित्य तीर्थोद्धारं कृत्वा निजदर्शनप्रतिष्ठापरैर्व्याख्याक्षणो विधेय इति तद्वचनेन्धनप्रोज्ज्वलितप्रतीपज्वलनाँ[2] नृपतिं सहादय तेन समं तां भूधरधरामवाप्य सप्ताभिर्दिनैर्वादस्थलेन दिगम्बरान् पराजित्य श्रीसंघसमक्षं श्रीअम्बिकां प्रत्यक्षीकृत्य

---

१ A मरणरसेन २ पर्वतेधिरोढुं न ददन्ति D पर्वतेधिरोहं
३ C प्रतिघज्वलनाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोवि नमुक्कारो उज्जन्तसेलसिहरे इत्यादितदुक्तां गाथामाकर्ण्य सिताम्बरदर्शने स्थापिते सति पराभूता दिग्वसना बलानकमण्डपात् झम्पापातं वितेनुरिति क्षेत्राधिपत्युत्पत्तिप्रबन्धः ॥

अथ कदाचिद्भवान्या भव इति पृष्टः, यत्त्वं कियतां कार्पटिकानां राज्यं ददासीति तद्वाक्यादनुयो लक्षसंख्यानामपि एक एव वासनापरस्तस्य वै राज्यमहं वितरामीति प्रत्ययदर्शनाय गौरीं पङ्गमग्नां जरद्गवीं विधाय स्वयं नररूपेण तटस्थः पान्थांस्तामुद्धर्त्तुमाकारयन् तैरासन्नसोमेश्वरदर्शनोत्कैरुपहस्यमानः केनापि कृपावता पथिकवृन्देन तस्यामुद्धर्त्तुमारब्धायां सिंहरूपेण शिव एव तान् त्रासयन् काश्चिदेक एव पथिको मृत्युमप्यादृत्य तस्या गोः समीपं नोज्झत् स एव राज्यार्ह इति पृथक् गौर्या दर्शित इति वासनाप्रबन्धः ।

अथ कश्चित्कार्पटिकः सोमेश्वरयात्रायां व्रजन् पथि लोहकारौकसि प्रसुप्तः। तस्य लोहकारस्य भार्या पतिं निहत्य कृपाणिकां कार्पटिकशीर्षे निदधती बुबारवमकरोत् । आरक्षकेण तत्रागत्य तस्यापराधिनः करौ छिन्नौ स देवस्योपालम्भनपरः निशि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यक्षीभूयेत्युक्तः। शृणु त्वया प्राग्भवे कदाचिदजा केनापि एकेन सोदरेण पाणिभ्यां श्रवणयोर्धृता तदपरेण मारिता ततः सा अजा मृत्वा इयं योषिदजनि येन व्यापादिता स साम्प्रतं पतिरभूत् यत्त्वया तदा कर्णौ विधृतौ तदा तव समागमे जाते सति करौ छिन्नौ तदा कथं ममोपालम्भ इति कृपाणिकाप्रबन्धः॥

पुरा शङ्खपुरनगरे श्रीशङ्खो नाम नृपतिस्तत्र नामकर्मभ्यां धनदः श्रेष्ठी स कदाचित्करिकर्णताल-तरलां कमलां विमृश्योपायनपाणिर्नृपोपान्तमुपेत्य तं परितोष्य च तत्प्रसादीकृतायां भुवि चतुर्भिर्नन्दनैः सह समालोच्य सुलग्ने जैनप्रासादमचीकरत्। तत्र प्रतिष्ठितबिम्बानां स्थापनां विधाय तस्य प्रासादस्य समारचनाय बहून्यायद्वाराणि रचयन् तत्सपर्याकुलतया नानाविधकुसुमवृक्षावलीसमलंकृतमभिराममारामं च निर्माप्य तच्चिन्तकेषु नियुक्तेषु उदिते प्राक्तनान्तरायकर्मणि क्रमात् संच्छियमाणसंपदधमर्णतया तत्र मानम्लानिमाकलय्यानतिदूरवर्त्तिनि क्वापि ग्रामे कृतवसतिर्नगरयातायातेन सुतोपात्तजीविकः कियन्तमपि कालमति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाहितवान्। अथान्यस्मिन्नवसरे संनिहिते चातुर्मासिकपर्वाणि तत्र यायिभिः सुतैः समं स धनदः शङ्खपुरं प्राप्य निजप्रासादसोपानमाधिरोहन् निजारामपुष्पलाविकयोपायनीकृतपुष्पचतुःसरिकः परमानन्दनिर्भरस्तीर्थाभिर्जिनेन्द्रमभ्यर्च्य निशि गुरूणां पुरः स्वं दौस्थ्यममन्दं निन्दन् तैः प्रदत्तकपर्दियक्षाकृष्टिमन्त्रोऽन्यदा कृष्णचतुर्दशीनिशीथे तमेव मन्त्रमाराधयन् प्रत्यक्षीकृतात् कपर्दियक्षात् गुरूपदेशतश्चतुर्मासकावसरे पुष्पचतुःसरिकपूजापुण्यफलं देहीति प्रार्थयन् एकस्यापि पूजाकुसुमस्य पुण्यफलं सर्वज्ञेन विना नाहं वितरीतुं प्रभूष्णुरिति किं तु कपर्दियक्षस्तस्य साधर्मिकस्यातुल्यवात्सल्यसंबन्धे तद्गात्रि चतुर्षु कोणेषु सुवर्णपूर्णान् चतुरः कलशान् निधीकृत्य तिरोदधे। स प्रातः स्वसद्मनि समागतः धर्मदानपराणां नन्दनानां तद्द्रव्यं समर्थयामास। तेपि निर्बन्धात् पितुः पार्श्वे तद्वैभवलाभहेतुं पृच्छन्तस्तेषां हृदि धर्मप्रभावाविर्भावाय जिनपूजाप्रभावतः परितुष्टेन कपर्दियक्षेण प्रसादीकृतां तां संपदं निवेदयामास। तेपि संपन्नसंपत्तयस्तदेव जन्मनगरं

१ चतुःसारिकाभिः २ D तद्गात्रिश्चतुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाश्रित्य निजधर्मस्थानसमारचनपराः जिनशासनप्रभावनां विविधां कुर्वन्तो वैधर्मिकाणामपि मनस्सु जिनधर्मं निश्चलीचक्रुरिति श्रीवीतरागपूजायां धनदप्रबन्धः ॥

इत्याचार्यश्रीमेरुतुङ्गविरचिते प्रबन्धचिन्तामणौ विक्रमादित्याद्युदितपात्रविवेचनप्रमुखजिनपूजायां धनदप्रबन्धपर्यन्तवर्णनो नाम प्रकीर्णकाभिधानः पञ्चमः प्रकाशः समर्थितः ॥ ग्रंथाग्रं ३०००.

दुःप्रापेषु बहुश्रुतेषु गुणवद्वृद्धेषु च प्रायशः
शिष्याणां प्रतिभाभियोगविगमादुच्चैःश्रुते सीदति
प्राज्ञानामथ भाविनामुपकृतिं कर्तुं परामिच्छता
ग्रन्थः सत्पुरुषप्रबन्धघटनाच्चक्रे सुधासत्रवत् ॥ १

प्रबन्धानां चिन्तामणिरयमुपात्तः करतले
स्यमन्तस्य भ्रान्तिं रचयति चिरायोपनिहितः ।
हृदि न्यस्तःशस्तां सृजति विमलां कौस्तुभकलां
तदेतस्माद्ग्रन्थाद्भवति विबुधः श्रीपतिरिव ॥२

यथा श्रुतं संकलितः प्रबन्धै—
र्ग्रन्थो मया मन्दधियापि यत्नात् ।
मात्सर्यमुत्सार्य सुधीभिरेव
प्रज्ञोद्धुरैरुन्नतिमेव नेयः — ३

---

१ ब्राह्मणानां।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावद्दिवि कितवाविव रविशशिनौ क्रीडतो ग्रहकपर्दैः
ग्रन्थस्तावन्नन्दतु सूरिभिरुपदिश्यमानोयम् ॥ ४॥
नृपश्रीविक्रमकालातीतसंवत् १३६१ वर्षे फाल्गुन-
सुदि १५ रवावद्येह श्रीवर्द्धमानपुरे चिन्तामा-
णिग्रन्थः समाप्तः

---

१ A त्रयोदशस्वब्दशतेषु चैक-
षष्ट्यधिकेषु क्रमतो गतेषु ।
वैशाखमासस्य च पूर्णिमायां
ग्रन्थः समाप्तिं गमितो मितोयम् ॥ १ ॥

समाप्तम् .

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपूर्णपुस्तकाभ्यां पाठान्तराणि तदन्यद्देयं च यथा



पत्रे	पङ्क्तौ.	मुद्रिते.	दृष्टे.
१	६	गुम्फान्—	ग्रन्थान् A B
१	१०	श्रीधर्मदेवः—	श्रीधर्मदेवैः शतघोदितैवि वृत्तैश्च A श्रीधर्मदेवः शतघोदितैति वृत्तैश्च B
१	१३	प्रदर्शितवान्—	विनिर्मितवान् A अत्र निर्मितवान् B
२	८	सुसंप्रदायादृब्धे—	सुसंप्रदायारब्धे A सुसंप्रदायदृष्टे B
२	९	अन्त्यः—	अन्तः B
२	१५	विक्रमादि—	क्रमविक्रमादि B
२	१७	द्युतोप्यतिनीतिपर सन्परः शतैः—	द्युतः परशतैः B
३	१	अनुपलभमानः—	अलमानः A
३	२	भट्टमात्रमित्रसहायो—	भट्टमात्रसहायो A B
३	३	प्रवरनामनि नगरे—	प्रवरनाम्नि प्रवरनगरे A B
३	९	पुण्यश्रवणपूर्वं—	पुण्यश्रवणात्पूर्वं A पुण्यश्रवणापूर्वं B
३	९	सहादाय—	समादाय A आदाय B
३	१०	यत्कश्चित्—	तात काश्चित् A देवकश्चित् B
३	१९	प्रादुरासीत् भट्ट—	प्रादुरासीत् भाग्येनार्कि न घटते॥ यतः यद्यपि कृतसुकृतशतः प्रयाति गिरिकन्दरान्तरेषु नरः। करकलितदीपकलिका तथापि लक्ष्मीस्तमनुसरति ॥ १ ॥ भट्ट B
३	१७	शोकशङ्कुशङ्कापनोदाय—	शोकापनोदाय A B

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३ १९ विक्रमः सहजां—विक्रमस्तदानीं सहजां A
४ १ व्रणरोहणं—व्रणरोपणं A
४ ४ परिभ्राम्यन्—परिभ्रमन् A B
४ ४ अवन्तिपरिसरं—अवन्तिदेशपरिसरे A अवन्ति-परिसरे B
४ ८ राज्यस्य—राज्ये A
४ ११ भक्त्या वा शक्त्या—यथाशक्त्या भक्त्या वा
५ ६ भक्त्या—अत्यन्तभक्त्या A B
५ ७ एतावद्वृत्तस्य—एतद्वृत्तस्य A B
५ ११ विज्ञाप्य—विज्ञप्य A
५ ११ विज्ञापयिष्यामि—विज्ञपयिष्यामि A
५ १४ उपरुध्य—उपरुद्धः A B
५ १८ भोज्यादिपाकं—भोजनादिकं A B
६ १ आगतः स नृपं जगौ तद्भोज्य—आगतः।तद्भोज्य AB
६ ४ आदिष्टः स नृपं—आदिष्टः सन् अहो अस्य करिघटाविघट्टनैकपञ्चाननस्य महत्साहसं यत्सत्त्वेन किं न ज्ञायते यतः
सत्त्वैकतानवृत्तीनां प्रतिज्ञातार्थकारिणाम् ।
प्रभविष्णुर्न देवोपि किं पुनः प्राकृतो जनः ॥
एवं विमृश्य नृपं A
६ ९ अमुनाद्भुत—तवाद्भुत A B
६ ९ वन्यो—विज्ञो A
६ ९ भित्तिभागे—चित्रभागे A
६ १२ साहसाङ्क १॥ अवन्त्यां....समर्पिता-साहसाङ्क १॥ कालिदासादैर्महाकविभिरित्थं संस्तूयमानश्चिरं प्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्यं राज्यं बुभुजे ॥ सांप्रतमवसरायातां कालिदासमहाकवेरुत्पत्तिं संक्षेपतो ब्रूमः ॥ अवन्त्यां पुरि श्रीविक्रमादित्यसुता प्रियङ्गुमञ्जरीनाम्नी साध्ययनाय पित्रा वेदगर्भनाम्नः पण्डितस्य समर्पिता A
वररुचिनाम्नः पण्डितस्य प्रदत्ता B

७ १३ अधिको विद्यतया—अधिकविद्यतया A B
८ १ करवडी—करचण्डी A B (क्वचिद्देशे भाषायां हस्ततलद्वययोजना करचुलीति केचित्)
८ २ अश्रुतं—अश्रुचरं A अश्रुतपूर्वं B
८ ८ वपुःपरिकर्मपूर्वं—वपुःपरिकर्मणा सह पूर्वं A वपुःपरिकर्मणा पूर्वं स्वस्तीत्याशिर्वादाध्यापनं B
८ १५ पाणिमृत्....गर्वितः १॥—पाणियुक् । रसतात्तव राजेन्द्र टणत्कारकरं यशः ॥ १ ॥ A B
९ ६ महिपीपाल एव—मूर्खोयमिति B
९ १२ आरराध....पुत्री—आराधयितुमुपविष्टः न भुङ्क्ते दिनाष्टकं जातं पुत्री.
९ १२ दासी—कालिकानाम्नी दासी A B
९ १६ अस्ति कश्चिद्वाग्विशेषः (इत्यनेन कुमारसंभवमेघदूतरघुवंशाख्यपद्यबद्धं काव्यत्रयं तेषां क्रमेण त एवादिशब्दा इति तत्त्वम् ॥ कालिदासप्रबन्धादयः षट् गद्यपद्यात्मका इति गुरुवाक्यम्)
९ १८ रचयामास । अन्यदा—रचयामास ॥ इति कालिदासप्रबन्धः । अन्यदा A B
१० ५ स्थितः....सुप्त—स्थितः पुरुषमेकमवलोक्य सुप्त B
१० ९ अर्हीनादिभिः—अर्हणादिभिः A B

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१० ११ संध्यासर्वावसरानन्तरं——संध्यायां सर्वावसरानन्तरं A B (सर्वावसरशब्दो मध्यरात्रद्योतक इत्यर्थः)

१२ १ तस्थुः । अथ— तस्थुः । इति विक्रमादित्यसत्त्वप्रबन्धः । अथ A B

१२ १४ त्रिसर्सज । अथ——त्रिसर्सज ॥ इति सत्त्वपरीक्षाप्रबन्धः । अथ A B

१२ १५ निराकृताः——विनाकृताः A B

१३ १० प्राहरिके द्विजे निजं——प्राहरिके द्विजन्मनि A

१३ १२ पल्लीगात्रनिवेशितं——पल्लीसङ्गनिवेशित B

१३ १४ विद्या सिद्धा । अथास्मिन्——विद्यासिद्धिप्रबन्धः ॥ एकदा नृपो गुरुवन्दनाय गतः तत्र वृद्धं कमपि तपस्विनं पठन्तं वन्दयामास तेन नाशीर्निगादिता पठनव्यग्रेण । राज्ञोक्तं वृद्ध पठन् मुशलं फुल्लावयिष्यसी । तदवगम्य तेन पठित्वा सूरिपदे प्राप्ते तस्यैव राज्ञः सदसि गत्वा मुशलमानास्यालवालं विधाय श्रीऋषभदेवस्तवेन मुशलं पुष्पयित्वा गतः। तावता सिद्धसेनेनापि तदवगत्य वादाय पृष्ठे गतम्। परेण केतलारसग्रामं व्रजन् वृद्धवादी रुद्धः वादं विधेहि । तेनोक्तं । पुरे गम्यते तत्र सभ्या भवन्ति । पुनः प्रतिवादिनोचे । अत्रैव वादः । अमी गोपाः सभ्याः । तेप्याकारिताः । प्रथमं सिद्धसेनेनोपन्यासो विहितो गीर्वाणवाण्या । तदनु वृद्धवादिना गण्ठीयकं बध्वा गोपकुण्डकं विधाय प्रोचे ॥ नवि मारीयए नवि चोरीयए परदारागमण निवारीयए । थोवा विहु थोवं दाईयए इम सग्गि टगमगु ला-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईयए ॥ एवं पठति गोपा नृत्यन्ति । तैरुक्तमनेन जितं त्वं किमपि न वेत्सि । ततो वृद्धवादिना पुरे मत्वा वादं विधाय जितः शिष्यो बभूव । ततः सिद्धसेनादिवाकरेण गुरुचरणसंवाहनां विधाय मौनेन गुरव उक्ताः । यदि यूयमादेशं ददत तदाहमागमं संस्कृतेन करोमि, गुरुभिरुक्तं । तव महत्पापमजनि त्वं गुरुगच्छयोग्यो न गच्छेः । तेनोक्तं, प्रायश्चित्तं ददत । गुरुभिरुक्तं । यत्र जिनधर्मो न तत्र जिनप्रभावनां विधाय पुनः समागन्तव्यमित्यवधूतवेषेण चलितः । द्वादशवर्षाणि यावदन्यत्र परिभ्रम्य तदनन्तरं मालवके गूढमहाकालप्रासादे शिवाभिमुखं चरणौ कृत्वा चरणत्राणौ द्वारकाष्ठे नियोज्य सुप्तः । तत्र वारितोपि तथैव । अत्रान्तरे राज्ञारक्षिकपुरुषान् प्रेषयित्वोपद्रुतः । तावतान्तःपुरे रवप्रदीपनं लग्नं, राज्ञा समागत्य दृष्टः । कथं शिवस्य न नमस्कारं विदधासि । तेनोक्तं मम नमोसौ न सहते । विधेहि । तेन सकललोकसमक्षम्

प्रशान्तं दर्शनं यस्य सर्वभूताभयप्रदम् ।
माङ्गल्यं च प्रशस्तं च शिवस्तेन विभाव्यते ॥१॥

इति द्वात्रिंशद्द्वात्रिंशतिका कृता, तदा लिङ्गमध्यादवन्तिसुकुमालद्वात्रिंशत्पत्नीकारितप्रासादे श्रीपार्श्वनाथबिम्बं प्रकटीभूतं नमस्कृतं च । असौ सहते नमस्कारं तदाप्रभृति गूढमहाकालोजनि । राजा विक्रमार्कः परमजैनोभूत् । सिद्धसेनोपि स्वगुरुपार्श्वे समेत्य सूरिमन्त्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्यैकदोज्जयिन्यामेव चातुर्मासकं स्थितः । अथान्यस्मिन्

१३ १६ बन्दिपुत्रैः—बन्दिवृन्दैः B

१४ १ (आसे दर्शनामिति पद्यं नास्ति A B)

१४ १९ नराधिपः—धराधिपः

१४ १७ वृथा तृप्तस्य—वृथा भुक्तस्य A B

१४ १८ सुवर्ण..उपदिष्टे-सुवर्णदानेनावनीमृणीकुर्वित्युपदिष्टः B

१९ १ (अष्टौ पद्यानि तानि न A B)

१७ ५ एष्टः...श्री—एष्ट इति जगौ । जगुदालिद्दिइ दुत्थियउं बलिबन्धणह मुइज्ज ॥ १ ॥ इत्याकर्ण्य श्री—B

१७ ८ आरेभे...अथ—आरेभे । उज्जयिन्यां राजा विक्रमादित्यो भट्टमात्रेण समं महाकाले नाटकालोकनार्थं गुप्तवेषो गतः कालान्तरितेन नागरिकसुतेन कार्यमाणे नाटके सूत्रधारमुखात्तद्वर्णनं श्रुत्वा राजापि नागरिकद्रव्यग्रहणाय मनसि लोभं कृतवान् । पश्चात्कियत्कालमतिक्रम्य तृषितो मुख्यवेश्यागृहे भट्टमात्रपार्श्वात्पानीयं याचितवान् । तत्र वृद्धवेश्या प्रधानान्पुरुषान् भणित्वा तान्निमित्तमिक्षुरसमादातुमुषवने गता । सूलैकैरिक्षुदण्डान् भित्त्वा तयार्द्रघटेप्यसंभृते दुर्मनस्का करकं भृत्वा वेलाविलम्बेनागता राज्ञेक्षुरसे पीते भट्टमात्रेण वेलाविलम्बदौर्मनस्यकारणं एष्टा जगाद । अन्यदिने एकेन निर्भिन्नेक्षुदण्डेन सकरको घटो भ्रियते । अद्य घटोपि न संपूरितः । तत्कारणं न ज्ञायते । भट्टमात्रेण (पुनः) एष्टं यूयमेव परिणतमतयस्तत्कारणं जानीत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो विचार्य निवेदयन्तु । वेश्यापि वदति । पृथ्वीपतेर्मनः प्रजासु विरुद्धं जातं ततः पृथ्वीरसोपि क्षीणो जातः । इति कारणं निवेदितवती । राजापि तद्बुद्धिकौशलाच्चमत्कृतः । स्वभुवनशयनीये सुप्त इति चिन्तितवान् । अकृतेपि प्रजापीडने विरुद्धचिन्तामात्रेणापि पृथ्वीरसहानिर्जाता । अतः प्रजां न पीडयिष्यामीति कृतनिश्चयो नृप इति परीक्षणार्थं द्वितीयायां निशायां तृषाभिषाक्तद्गृहे गत्वा शीघ्रमेव सहर्षया तयानीतामिक्षुरसं पीत्वा शयनीये सुप्तवान् । वेश्यापि भट्टमात्रपृष्टा राज्ञः प्रजासु हृष्टं मनो निवेदितवती राज्ञापि आत्मनिशावृत्तान्तं निवेद्य पुनरपि तस्यै वृद्धवैश्यायै परचित्तोपलक्षणतुष्टेन हारो दत्तः । इति नृपतिमनोनुसारी पृथ्वीरसप्रबन्धः ॥ अथ B

१९ ३ ताडयतः....अत्रान्तरे—उपरि च फणी पुच्छवलम्बेनाधोभूय कुसुमगन्धिनृपशिरसि दंशाय पुनः पुनः फूत्कुर्वाते । अत्रान्तरे B

२० ३ चकार....कदाचिदायुः—

स्वच्छं सज्जनचित्तवच्छ्रुतरं दीनार्थिवच्छीतलं
पुत्रालिङ्गनवत्तथा च मधुरं बालस्य संजल्पवत् ।
एलोशीरलवङ्गचन्दनलसत्कर्पूरपालीमिल—
त्पाटल्युत्पलकेतकीसुरभितं पानीयमानीयताम् ॥ १॥
यदा जविश्च शुक्रश्च परितश्चन्द्रमण्डलम् ।
परिवेष्टयतस्तद्वै राजा कष्टेन जीवति ॥ १ ॥ इति
विक्रमार्कस्य निगर्वताप्रबन्धः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथान्यस्यां निशि (इत्यादि भोजवृत्तान्ते द्रष्टव्यं तत्रायं विशेषः)

एका रजकी राज्ञा पृष्टा वस्त्राणि विरूपाणि कथं सैकतानि तयोक्तम् ।

यासौ दक्षिण दूक्षिणार्णववधूरेवाप्रतिस्पर्द्धिनी
गोविन्दप्रियगोकुलाकुलतटा गोदावरी विश्रुता ।
तस्यां देव गतेपि मेघसमये स्वच्छं न जातं जलं
त्वद्दण्डद्विरदेन्द्रदन्तमुशलप्रक्षोभितैः पांसुभिः॥१॥
रजकवधूवचनमिदं श्रुत्वा नरनाथनायकः स ददौ ।
स्वाङ्गपृष्ठकसहितं लक्षं भ्रूक्षेपमात्रेण ॥ १ ॥
चौरमागधविप्रभ्यो रजक्यै कविताश्रुतौ ।
चातुःप्रहरिकं दानं दत्तं विक्रमभूभुजा ॥ २ इति
प्रबन्धाः नानाविधा यथाश्रुतं विज्ञेयाः । कदाचिदायुःB

२२ ६ एव रूपं—एकमेव रूपं A B
२२ ६ ताः सहस्त—ता दत्तहस्त—A B
२२ ६ निजमपरावं—निजमेवापरावं A B
२२ ९ तासु मुख्यया—तासां मुख्यया
२३ ५ निधीनू वेद्मि—निधीनवतीर्णान्वेद्मि A B
२४ २ शातवाहनकथा यथा श्रुता ज्ञेया—शातवाहनप्रबन्धा लिख्यन्ते B
२४ ११ वृतिस्तस्यां—वृत्तिः ।
अहो कोपि दरिद्राणां दारिद्र्यव्याधिरद्भुतः ।
वृष्टिक्काथेपि यः पीयमाने न क्षयभूरभूत् ॥ १ ॥
तस्यां B
२४ १४ व्रजन्तमाहूय तं सकुपिण्डं—व्रजन्तं जैनमु—निं दृष्ट्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वभवे मया कस्मैचिन्न ददे तस्येदं फलम्। यदुक्तम।
रम्येषु वस्तुषु मनोहरतां गतेषु
रे चित्त खेदमुपयासि कथं वृथा त्वम्।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा
पुण्यैर्विना नहि भवन्ति समीहितार्थाः॥ १॥
इत्थं चिन्तयित्वा मुनिमाकार्य सक्कुपिण्डं B

२४ १९ शालवाहननृपतिरासीः—सातवाहननृपतिरासीः A (कथासरित्सागरे। सातेन (सुखेन) यस्मादूढो-भूत्तस्मात्तं सातवाहनमिति)

३१ ३ गाथा....(दशश्लोका न AB)....गुर्जरभुवि—गाथाचतुष्टयं बहुश्रुतेभ्यो ज्ञेयम्। षट्त्रिंशद्ग्रामलक्षप्रमिते कन्यकुब्जदेशे कल्याणकटकनाम्नि राजधानीनगरे भूराज इति राजा राज्यं कुर्वन् कस्मिंश्चित्प्रभातसमये राजा राजपाटिकायां संचरन्नेकस्मिन्सौधतले वातायनस्थितां कामपि मृगाक्षीं मृगयमाणो निजचित्तापहारापराधिनीं तां जिहीर्षुर्निजं पानीयाधिकृतपुरुषं समादिदेश। सच तां नृपसौधे समानीय कस्मिंश्चित्संकेतप्रदेशे स्थापयित्वा नृपं विज्ञपयामास। नृपेण च तत्रागतेन बाहुदण्डे धृता सती भूपमवादीत्। स्वामिन् सर्वदेवतावतारस्य भवतो हन्त कोयं नीचनार्यामभिलाषः। ततस्तद्वाक्यामृतेनेषच्छान्तकामानलो नृपः कोसीति तां प्रोचे। तयाहं दासीत्यभिहिते किं तथ्यमेतदिति नृपादेशात्प्रभोर्दासः पानीयाधिकृतस्तस्य पत्न्यहं दासानुदासीति तद्वार्त्तयान्तश्चमत्कृतो नृपतिः सर्वथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विलीनकामार्त्तिः स्वां सुतां मन्यमानो विससर्ज । तस्या वपुषि निजकरौ लग्नाविति विचिन्त्य तन्निग्रहवाञ्छया निशीथे निजैरेव यामिकैर्गवाक्षप्रविष्टनरकरभ्रान्त्या निजावेव भुजौ निग्राहयामास । अथ प्रत्यूषे तान्यामिकान् सचिवैर्निगृह्यमाणान्निवार्य मालवमण्डले महाकालदेवप्रासादे गत्वा स्वयं देवमाराधयंस्तस्थौ । देवादेशाद्भुजद्वये लग्ने सति तं कन्यकुब्जार्द्धमालवदेशं सान्तपुरं तस्मै देवाय दत्त्वा तद्रक्षाधिकृतान् परमारराजपुत्रान्नियोज्य स्वयमेव तापसीं दीक्षामङ्गीचक्रे । (इति शीलव्रते भूयराजप्रबन्धः) तस्य कन्यकुब्जस्यैकदेशो गूर्जरधरित्री तस्यां गूर्जरभुवि B

३१ १० वणनाम्नि—बाणनाम्नि A

३१ १२ शीलगुण–शीलगणि-A शीलगण B

३२ २ गणिन्या—गणिना A

३२ २ परिपाल्यमानः—प्रतिपाद्यमानः B

३२ ९ लोष्टैर्निघ्नन्—बाणैर्निघ्नन् A B

३२ ९ अकरोत् । काकरग्रामे—अकरोत् । चौरस्वभावे लग्ने न सुखं कदाचिदपि । यतः ॥

नक्तं दिवा न शयनं प्रकटा न चर्या
स्वैरं न चान्नजलवस्त्रकलत्रभोगः ।
शङ्कानुजादपि सुतादपि दारतोपि
लोकस्तथापि कुरुते ननु चौर्यवृत्तिम् ॥ १ ॥ A

३२ १४ आहूतः....पूर्वकं—स्नानभोजनवस्त्रदानपूर्वकं A B

३२ १७ चरटवृत्त्या—चौरवृत्त्या A

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८ जम्बाभिधानः—जाम्बाभिधानः B
१ बलवेध्यं—चलवेध्यं B
३ तद्योध—तद्योधृ-A
९ पञ्चकुलेन (राजाधिकारिणां पञ्चानां समूहेन) तादृशराज्ञः—तद्देशराज्ञः A B
६ कञ्चुकसंबन्धे (उद्वहनावसरे दुहितृदत्तसेवकार्थसंबन्धे
७ सेलभृत्—सेलभृत् A B (राजद्रव्योद्वाहणाय लक्ष्मविशेषधारी)
९ रूप्यकद्रम्म—पारूपकद्रम्म—B
२ शशकेनोच्छासिता—शशकेन श्वा त्रासितः A
७ श्रियादेवीं—श्रीदेवीं A
९ जम्बाभिधानः—जाम्बाभिधानः A
१ धवलगृहकण्ठे—धवलगृहे कण्ठीश्वर—A
४ नैव नन्दति—तन्न नन्दति B
५ निरुद्धं वर्ष ५९ मास २ दिन १० (यस्मिन्वर्षे रा-
१४ ज्ये स्थितस्ततो मरणपर्यन्तं निरुद्धशब्दार्थः)
८ सुदि ३ गुरौ—शुद्ध १३—A
१४ सार्द्धशती संख्यया—सार्द्धघटा संख्यया रूपं १८ B
३ प्रतिपत्त्यादि कृतं—प्रत्यादिष्टं B
१२ अस्मत्पुरुषैः—अस्मत्स्थानपुरुषैः A B
१ अनुजीविनां—द्विजन्मनां A B
६ अनेन....वाहकेल्यां—अनेन राज्ञा वर्षाणि ३९ राज्यं कृतं सं० ८९७ पूर्वं वर्ष २९ श्रीक्षेमराजेन राज्यं कृतं सं० ९२२ पूर्वं वर्ष २९ श्री मूयडेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राज्यं कृतं। अनेन श्रीपत्तने श्रीभूयडेश्वरप्रासादः कारितः। सं. ९९१ पूर्वं श्रीवैरिसिंहेन (वीरसिंहेन B) वर्षाणि २९ राज्यं कृतं सं. ९७६ पूर्वं वर्ष १९ श्रीरत्नादित्येन राज्यं कृतं सं. ९९१ पूर्वं वर्षाणि ७ श्रीसामन्तसिंहेन राज्यं कृतं एवं चापोत्कटवंशे सप्त नृपतयोभूवन् विक्रमकालतः संख्यया वर्षाणि ९९८॥ पूर्वोक्तश्रीभूयडराजवंशे राजबीजदण्डकनामानस्त्रयः पुत्राः सहोदरा यात्रायां श्रीसोमनाथं नमस्कृत्य ततः प्रत्यावृत्य श्रीमदणहिल्लपुरे श्रीसामन्तसिंहनृपं वाहकेल्यां AB

३९ १४ श्रीभूयडदेवेन—श्रीसामन्तसिंहेन A

३९ १८ सं० ९९३....अवसरे—९९८ श्रीमूलराजस्य राज्याभिषेको निष्पन्नः

मूलार्कः श्रूयते शास्त्रे सर्वकल्याणकारकः।
अधुना मूलराजेन योगश्चित्रं प्रशस्यते॥ १॥
इत्यादिस्तुतिभिः स्तूयमानः साम्राज्यं कुर्वन्नास्ते।
तस्मिन्नवसरे A

४० १ अभिषेणयितुं—पराजेतुं A

४० ४ बारवनामा—बारपनामा A B

४१ १ राजा लहणिकां—राजलहणिकां B

४१ ६ सामन्तान् .... करण—सामन्तानाकार्य क्षूणलेखेन व्ययकरण B

४१ ९ ज्ञापनापूर्वं—ज्ञापनपूर्वं A

४१ १३ प्रत्यूषकाले—प्रदोषकाले A

४२ ९ उपयाचितैः—उपयाचितशतैः A B

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४१ ४ वसहिका—(वहुदेवतावासरूपा)
४३ ९ मुञ्जालदेव—मूलस्वामिदेव A
४३ १७ कन्थडि—कान्थाडि. B
४४ ६ आनृण्ये—आनृण्यं
४४ ९ चिन्तायकत्वाय—(मठाधिपतित्वाय)
४४ १३ वाक्यं—वाक्यतत्त्वं
४९ ८ ग्रामसहितं—ग्रासंसहितं A B
४९ ११ अभिषिक्तः.....इत्थं—आभिषिक्तः । इत्थं A B
४९ १७ पुरा कस्मिन्नपि—पुरा कदाचिदपि B
४७ १ बोधवाक्यानि—बहूनि वाक्यानि B
४८ १४ का यत्—काचित् A कापि B
४८ १६ अथ सं. १०९०....अभिषिच्य—अथ सं. ९९८ पूर्वं वर्षाणि ९९ राज्यं मूलराजेन चक्रे । इति मूलराजप्रबन्धः ॥ संवत् १०९३ पूर्वं वर्षाणि १३ श्री चामुण्डराजेन राज्यं कृतं । अथ सं. १०६६ पूर्वं मास ६ श्री वल्लभराजेन राज्यं कृतं । अथ सं. १०६६ पूर्वं वर्ष ११ मास ६ श्रीदुर्लभराजेन राज्यं कृतम् । [अथ तस्य राजमदनशंकर तथा जगझंपण इति बिरुदद्वयं जातम् B] तेन राज्ञा श्री पत्तने दुर्लभसरोवरं रचयांचक्रे । तदनु श्रीभीमाभिधानं निजभ्रातृजं राज्येभिषिच्य A B
९९ १९ स्वदयितापि० टि० अ०
भीमभूपसुता सिंहभटेन मेदिनीभुजा ।
श्रीमती सन्मदं मुञ्जकुमारः परिणायितः ॥
९१ ८ स सीन्धलो० टि० अ०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुष्टेन मुञ्जभूपेन सिन्धुलो दुर्दमस्तदा ।
देशान्निष्कासितो मेदपाटे नागह्रदे ययौ ॥ ४९ ॥
नागह्रदपुरोपान्ते निजां पल्लीं निवेश्य सः ।
स्थितश्च मृगयां कर्तुमागाद्दीपोत्सवोषसि ॥ ५० ॥
चौरवध्यावनौ वीक्ष्य चरन्तं शूकरं निशि ।
शूलिकास्थशरं दत्त्वाटिनी धनुषि निर्भयः ॥ ५१ ॥
समारोप्य गुणं तीक्ष्णबाणेन भूपभूस्तदा ।
यावद्धन्ति किरिं तावद्देवीभूय जगावदः ॥ ५२ ॥
त्वत्साहसेन तुष्टोस्मि वरं याचस्व संप्रति ।
सिन्धूलोवक् क्षितौ क्षिप्तो मापतद्विशिखो मम ।

३ अभिहितो—अभिहिते A

११ आयुधानि—दण्डायुधानि A B

१८ भोक्तव्यं भोजराजेन—भोजदेवेन भोक्तव्यं A

१६ गोदावरीं सरितं० टि० अ०

गोदावर्यास्तटादर्वाक्स्थितेन भवता रणम् ।
कार्यं न चेत्तवाह्राय वपुर्भङ्गो भविष्यति ॥ ५१ ॥
गोदावरीपुरोभागभूः शूरास्ति भृशं नृप ।
तेन तत्र न गन्तव्यं रणाय भवता मनाक् ॥ ५२ ॥

६ जातकलत्रसंबन्धः टि० अ०

इतस्तैलिपदेवस्य पित्रा देवलभूभुजा ।
पत्नीस्थाने कृता दासी सुन्दरीत्यभिधा पुरा ॥ ६९ ॥
पुत्रीं मृणालवत्याव्हां सूते स्म सुन्दरी पराम् ।
वर्द्धयामास माता च तां स्तन्यादिप्रदानतः ॥ ७० ॥
वर्द्धमाना क्रमात्प्राप्ता यौवनं भगिनी पुनः ।
दत्ता तैलिपदेवेन श्रीपुरे चन्द्रभूपतेः ॥ ७१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रोन्यदागमच्छूलरोगेण यममन्दिरम् ।
सापि तैलिपदेवस्य भ्रातुर्गेहमुपागमत् ॥ ७२ ॥
स्वसा तैलिपदेवस्य रण्डा मृणालवत्यथ ।
भक्तपानादि मुञ्जस्य चक्रे भ्रातृनिदेशतः ॥ ७३ ॥....
तिलङ्गनगरोपान्ते गत्वा गव्यूतपञ्चके ।
ग्रामे चन्द्राभिधे तस्थुः सुरङ्गां दातुमेव ते ॥ ९ ॥

१६ राज्येभ्यषिच्यत टि. अं.
विक्रमाद्वासरादष्टमुनिब्ध्येमिन्दुसंमिते ।
वर्षे मुञ्जपदे भोजभूपो पट्टे निवेशितः ॥

१३ वैतालिकस्यार्पितम् (कथा रत्नाकरादियं कथा ज्ञेया)

९ निशान्तं—निशान्ते निशान्तं A (निशान्ते गृहे)

११ सर्वदेवनामा (भा. मु. प्रा. ले. प. १६)
अमात्ये मम्मटे सति ॥ ८, अल्लटमेदिनीपतिः, तदीयपुत्रो नरवाहनः, वज्रटः, लिम्बादित्यः, महीधरः, नारायणभट्टः, सर्वदेवः, (एते समकालीनाः ॥)
दशदिग्विक्रमकाले वैशाखे शुद्धसप्तमीदिवसे ।
हरिरिह निवेशितोयं घटितप्रतिमो वराहेण ॥ १९ ॥

१० सिंधभवणे. टि. (तदुत्पत्तिस्तु) पूर्वोक्ते ले. प. ९१
संवत्सरशतैर्यातैः सप्तञ्चनवत्यर्गलैः ।
सप्तभिर्मालवेशानां मन्दिरं धूर्जटेः कृतम् ॥ १ ॥....
कृष्णसुतो गुणाढ्यश्च सूत्रधारोत्र णण्णकः ।
एतत्काण्वाश्रमं ज्ञात्वा सर्वपापहरं शुभम् ॥
कृतं हि मन्दिरं शंभोर्धर्मकीर्त्तिविवर्द्धनम् ।

१६ मयणल्लदेवी. टि. चा. सुं. ग. कु. कु. च. सर्गे. १
(भीमपुत्रेष्वाद्यपुत्रः क्षेमराजो "हरिपाल इति केचित्"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरुराजपुत्रीं तारामुपयेमे)
कर्णोपि कर्णाटनृपाङ्गजाया-
श्चकार पाणिग्रहणं जयायाः ।
(तातै मृते क्षेमराजेन पितृवचनत्वात्कनिष्ठोभिषिक्तो
राज्ये श्रीकर्णः)
श्रीकर्णः किमु वर्ण्यते स कविभिः सद्धर्मचिन्तामणि-
र्विज्ञाम्भोजविकाशवासरमणिर्भूमीशचूडामणिः ।
स्फूर्जत्कीर्त्तितरंगिणीं दिशि दिशि प्रध्वस्ततापा जना
यस्य श्रोतृपुटैः पिबन्ति विकटैरद्याप्यपूर्णस्पृहाः ॥१॥
गोपीपीनपयोधराहतमुरः संत्यज्य लक्ष्मीपते-
र्मन्ये पङ्कजशङ्कया नयनयोर्विश्राम्यति श्रीस्तव ।
श्रीमत्कर्णनरेन्द्र यत्र चलति भ्रूवल्लरीपल्लव-
स्तत्र व्युप्यति भीतिभङ्गुरतया दारिद्र्यमुद्रा यतः ॥२॥
(कर्णोपि पुनः मीणलदेवीमुपयेमे)
कर्णाय काश्मीरपतिः स्वपुत्रीं
प्रैषीदथो मीणलदेवीनाम्नीम् ।
चकार पाणिग्रहणं महेन
तस्याः स लोकोत्कृतविस्मयेन ॥
(सोन्यासक्तस्तस्या नामापि न जगृहे)
बालाबलाबालिशभूमिपाला
नटा विटा वानरवारनार्यः ।
चौराश्चरा याचकवञ्चकाश्च
भवन्ति नूनं क्षणरागिणोमी ॥ ९ ॥
१० कर्णावतीपुरं. टि. तत एव ।
(मातङ्गीविषवतीं मीणलदेवीं बुभुजे कर्णस्ततः सिंहस्वप्न-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूचितः पुत्रो नाम्ना जयसिंहोभूत् । सोष्टवार्षिकः पट्टणे राज्यं चकार । कर्णस्तु आशापल्लीं " आशाउर सैव कर्णावती तत्र " गत्वा राज्यमकरोत् ।)

६ श्रीपत्तनं प्राप. टि. (तत एव ।)

बालोपि जयसिंहः आलिङ्गसचिवं पुरे संस्थाप्य मालवं जेतुं गतः । द्वादशवर्षैर्मालवेशं जित्वा षड्भिर्गुणैर्बध्वा " तेन षड्वारं पराजितत्वात् " नीतः

कर्णाटलाटमगधाङ्गकलिङ्गवङ्ग—

काश्मीरकीरमरुमालवसिन्धुमुख्यान् ।
देशान्विजित्य तरणिप्रमितैः स वर्षैः
सिद्धाधिपो निजपुरं पुनराससाद ॥ ३८ ॥

८ श्री हेमचन्द्रमुख्याः टि. (तत एव)

अथ श्रीपूर्णतल्लाख्यगच्छे स्वच्छेन्दुसुन्दराः ।
सूरयो देवचन्द्राव्हा दध्युरेवं हृदा स्वयम् ॥ १ ॥
पादलिप्तबप्पभट्टिवज्रार्यखपुटादयः ।
प्रभावकाः पुराभूवन्सूरयो दूरितारयः ॥ २ ॥

(नाधुनास्ति कोपि, ततस्ते सर्वलक्षणसंपन्नं जैनशासनप्रभावकं मोढब्राह्मणस्य चाविगनाम्नः सुतं चाङ्गदेवं तन्मातुः पाहिणीनाम्न्याः समभ्यर्थ्य शिष्यं सोमचन्द्रनामानं कृतवन्तः। पुनरपि मुनिचन्द्रेण सह गोचरचर्यां गतेन तेन कस्यापि सोमाख्यदरिद्रतरवणिजो गृहेङ्गारपुञ्जं हेमरूपं दृष्टं ततो हेमचन्द्र इति नाम तस्य चक्रुर्गुरवः। दशाब्देनापि निःशङ्केन तेन सिद्धराजायाशीर्दत्ता)

९ खंगारार्हं. टि. (गङ्गाधरकृतमण्डलीकनृपचरित्रसर्गे १ यदुकुलोद्भवः खङ्गारनामा राजा जीर्णदुर्गपुरे)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृङ्गारः शास्त्रविद्यानां भृङ्गारः सद्गुणाम्भसाम् ।
अङ्गारः शत्रुयूपानां खड्गारः समभून्नृपः ॥ ६७ ॥
प्रभासपत्तने येन गृहीत्वा यवनभूपतीन् ।
श्रीसोमनाथप्रासादजीर्णोद्धारः कृतः कलौ ॥....
सुराष्ट्रदेशसाम्राज्यसिंहासनसुखस्थिते ।....
तस्याभूत्तनयः श्रीमाञ्जयसिंह इति श्रुतः ।
येन यावनराजेभघटा विघटिता रणे ॥ ७७ ॥
गिरिनारायणगिरौ जयसिंहेतिगर्जति ।
प्रतिभूपतिसारङ्गा व्यद्रवन्विदिशो दिशः ॥ ७८ ॥
तस्मान्मोलकसिंहोभूद्विभूतेरास्पदं सताम् ।
यस्याभिधानमात्रेण व्यद्रवन्दैन्यवारणाः ॥ ७९ ॥....
तस्मान्मोलकसिंहेन्द्रादाविरासीज्जयन्तवत् ।
श्रीमान्भिलिङ्गभूजानिर्यो रणे शत्रुमृत्युदः ॥ ८२ ॥
तस्मिन्भिलिङ्गभूपाले सुराष्ट्रधरणीतलम् ।
पालयत्यरिभूपानां बलं विगलतां गतम् ॥ ८९ ॥ ....
योहम्मदसुरत्राणं निजदुर्गग्रहाग्रहम् ।
न्यगृहीच्च गृहीततृणं तत्सर्वस्वं समग्रहीत् ॥ ८८ ॥
तस्मादुदभवच्चन्द्रात्प्रकाश इव नन्दनः ।
महीपाल इति ख्यातः सार्थयाभिधया भुवि ॥ ८९ ॥
(इत्यादि टिप्पणं प्रतिप्रबन्धं बहु दर्शनीयमपि विस्तरादिभयादलं कृतम् ॥)

Jain Education International For Private & Personal Use Only www.jainelibrary.org